रामकीर्तिकुमुदमाला

(महाकवित्रिविक्रमकृता)

—डा० चन्द्रभानु त्रिपाठी

श्रीः

श्रीदुर्गाप्रसादग्रन्थमणिमालायाः

प्रथमो मणिः

अब्दे नक्षत्रनाथेश्वरनयनघनोद्भासिते (संवत् १७३१)

त्रिविक्रमविरचिता

रामकीर्तिकुमुदमाला

महापण्डितदुर्गाप्रसादत्रिपाठिना

कृतटिप्पणीभिर्विलसिता

व्याकरणसाहित्याचार्येण डी० फिल्० पदभाजा

चन्द्रभानुत्रिपाठिना कृतमाधुरीव्याख्यया

हिन्दीभाषानुवादेन च समन्विता

शक्तिप्रकाशनम्

बलरामपुर हाउस-इलाहाबाद

प्रथमं संस्करणम्] १९७८ [मूल्यं चत्वारिंशद्रूप्यकाणि

शक्तिप्रकाशनम्
बलरामपुरहाउस
इलाहाबाद–२

मूल्य : चालीस रुपये

[ग्रन्थसम्बन्धिनः सर्वेऽधिकाराः लेखकाधीनाः]

'बलरामपुरहाउस' स्थिते
शाकुन्तल मुद्रणालये मुद्रिता

शुभाशिषः

अनन्तश्रीविभूषितानां यतिचक्रचूडामणीनाम्

पूज्यचरणानाम् करपात्रस्वामिनाम् ।

अचिन्त्यानन्तकल्याणगुणगणाकरस्य शक्रशतकोटिविलासस्य अनन्तकोटिकन्दर्पसुन्दरस्य नभःशतकोटिप्रविस्तारस्य पवनशतकोटिविपुलबलस्य सूर्यशतकोटिप्रखरप्रकाशस्य शशिशतकोटिसुशीतलस्य कालशतकोटिदुस्तरस्य अनन्तानन्तकोटितीर्थपावनाभिधानस्य मेरुशतकोटिनिश्चलस्य सिन्धुशतकोटिगम्भीरस्य कामधेनुचिन्तामणिपारिजातशतकोटिकामपूरकस्य शारदाशतकोटिचतुरस्य विधिशतकोटिसृष्टिनिपुणस्य विष्णुशतकोटिपालकस्य रुद्रशतकोटिसंहारकस्य धनदादिशतकोटिसमैश्वर्यस्य मायाशतकोटिदुर्घटघटनापटीयसो भगवतो रामचन्द्रस्यानुपमत्वमेव । यथा शतकोटिखद्योतैरपि नादित्यस्योपमेयत्वं तथैवानन्तकोट्यादित्यैरपि भगवतो नोपमेयत्वं सम्भवति । तथापि स्ववाङ्मनोबुद्ध्यादिपावनार्थं भगवतोऽचिन्त्यगुणगणार्णवावगाहनं युक्तमेव ।

राघवेन्द्रस्य रामस्य वितता गुणगीतयः ।
जगत्कल्याणकारिण्यो जयन्ति शुभदाः शुभाः ॥
श्रीमद्दुर्गाप्रसादस्य टिप्पणीभिः मनोहरा ।
त्रिविक्रमकवीन्द्रस्य रामकीर्तिकुमुत्सुत्रक् ॥
स्वीयसौन्दर्यमाधुर्यशैत्यसौरभ्यधामभिः ।
नानापरिमलैर्विश्वं मोदयन्ती विराजते ॥
पण्डितानां प्रकाण्डेन विविधोपाधिशोभिना ।
चन्द्रभानुसुधीन्द्रेण व्याख्याद्वयसनाथिता ॥
राजते रामचन्द्रस्य कीर्तिमालेयमद्भुता ।
मुदे भवति विश्वस्य विश्वनाथस्य च स्फुटम् ॥

गोवर्धनमधिवसतां महामन्त्रप्रदगुरूणाम्

पूज्यपादानां गयाप्रसादमिश्राणाम् ।

श्रीरामवृत्तसलिलाशयमाविगाह्य
यस्तत्सुकीर्तिकुमुदावलिमाचिकाय ।
मालां तथा सुरुचिरां प्रगुणां चकार
तस्मै त्रिविक्रममहाकवये नमोऽस्तु ॥
दुर्गाप्रसादगुरुभिर्विशदीकृतायाः
यस्या मुदा मधु पिबन्ति बुधद्विरेफाः ।
साऽलङ्करोतु हृदयं भुवि भावुकानां
संयाचते व्रजपतिं गिरिराजवासी ॥

पूज्यतमानां पितृचरणानाम्

आचार्यबालकरामत्रिपाठिनाम् ।

श्रीत्रिविक्रमः कविवरो वर्ण्यं रामललाम ।
दुर्गाप्रसादसद्गुण्यं रचितं विशदं दाम ॥
रामकीर्तिकुमुदावली सुरभिमाधुरी भाति ।
बुधजनमधुकरमण्डली रसहेतोरायाति ॥

पूज्यवराणां भ्रातृवर्याणाम्

आचार्यरामलखनशर्मणाम् ।

श्रीरामस्य यशः शुभ्रं त्रिविक्रमकवेः कृतिः ।
टीका दुर्गाप्रसादीया त्रितयं मधुरं मतम् ॥
राजते रामचन्द्रस्य कीर्तिकैरवमालिका ।
तस्या मरन्दमाधुर्यं प्रसरेत्सर्वतो दिशः ॥

सतीर्थ्यानां समादरणीयानां

भ्रातृवराणाम् आचार्यमानसशास्त्रिणाम् ।

ग्राम एकडलाख्योऽस्ति यमुनायास्तटे शुभे ।
कविस्त्रिविक्रमस्तत्र सञ्जातोऽन्वर्थनामकः ॥१॥

साम्बशङ्करभक्तेन सुधिया पुण्यकर्मणा ।
श्रीरामकीर्तिकुमुदस्रगियं तेन निर्मिता ॥२॥

सर्वशास्त्रविदा सा च त्रिपाठिकुलजन्मना ।
श्रीमद्दुर्गाप्रसादेन टिप्पण्या सुरभीकृता ॥३॥

शुचौ तदन्वये जातः श्रीगौरीदत्तपण्डितः ।
दान्तः शान्तश्च शास्त्रज्ञो विद्यादाता च मत्पितुः ॥४॥

सत्पुत्रस्तस्य मतिमान् मद्गुरुः शङ्करोपमः ।
भूतेशभामिनीभक्तः श्रीमान् राजीवलोचनः ॥५॥

नाम्ना बालकरामोऽसौ तदंशप्रभवः सुधीः ।
ज्योतिर्वित्कर्मकाण्डी च स्वधर्मनिरतः सदा ॥६॥

तदात्मजश्चन्द्रभानुः सुकविः प्रतिभाधनी ।
बाल्यात्सखा सहाध्यायी मत्सुहृच्चानुजः प्रियः ॥७॥

काव्येऽस्मिन् माधुरी टीका विदुषाऽनेन निर्मिता ।
अनया ग्रन्थमाधुर्यं भूयोऽपि विशदीकृतम् ॥८॥

ज्येष्ठत्वान्मानसोल्लासाच्छुभाशीर्मे त्रिपाठिने ।
चन्द्रभानुप्रयासोऽयं प्रसरेच्चन्द्रभानुवत् ॥९॥

कृतज्ञता-ज्ञापनम्

स्ववाङ्मनोबुद्धिपावनार्थं त्रिविक्रममहाकविना विरचितस्य महापंडितश्रीमद्दुर्गाप्रसादत्रिपाठिकृतटिप्पणीसमलङ्कृतस्य रामकीर्तिकुमुदमालाकाव्यस्य प्रकाशनेन प्रसन्नमनसां श्रीचरणानां करपात्रस्वामिनां, गुरुवर्याणां गयाप्रसादमिश्राणां, पितृचरणानां बालकरामत्रिपाठिनाञ्च कृपाप्रसादं शिरसा वहामि ।

प्रयागविश्वविद्यालयस्य कुलपतीनां डा० आद्याप्रसादमिश्राणाम्, सम्पूर्णानन्द संस्कृतविश्वविद्यालयस्य कुलपतीनाम् उत्तरप्रदेशीयसंस्कृतैकादमीसंस्थाया अध्यक्षपदमलङ्कुर्वताम् आचार्यबदरीनाथशुक्लमहाभागानाम् प्रयागस्थगंगानाथझा-केन्द्रीय-संस्कृतविद्यापीठस्य प्राचार्याणां डा० गयाचरणत्रिपाठिनाञ्चाहैतुकीं कृपां स्वीकुर्वे ।

उत्तरप्रदेशीयसंस्कृतैकादमीसंस्थाया:सम्मान्यसदस्यानां निदेशकप्रमुखानामधिकारिणाञ्चानुग्रहं स्मारं स्मारं सर्वथा हृष्यामि । भ्रातृवर्याणाम् डा० रामलखनशर्मणाम्, आचार्यमानसशास्त्रिणाम्, आचार्यमानिकचन्द्रमिश्राणाम् आचार्यविद्याधरधर्माधिकारिणाम्, डा० ब्रह्ममित्रावस्थिनाम् श्रीसुबोधचन्द्रपन्तमहाभागानां निर्देशं, सहयोगं च साधु स्मरामि, अभिनन्दयामि च तान् महाभागान् ।

अयं खलु काव्यग्रन्थो महापण्डितदुर्गाप्रसादग्रन्थमणिमालाया: प्रथमोमणिस्तन्मालाप्रकाशनार्थमर्थसाहाय्यं कृतवद्भ्यः प्राच्यविद्याप्रचाराय दत्तमनोभ्यः सुजनेभ्यः कृतज्ञभावं विदधे । विश्वसिमि, तेषां सहयोगेनान्येषामपि ग्रन्थानां शीघ्रं प्रकाशनं भविष्यतीति ।

चन्द्रभानुत्रिपाठी

卐 समर्पणम् 卐

ब्रह्मश्रीरर्धमात्राऽनवकलितभिदाऽव्यक्तरूपा परा या
पश्यन्ती मध्यमाऽथो कृतमधुररवा शब्दभावम् प्रपन्ना ।
वाचामीष्टे महेशा कविनिवहनता स्वप्रकाशा च तस्याः
दुर्गायाः प्रीतये स्यान्नवकुमुदयशो मालिका रावणारेः ॥

रुचिजितरतिजानिः प्रत्यनीकक्षितीश-
क्षपणनिपुणपार्णिर्निःस्वविश्राणितश्रीः।
सुमतिभिरतिवेलं सान्यराजन्यहेलम्
शमितभुवनतन्द्रः स्तूयते रामचन्द्रः॥

[रामकीर्ति० ५]

जितक्षीरा हीराः सहजविमलेन स्वमहसा
सुनासीराश्मानः प्रहसितकरीराधिकरुचः।
त्वया दत्ताः कीराननरुचिररागा मणिगणाः
विराजन्ते वीराधनजनकुटीरान्तरगताः॥

[रामकीर्ति० १३७]

यत्सुवर्णघटनामनोरमे न्यस्तमाद्यकविकाव्यसम्पुटे।
कस्य न श्रुतिरुचिं तनोति तज्जानकीश तव कीर्तिमौक्तिकम्॥

[रामकीर्ति० २२५]

FOREWORD

Close association of Sanskrit poetry with courts has given rise to a special type of literature which is bardic in character and is highly imaginative and fanciful in its contents. The poet seeks to eulogise his patron in highly artificial and exaggerated manner describing his matchless valour, his all pervading 'white' fame, his corporeal beauty, his munificence and generosity etc. Some of the most outstanding verses of this genre of literature may be found incorporated in ancient inscriptions, in anthologies of Subhāṣitas and are quoted as illustrations for alaṅkāras etc. in the works of Sāhityaśāstra.

It was, however, left to Trivikrama, a 17th century poet of *Antarvedī* region to utilise this genre of literature for singing the glory of Lord in form of Rāma, his Iṣṭadevatā. The character of Rama, as *maryādāpuruṣottama* and an ideal king (Cf. the concept of *rāmarājya*) lends itself most naturally as central theme for such a work. The highsounding adjectives and flattering appellatives are then all directed towards God as a ruler of this earth and the terrestrial Kingdom is ultimately transformed into a holy, divine Kingdom.

It is not possible for any poet to remain uneffected and uninfluenced by the contemporary trends in society and literature and Trivikrama is no exception to it. A near contemporary of him, Bhūṣaṇa, the famous bardic poet of Hindi literature, composed his fiery poems emitting *Vīrarasa* and stayed long enough in Asothar, a state in Fatehpur, not far from the birth place of Trivikrama, to influence the poetic talents of that region. And right since the composition of Rāmacaritamānasa by Tulasīdāsa towards the end of 16th century, the cult of Rāma and literature on devotion to Rāma as personification of the Lord experienced an unprecedented

boom in eastern part of north India. What else could be more natural to a poet deeply devoted to Rāma and probably a court-poet in some Hindu state, than to sing the glory of his Lord, the ruler of the universe, in the manner it was in vogue during his time in case of mundane kings ? The kingdom of Rāma is simply a projection on a bigger, perhaps even superterrestrial, scale of an ideal earthly kingdom and Rama is a super-monarch with no weeknesses and vices of a mortal king.

The present edition of the Rāmakīrtikumudamālā is based on a single manuscript preserved in the family of Dr. Chandra Bhanu Tripathi. Dr. Tripathi has the proud privilage of being a direct descendent of Pandit Durga Prasad Tripathi who annotated the text of Rāmakīrtikumudamālā in V. S. 1874 (i. e. 1817 A. D) living in Ekaḍalā village on the river Yamuna which is also the birth place of the present editor. Two other manuscripts of this work have been noted by Aufrecht in his C. C. and Dr. C. B. Tripathi mentions that the Pandits in and around the village Ekaḍalā are reported to have possessed certain other copies of this work; but all these Mss. are now unfortunately irretrievably lost. The Sanskritists should, therefore, be sincerely thankful to Dr. Tripathi for bringing this rare work of a less known branch of Sanskrit literature to light.

Dr. C. B. Tripathi is a profound Sanskrit scholar well-versed in both traditional as well as modern ways of Sanskrit learning. Whereas his mastery over the Vyākaraṇa has enabled him to delve deep into the vocabulary of the text and to find out the appropriate meanings of even the most abstruse words, the *sahṛdaya* in him has interpreted the literary beauty of the Kāvya in such a manner as to reveal even the most subtle nuances of its poetical brilliance. Without his Sanskrit commentary Mādhuri it may not be easy to acquire complete aesthetic pleasure of the Kavya. His proudly admits that he

has based his Sanskrit commentary on the annotations of his ancestor Pandit Durga Prasad Tripathi without which it may not have been possible for him to understand the full and the correct meaning of many of the ślokas (Cf. the words *kati, ati* and *bhavati* in Śl. 187). This book heralds the beginning of a new series which is dedicated to the memory of Pt. Durga Prasad Tripathi and which is to contain, among others, the works written by this famous Pandit most of which are till now unknown and unpublished.

I am thoroughly satisfied with this edition of Rāmakīrti-kumudamālā which I personally consider to be a gem in Sanskrit literature. Dr. C. B. Tripathi deserves all our praise and appreciation for making this rare work available to us. I am sure the work shall be enthusiastically received by the Sanskrit world.

रघूद्वहस्तोत्रकथां विहाय
ये काव्यमन्यत्र समारभन्ते ।
कान्ताकुचाभोगनिरादरास्ते
कण्ठे कपीनां रचयन्ति हारम् ॥
—मार्कण्डेयमिश्र, दशग्रीववधम्, I. 3.

ALLAHABAD
November 22nd, 1979

Dr. G. C. Tripathi
Principal
G. N. Jha Kendriya Sanskrit
Vidyapeetha

श्रीः

त्रिविक्रमकविकृतम्

रामकीर्तिकुमुदमालाकाव्यम्

महाकविस्त्रिविक्रमः

रामकीर्तिकुमुदमाला—(रामकीर्तिकुमुदस्रक्) ऽभिधानम् इदं काव्यम् अनुगुणम् भगवतः श्रीरामचन्द्रस्य यशोवर्णनपरं काव्यमस्ति। काव्यभेदेनेदं खण्डकाव्यकोटौ समायाति। अस्य रचयिता महाकविस्त्रिविक्रमः सप्तदशशताब्द्या उत्तरार्धेऽष्टादशशताब्द्याः पूर्वार्धे आसीदिति ग्रन्थरचनायाः कालनिर्देशेन परिज्ञायते। अयं त्रिविक्रमः कविः नलचम्पूकारात्त्रिविक्रमकवेः सर्वथा भिन्न एव। अस्य जन्मसमयनिवासस्थानादिविषयकं किमपि प्रमाणं नोपलभ्यते। ग्रन्थस्यादौ चतुर्थे श्लोके कविना स्वनामोल्लेख एवं कृतः—

यस्त्रिविक्रम इति क्षितिचक्रे विश्रुतः श्रितशिवाङ्घ्रिसरोजः।
रामकीर्तिकुमुदस्रजमेतामातनोति स मुदे जनतायाः॥ (राम० ४)

तथा ग्रन्थान्ते—

अब्दे नक्षत्रनाथेश्वरनयनघनोद्भासिते मासि भाद्रे
पक्षे कृष्णे तिथावप्यगपतिदुहितुर्वासरे भास्करस्य।
त्रैविक्रम्या गिरैषा सहजविमलया ज्योत्स्नयेवोल्लसन्ती,
सम्पूर्णा रावणारेः सुरभिरिह यशःकैरवस्रङ्मुदेऽस्तु॥ (राम० २७२)

एतत्काव्यस्य टिप्पणीकारेण विद्वत्प्रवरेण श्री दुर्गाप्रसादत्रिपाठिना ग्रन्थान्ते '**इति श्रीविश्वम्भरात्मसम्भवश्रीगुरुधरणीधरचरणाराधनसावधानत्रिविक्रमकृता रामकीर्तिकुमुदमाला सम्पूर्णा।**' इति लिखितम्। अयं धरणीधरः एव कुवलयानन्दटीकाया अलङ्कारदीपिकाया निर्मातुराशाधरभट्टस्यापि गुरुरासीदिति '**शिवयोस्तनयं नत्वा गुरुं च धरणीधरम्। आशाधरेण कविना रामजीभट्टसूनुना।**' (अलङ्कारदीपिका पृष्ठ १) श्लोकेन ज्ञायते। अयमाशाधरभट्टः सप्तदशशताब्द्या उत्तरार्धेऽष्टादशशताब्द्याः पूर्वार्धेचासीदिति त्रिविक्रमेण कविना सह तस्यैककालस्थितिरपि प्रमाणिता भवति। यतो हि **अब्दे नक्षत्रनाथेश्वरनयनघनोद्भासिते** इति पूर्वोक्ते श्लोके अङ्कानां वामतो गतिरिति न्यायेन नक्षत्रनाथश्चन्द्रमाः = १ ईश्वरनयनानि = ३ घनः = १७ (संवत् १७३१ इति फलितं भवति)। तथा चानयोः कविवरयोर्गुरोः श्रीमद्धरणीधरस्यापि स्थितिकालस्तदानीमेवासीदिति वक्तुं शक्यते।

एषा किंवदन्ती वर्तते यदेकदा पण्डितराजो जगन्नाथो दिल्लीश्वरसकाशात् यमुना-मार्गेण काशीं गच्छन् मार्गे प्रयागतः पश्चिमदिशि अनुयमुनं स्थिते कवेस्त्रिविक्रमस्य जन्मग्रामे (एकडलाख्ये) रात्रिनिवासमकरोत् । तत्रत्यैर्जनैः कथितमस्य त्रिविक्रमकवे वैदुष्यं काव्यनैपुण्यं च श्रुत्वा प्रगल्भः सः श्लोकमिमं पपाठ—

दिगन्ते श्रूयन्ते मदमलिनगण्डाः करटिनः
करिण्यः कारुण्यास्पदमसमशीलाः खलु मृगाः ।
इदानीं लोकेऽस्मिन्ननुपमशिखानां पुनरयम्
नखानां पाण्डित्यं प्रकटयतु कस्मिन् मृगपतिः ॥

श्लोकमाकर्ण्य कस्यापि मुखेन कविवर्योऽसौ पण्डितराजस्य दर्शनाय कालिन्दी-कूलमगच्छत्, काव्यचर्चायाञ्च **'नखानां पाण्डित्यम्'** इति पदं दूषयित्वा **'नखानां तीक्ष्णत्वम्'** इति समर्थितवान् । पण्डितराजश्च कविवरस्य कवित्वे प्रौढिं स्वीचकार, अभिनन्द च तम् । पण्डितराजस्यापि स एव स्थितिकालोऽस्तीति किंवदन्ती प्रामाणिकी भवितुमर्हति ।

एतैः पूर्वोक्तैः प्रमाणैः क्षेत्रीयपण्डितमण्डले कर्णपरम्परया श्रुतं चेदं तथ्य-मायाति यत् उत्तरप्रदेशीय फतेहपुरजनपदे अनुयमुनम् एकडलाभिधो ग्रामः चतुश्शताब्द्याः प्राक् एकं सम्पन्नं नगरमासीत् । अत्र बहवो विद्वांसः सामन्ताः श्रेष्ठिनश्च न्यवसन् । कान्यकुब्जब्राह्मणानां वंशावल्याम् अत्रत्यास्त्रिवेदिनो दीक्षिता अग्निहोत्रिणश्च प्रसिद्धाः सन्ति । अस्मिन्नेवैकडलानगरे (सम्प्रति ग्रामे) त्रिवेदिवंशे सप्तदशशताब्द्याः उत्तरार्धे अष्टा-दशशताब्द्याश्च पूर्वार्धे श्रीमत्त्रिविक्रमकवेः स्थितिरभूत् । अस्मिन् रामकीर्तिकुमुदमाला-काव्ये यमुनायाः वर्णनं महाकविनाऽनेकशः कृतम् । तच्च प्रत्यक्षीकृतमिव प्रतिभाति । यथा अस्त्रशोभावर्णने—

पाणिच्छद्मारविन्द व्यतिकर रुचिरा कीर्तिहंसावतंसा
तेजोमार्त्तण्डमाखण्डलमणि शकल श्यामलोल्लासयन्ती ।
एषा निस्त्रिंशलेखा दिवसकरसुता भाति ते भूमिजाने !
यद्धारामेत्य नश्यन्त्यनुदिनमसुहृद्वाहिनीजीवनानि । (राम० ५१)

'अत्र असुहृद्वाहिनीजीवनानि' पदस्याभिप्रायः—वर्षाकालिक पर्वतनदीनां जलानि यथा यमुनायाः धारां प्राप्य नश्यन्ति तथा शत्रुसेनायाः प्राणाः श्रीरामस्य खड्गधाराम् एत्य नश्यन्ति । एवं काव्यस्थ ६१, १३५ १५५, श्लोकेष्वपि यमुनाशोभावर्णनं विद्यते ।

यद्यपि काव्यस्य प्रायः सर्वेषु श्लोकेषु श्रीरामस्य, भूपतेः, राज्ञः सम्बोधनपदानि विद्यन्ते तथापि श्रीरामे एव सर्वेषां तात्पर्यं पर्यवस्यति । वर्णनप्रकारेणेदं सुस्पष्टं भवति यदयं महाकविः कस्यचिदाज्ञः सभापण्डितपदमलमकरोत् । श्रीरामस्य स्वरूप-शोभावर्णनपुरस्सरं तदीयास्त्रपदातिसैनिकाश्वगजयुद्धप्रयाणवर्णनम् तथा तस्य कीर्ति-प्रतापयोर्वर्णनं राजानुसारमस्ति ।

शब्दपारावारपारीणः पदप्रयोगकुशलः शास्त्रतत्त्ववेत्ता व्यवहारविद् बहुश्रुतो महाकविरासीदिति तदीयग्रन्थपर्यालोचनयैव ज्ञातुं शक्यते। अष्टादशशताब्द्याः कविवराः प्रायः शृङ्गारवीररसप्रधानं काव्यमकार्षुः। काव्यस्य विभाजनरूपा नवीना पद्धतिरनेनाङ्गीकृतेति स्पष्टमेव। काव्यनिर्मितिपुरस्सरं प्रतिभानवीनोन्मेषोऽपि महाकवेरभीष्ट आसीदित्यपि काव्यस्याध्ययनेन ज्ञायते। खण्डकाव्ये गीतकाव्ये वा वीररसप्राधान्यं प्रायो नैव दृश्यते। एतस्यां पद्धतौ **हिन्दीभाषाया भूषणकविना** सहास्य साम्यं कर्तुं शक्यते। टिप्पणीकारस्य श्री दुर्गाप्रसादस्य लेखानुसारमस्य पितुर्नाम **विश्वम्भरो गुरोश्च धरणीधर** आसीत्। तेनैव **यस्त्रिविक्रम**''' इति चतुर्थश्लोकस्य टिप्पण्यां 'त्रिविक्रम' इति पदस्यैवं व्याख्यानं विहितम्—**त्रिविक्रमनामा कविः—तिसृषु—संस्कृतप्राकृतभाषा(हिन्दी)सु विक्रमः—शक्तिर्यस्य सः, अथवा त्रिषु वेदेषु विक्रमः—शक्तिर्यस्य सः, त्रिवेदिवंशोत्पन्नत्वात् त्रिवेदिविश्वम्भरात्मसम्भवत्वाद् वेति।**' ग्रन्थान्ते 'अब्दे'''इत्यादि श्लोकेन **संवत् १७३१ भाद्रपदकृष्णपक्षीय तृतीयायां रविवासरे ग्रन्थस्य समाप्तिरभूदिति ज्ञातम्** भवति। **'श्रितशिवांघ्रिसरोजः**, (रामकीर्ति० ४) इति कथनात् साम्बशिवेऽस्य भक्तिर्विज्ञायते।

निजकीर्तिकुमुदमालानिर्मितिनिर्धूतपातकप्रकरे।
कारुण्यजलधिरधिकं मयि दाशरथिः प्रसन्नोऽस्तु ॥' (राम० २७१)

इत्युपान्त्यश्लोकेनास्य कवेरशिवनिवृत्तिपूर्वकभगवद्रामचन्द्रप्रसन्नतातिशयलाभरूपमुद्देश्यं स्फुटम् भवति।

अस्य महाकवेः सारस्वतमन्त्रस्य सिद्धिरासीदित्यपि पण्डितमण्डले प्रसिद्धमस्ति। अस्यैको भागिनेयो बलभद्रत्रिपाठिनाम्ना विख्यातोऽभूत्। स बाल्ये महामूर्खः आसीत्। कविवर्योऽसौ स्वभगिन्या प्रार्थितः सन् स्वभागिनेयमेकस्मिन् पिहितद्वारे कक्षे समुपवेश्य तं चार्गलितं विधाय तस्य चानुद्घाटनार्थं भगिनीमुक्त्वा स्वयं सारस्वतमन्त्रजपार्थं यमुनायास्तटमगच्छत्। गते च कस्मिंश्चित्काले स बालो बलभद्रः 'सिंहो मां प्रहरति' 'त्रायस्व मां तस्मात्' इत्यादि समालपन् द्वारोद्घाटनाय स्वमातरमसकृन्न्यवेदयत। बहुरोदनमाकर्ण्य दयावशवर्तिनी माता कक्षद्वारमुद्घाटितवती, किञ्चित्कालानन्तरं महाकविर्यमुनाकूलान्न्यवर्तत, तं स्वभागिनेयं दृष्ट्वा चाब्रवीत्—'भगिनि! शीघ्रतां कृत्वा त्वया जपस्य पूर्णः प्रभावो विघ्नितः। यद्यपि बालोऽयं महावैयाकरणो भविता साहित्ये चास्याप्रतिहता प्रतिभा विस्फुरिष्यति तथापि विदुषां सभायामस्य पाण्डित्यप्रकर्षो नैवाविर्भविष्यति। तदनुसारं महापण्डितो बलभद्रत्रिपाठी महावैयाकरणोऽभवत् अनेन लिखिताः 'बलभद्रीयंसारस्वतम्' 'काशिकासारः' 'व्याकरणरहस्यम्' ग्रन्थाः प्रसिद्धाः सन्ति। बहुकालं यावत् एतत्क्षेत्रीयपाठशालासु पाठ्यविषये समाविष्टाः आसन्।

Catalogus Catalogorum Part I इत्यस्मिन् ग्रन्थे एतल्लिखितं वर्तते—

रामकीर्तिमुकुन्दमाला Bhakti by Trivikram Oudh—IX Peters 3, 396 (Ram Kirti Kumudavali) D; by Hiranand Oudh IX, 18। अत्र 'मुकुन्द' इति पदम् कुमुदस्यैवाक्षरपरिवर्तनं प्रतीयते अतएव कोष्ठे रामकीर्तिकुमुदावलीति पदस्य सङ्गतिर्भवति। अवधपुस्तकालयस्य पाण्डुलिपयः साम्प्रतं नोपलभ्यन्ते येन तदेवेदं काव्यं तदितरद्वेति निर्धारणं भवेत्। एकडलाग्रामस्य तन्निकटवर्तिनां ग्रामाणाञ्च पण्डितैरिदं सूचितं यदस्य काव्यस्य तत्पूर्वजैः कृताः प्रतिलिपयस्तेषां गृहेष्वप्यासन्, परं पाण्डित्य-परम्पराया विच्छेदात्सुरक्षाया अभावेन नष्टास्ताः। टिप्पण्या सहितेयमेका प्रतिलिपिः सौभाग्यादवशिष्टा विद्यते, तत इयमेव सर्वथा विश्वासभूमिः।

महाकाव्यस्य टिप्पणीकारः

कविवरो महापण्डितः श्री दुर्गाप्रसादत्रिपाठी

अस्य काव्यस्य टिप्पणीकारः **श्रीमान् कविवरोदुर्गाप्रसादत्रिपाठी** पूर्वोक्तस्यैकडला-ग्रामस्य निवासी श्रीमत्कोदीरामस्यात्मजः विद्वत्प्रवरस्य छोटकमिश्रस्य शिष्यो महापण्डितः कुलपतिश्चासीत्। अनेन महाभागेन परःसहस्राश्छात्रा अध्यापिता आसन्निति साम्प्रतमपि पण्डितमण्डलीषु चर्चा भवति। अनेन कृताःव्याकरणेतिहासपुराणेषु टीका ज्योतिः-कर्मकाण्डविषयका ग्रन्थाश्चास्य वैदुष्यं प्रकटयन्ति। तेषां मध्ये काशिकासारटीका, शब्देन्दुशेखरटीका, बलभद्रीयसारस्वतटीका (व्याकरणग्रन्थाः) रसमञ्जरीटीका, रासपञ्चा-ध्यायीटीका (साहित्यग्रन्थौ) पुराणपरिमलः (पुराण ग्रन्थः) तथा जातकशेखरः (ज्यौतिष-ग्रन्थः) प्रतिष्ठाप्रदीपः संस्कारदर्पणः, दानचन्द्रिका (कर्मकाण्ड ग्रन्थाः) प्रकाशनमर्हन्ति, येनास्य महाभागस्य सारस्वतं वैभवं विद्वज्जनसमक्षमायास्यति। रामकीर्तिकुमुदमालायाष्टी-कैतत्काव्यरत्नं प्रकाशयन्ती तस्य गूढातिगूढं भावमभिव्यञ्जयति। एतदनुश्रूयते यदयं गुरुवरो यावज्जीवमध्ययनाध्यापनं कुर्वाणः स्वकीयं ब्राह्मणदेहमतिकृच्छ्राय तपसे प्रेत्यानन्तसुखाय च समनैषीत्।

अस्य स्थितिकालः एकोनविंशतितमायां शताब्द्यामासीदिति तत्तद्ग्रन्थान्ते रचना-समाप्तेः समयोल्लेखेन ज्ञायते। एतत्कृतटिप्पणीसंवलितस्य रामकीर्तिकुमुदमालाकाव्यस्य पाण्डुलिपिः १८७४ विक्रमाब्देऽभूदिति निम्नलिखितश्लोकेन ज्ञायते—

> वेदाश्वाष्ट महीभिरन्वितमितौ संवत्सरे वैक्रमे,
> मासे श्रावणिके दले च विशदे पञ्चेषुतिथ्यां कवेः।
> वारे रावणवैरिकीर्ति कुमुदस्रक्पुस्तकं सुन्दरं
> विशार्केक्षणपत्रकं विलिखितं दुर्गाप्रसादेन च॥

(अंकानां वामतो गतिरिति न्यायेन वेदाः = ४ अश्वाः = ७ अष्ट = ८ मही = १ संवत् १८७४ श्रावणे शुक्ले कामस्य तिथौ त्रयोदश्यां कवेर्वारे शुक्रवासरे श्री दुर्गाप्रसादेन विंशार्केक्षणपत्रकं विंशः = २० अर्काः = १२ ईक्षणे २ = ३४ पत्रेषु एतत् रामकीर्ति-

कुमुदमालाकाव्यम् सटिप्पणीकं विलिखितम् ।) तेनेदं ज्ञायते यत् पुस्तकस्य रचनाकालः १७३१ वैक्रमाब्दः ततः त्रयश्चत्वारिंशदधिकैकशताब्द्यन्तरमनेन स्वटिप्पणीसहितमिदं काव्यमलेखि । एतस्यामवधौ तस्य काव्यस्य प्रतिलिप्यनुलिपितया यत्र क्वचित् पाठान्तरमभूदिति तत्तत्स्थले योजितमस्ति । अनेन महापण्डितेनाङ्कलेखनप्रणाल्याऽस्यान्वयो विहितः, कठिनपदानां व्याख्यानं कोशाद्युपन्यासपुरस्सरं कृतं येनाहं काव्यतत्त्वस्यावबोधनाय समर्थोऽभूवं तदर्थं तदीयमुपकारं शिरसा वहामि ।

काव्यकलेवरम्

अस्मिन् खण्डकाव्ये चतुस्त्रिंशत्पत्रेषु द्विसप्तत्युत्तरशतद्वयसंख्याकाः श्लोकाः सन्ति । अस्य काव्यस्य रामकीर्तिकुमुदमाला, रामकीर्तिकुमुदस्रक् रावणारियशःकैरवस्रक् इति त्रीणि नामानि पर्यायरूपेण प्रयुक्तानि । अस्मिन् काव्ये भगवतो वर्णनं वन्दिमुखेन कविना कृतम् इति 'रघुपतिर्वन्दिवृन्दैर्ववन्दे' (राम० १२) समाप्तौ च 'लब्ध्वा ततोऽनन्तवर्ती विभूतिं स्वं मन्दिरं वन्दिगणः प्रतस्थे' इत्युल्लेखाज् ज्ञायते । ग्रन्थस्य विभाजनं वर्णनासु कृतम् । श्रीगणेशस्य वन्दनातो ग्रन्थस्यारम्भो जातः । विशेषविवरणमेवमस्ति—

अनुक्रमः	विषयाः	श्लोकाः	अनुक्रमः	विषयाः	श्लोकाः
१	मङ्गलाचरणं प्रस्तावना च	१३	१०	दानवर्णना	१७
२	सौन्दर्यवर्णना	२५	११	देवकुलादिवर्णना	८
३	खड्गवर्णना	२१	१२	तडागवर्णना	६
४	अश्ववर्णना	१५	१३	आरामवर्णना	३७
५	हस्तिवर्णना	१८	१४	यशोवर्णना	३३
६	पदातिवर्णना	७	१५	प्रतापवर्णना	२३
७	युद्धप्रयाणवर्णना	११	१६	यशःप्रतापवर्णना	१०
८	अरिविजयवर्णना	२३	१७	अन्त्याः श्लोकाः	३
९	शत्रोरकीर्तिवर्णना	२			
				योगः	२७२

उपर्युक्तविवेचनेनेदं स्पष्टं भवति यत् प्रतिवर्णनं श्लोकसंख्या नियता नास्ति । खण्डकाव्यपरम्परयाम् एतादृग् विभाजनम् अदृष्टपूर्वमेवास्ते । कामपि प्राचीनाम् पद्धतिमनवलम्ब्य महाकविरयं सर्वथा नवीनां परिपाटीं कल्पितवान् इति मन्ये ।

रामकीर्तिकुमुदमालाकाव्यम्

इदं भक्तिरसाप्लुतं खण्डकाव्यमस्ति । श्री रामस्य स्तुतिरेव कविना प्रथमं प्रतिज्ञाता । तत्रानुप्रासच्छटाऽपि विलोकनीया सुधीभिः—

रुचिजितरतिजानिः प्रत्यनीकक्षितीश-
क्षपणनिपुणपाणिर्निःस्वविश्राणितश्रीः ।
सुमतिभिरतिवेलं सान्यराजन्यहेलं
शमितभुवनतन्द्रः स्तूयते रामचन्द्रः ॥ (राम० ५)

एवमेकस्मिन् श्लोके श्रीरामभद्रस्तुतिर्व्यञ्जनया कृताऽस्ति। श्रीरामेण पराजितो निर्वासितश्च प्रियतमया सह वनमधिवसन् कश्चिच्छत्रुस्तत्र स्वादूनि फलानि भक्षयति प्रशंसति च—

मृदूनि स्वादूनि प्रकृतिसुरभीणि प्रियतमे !
न शक्यन्ते स्तोतुं तरुवरफलान्यत्र विपिने ।

तदा प्रियतमा स्वप्रेयांसं कथयति यद्रामचन्द्रस्य विरोधेनैव विपिनं समागत्ये-मानि स्वादूनि फलानि लब्धानि, अतस्तद्विरोधद्रुमफलमेव सर्वथा स्तुत्यम्—

स्तुहि स्वामिन्नेकं रघुपतिविरोधद्रुमफलम् ।
यतः प्राप्यन्तेऽमूः फलशतसमास्वादनमुदः ॥ (राम० १२९)

भगवतो रामभद्रस्य यशसोवर्णनं कियत्सुन्दरमस्ति—

मुक्तासाराः शरदि जलदाः स्वर्धुनीवारिधाराः,
जम्भारातिद्विरददशनाः क्षीरसिन्धूर्मिवाराः ।
हारास्तारारमणकिरणाः काशकुन्दाब्जकन्दाः
मन्दायन्ते यशसि भवतः श्वेतमाने जगत्याम् (राम० २२०)

एतत्काव्यरचनायाः उद्देश्यमपि पूर्वोक्तं श्रीरामचन्द्रप्रसादातिरेकप्राप्तिरूपमेवास्ति । तथापि स्वकीयवैदुष्येन काव्यशास्त्राध्ययनेन चैतदीये काव्ये ध्वनेः, रसाभिव्यक्तेः, प्रसादा-दिगुणत्रयस्य, अलङ्कारलावण्यस्य चोदाहरणानि रत्नभूतानि सहृदयवरैः मृग्यमाणानि सन्त्येव ।

प्रायः सम्पूर्णं काव्यं प्रसादमाधुर्यगुणोपेतमस्ति ओजोभूयस्त्वमपि तत्र तत्र वीर-रसाभिव्यक्तौ दृश्यते। इदं तु निश्चितमेव यदयं महाकविः कलितकोमलकान्तपदावली-विधायकः शिल्पिवरः आसीत् । तस्य शब्दशिल्पस्योदाहरणानि सर्वाण्येव पद्यानि सन्ति । पदविन्यासस्यैकमुदाहरणं दीयतेऽत्र—

पीयूषाक्षेपदक्षा नवपरिणतया द्राक्षया बद्धकक्षा-
स्ते काण्डैः पुण्ड्रकाणां कथमपि कलितं नोपमानं सहन्ते ।
राम क्ष्मापालचक्रार्चितचरणगुणैरङ्किता ये त्वदीयै-
रन्ये मन्युत्रुताहीश्वरविषविरसा वाग्विलासाः कवीनाम् ॥ (राम० १३)

एवमनुप्राससमन्वितेऽस्मिन् श्लोकेऽतिशयोक्तिच्छटा सैनिकशौर्येण सह विलोकनीया—

शूलशरासनतोमरशक्तिकृपाणकरे
पत्तिगणे तव धावति वीर ! पुरः समरे ।
तुङ्गतुरङ्गशतांगमतंगजराजघटां
वैरिभटाः परिहृत्य विशंति झटित्यटवीम् ॥ (राम० ९७)

तथैवास्मिन् श्लोके सरसः सुषमया सह यमकालंकारशोभा दर्शनीयतमा विद्यते—

मरालोयमायाति यत्तीरभूमी—
मरालो यदम्बुप्रवाहोर्मिपुञ्जः ।
सरोलम्बशैवालवल्लीवृतं तत्
सरो लम्बपद्मं तवोल्लालसीति ॥ (राम० १६६)

प्रसादमाधुर्यगुणोपेतः श्रीरामकृतदानवर्णनपरोऽयं श्लोकः कीदृशं भक्तिभावं व्यनक्ति—

वर्द्धन्तां मेरुपृष्ठे विबुधविटपिनः कामधेनुः स्वयं त—
च्छाये विश्रम्य रोमन्थयतु नतिरियं दूरतो देवताभ्यः ।
यत्रास्ते तत्र चिन्तामणिरपनयतु ध्वान्तमुस्रैरजस्रं
नान्यं विद्मो वदान्यं जगति वयमहो मार्गणा रावणारेः । (राम०१४८)

श्रीरामस्यारामवर्णनप्रसंगे कविवरः तस्याभिरामतया हृतचेतसाम् अमररमणीनां मनसि स्वरमणैः सह रमणायोत्कण्ठां समुत्पादितवान् तथा चाभिरामोऽसौ रामारामोऽमरमिथुनविनोददायकोऽभवत् । तदानीं तन्मुखेन कविः स्वकीयं नर्मभावमपि प्रादर्शयत् । तेषु द्वाविमौ श्लोकावुदाह्रियेतेऽत्र—

स्वप्रेयांसं सङ्केतस्थलं गमयितुकामायाः कस्याश्चित्कामतप्तायाः कियद्भाववतीयमुक्तिः वर्तते—

गुञ्जति भ्रमरावली परिपीतचूतमधुद्रवा,
मन्दमेति समीरणः सहकारसौरभनिर्भरः ।
इत्युदीरितवाचि काचिदुदञ्चितस्मरमानसे
वल्लभे बहुलच्छदं कदलीनिकुञ्जमवेक्षते ॥ (राम० १८४)

एकस्याः प्रियाया अन्यां स्वप्रेयसीं निह्नुवानस्य कस्यचिच्छठप्रियतमस्योक्तिः सर्वथा प्रीतिपरिप्लुता वर्तते—

तल्पे चाम्पेयपुष्पप्रकरविरचिते कान्त ! केयं ? न काचित्,
पादौ पश्यामि तस्याः, किशलययुगलं न्यस्तमेतद्द्रुमस्य ।

हस्तौ, रक्तारविन्दद्वयमिह निहितं वेणिरेषा न भृङ्ग-
श्रेणिः स्वर्णप्रभामित्यपलपति शठः प्रेयसीमन्यवध्वाः ॥ (राम० १८५)

काव्यतत्त्वविचारः

महाकविस्त्रिविक्रमोऽसाधारणप्रतिभासम्पन्नः कविरासीदित्यत्र न प्रमाणमपेक्ष्यते। अयम् आद्यकवेर्महर्षेः सुवर्णघटनायाः सम्मानमकरोत् (राम० २२५), पूर्वेषां महाकवीनां कालिदासभारविमाघश्रीहर्षाणां काव्यान्यनेन सम्यगधीतानीति तत्र तत्र पदरचनायाः भावाभिव्यक्तेश्चाकलनेन ज्ञायते। (राम० १३१) श्लोके भारवेः, (राम० १३५) श्लोके माघस्य कवेः महाकाव्ययोः प्रभावः स्फुटोऽस्ति। 'परभाग' पदस्य प्रयोगबाहुल्येन कालिदासम् प्रत्यस्यानुरागः सम्मानश्च सुव्यक्तौ भवतः। आरामवर्णनाखण्डे वृक्षाणां गणनाऽस्य वनस्पतिशास्त्रज्ञानं यशोवर्णनाखण्डे च धवलानामखिलपदार्थानामुल्लेखोऽस्य बहुज्ञतां प्रकाशयति।

महाकवेर्व्याकरणज्ञानविषयकं प्रमाणमेकमेव दीयते नामधातुप्रयोगचातुर्यप्रदर्शकम्—

कति तव सुमनःसंगात्कबरीभारः प्रियेऽति नीलत्वात्।
भवति च कलापवत्त्वान्निर्जरसेव्यः कथं नो चेत्॥ (राम० १८७)

अस्मिन् श्लोके कति, अति तथा भवति पदानि नामधातुरूपाणि कः (ब्रह्मा) अः (विष्णुः) तथा भवः (शिवः) इवाचरतीत्यर्थकानि सन्ति। तथैव (राम० ६८) श्लोकः कविवरस्य न्यायशास्त्रज्ञानं प्रथयति।

महाकविः सामन्तयुगे भारतभुवमलङ्कृतवान् तथा चास्य वर्णनपद्धतौ तत्कालविशेषस्य सामाजिकगुणानां प्रभावोऽस्तीति काव्यस्याध्ययनेन ज्ञायते। श्रीरामस्योदात्तचरितवर्णनमेव कवेर्मन्तव्यमासीत् इति हेतोस्तस्याङ्गशोभावर्णनान्तरं शौर्यं वर्णितवान् तत्पश्चात् तत्कृतं दानं तन्निर्मितानां देवमन्दिरतडागसरोवराणां सौन्दर्यं चाकलितवान्। अन्ते च कीर्तिं प्रतापं च वर्णयित्वा तदीयां सर्वोत्कृष्टताम् अस्थापयत्। एतत्सर्वम् उत्तरकालिकं श्रीरामचरितं कथयितुं शक्यते।

महाकवेः शैली 'चारणशैली' प्रतिभाति। प्रारम्भे उद्दामश्रीरिति रघुपतिर्वन्दिवृन्दैर्ववन्दे (राम० १२) मध्ये तुष्टाव वन्दिपरिषत्पुनरेव रामम् (राम० २०७) तथा समाप्तौ लब्ध्वा ततोऽनन्तवर्ती विभूतिं स्वं मन्दिरं वन्दिगणः प्रतस्थे (राम० २७०) इति कथनात् सैव प्रतिपाद्यते कविना।

अस्मिन् काव्येऽनेकानि प्रचलितान्यप्रचलितानि च छन्दांसि प्रयुक्तानि। प्रचलितेषु, गीतिः आर्या अनुष्टुप् इन्द्रवज्रा उपजातयः वसन्ततिलका रथोद्धता मन्दाक्रान्ता पृथ्वी

शिखरिणी हरिणी शार्दूलविक्रीडतम् स्रग्धरा प्रभृतयः सन्ति। अप्रचलितेषु च मालभारिणी निशिपालः स्रग्विणी पंचचामरम् चर्चरीत्यादीनि प्रयुक्तानि।

एवम् अस्मिन् काव्ये प्रायः प्रसिद्धाः सर्वेऽलङ्काराः काव्यशोभां वर्धयन्ति। तेषां मध्ये अनुप्रासस्तु सर्वाधिकरूपेण प्रयुक्तः। यमकश्लेषावपि यथावसरं सुषमावर्द्धकावभूताम्। अर्थालङ्कारेषु उपमा उत्प्रेक्षा रूपकम् अपह्नुतिः, सन्देहः भ्रान्तिमान् उदात्तम् काव्य-लिङ्गम् विशेषतयोल्लेखमर्हन्ति।

एवं नवीनपद्धतौ विरचितं काव्यगुणौघेन संयुतमिदं रासकीर्तिकुमुदमालाभिधानं काव्यं विदुषां हृदयहारायमाणं भविष्यतीति विश्वसिमि।

विदुषां वशंवदः
चन्द्रभानु त्रिपाठी

कृतज्ञताज्ञापनम्

महामान्यैः उत्तरप्रदेशीयराज्यपालमहोदयैः संस्कृतसाहित्यस्यामूल्यरत्नभूतस्य 'रामकीर्तिकुमुदमाला' काव्यस्य प्रकाशनाय सार्धैकसहस्ररूप्यकाणामनुदानं स्वीकृत्य मम-भृशमुपकृतमिति तेषामाभारं स्वीकुर्वे। उत्तरप्रदेश—सचिवालयस्य २५३१/१५-१२-७८-४२ (२५) ७७ अङ्कैरङ्कितेन अगस्त १७-१९७८ पत्रेणोक्तादेशः प्राप्तः। तदर्थं शिक्षासचिवप्रमुखेभ्यः सर्वेभ्यः शिक्षाधिकारिभ्यः स्वां कृतज्ञतां निवेदये।

काव्यस्यैतस्य प्रकाशनकर्मणि येषामनुग्रहः, निर्देशः, सहयोगश्च प्राप्तस्तेषु पं० बालकरामत्रिपाठी, डा० रामलखनशर्मा, डा० आद्याप्रसादमिश्रः, डा० गयाचरणत्रिपाठी, आचार्य मानस शास्त्री, पं० सुबोधचन्द्रपन्तः, आचार्य मानिक चन्द्र मिश्रः, डा० जगन्नाथ-पाठकः, डा० विद्याधरधर्माधिकारी, पं० उमाशंकरमिश्रश्च नामोल्लेखपूर्वकं यथायोग्यं सम्माननीयाः सभाजनीयाः श्लाघनीयाश्च सन्तीति शम्।

त्रुटिमात्रं स्वं दूषणं स्वीकुर्वाणोऽस्मि।

मार्गशीर्ष १५ गुरुवार संवत् २०३५ — **चन्द्रभानुत्रिपाठी**
(१४ दिसम्बर १९७८)

रामकीर्तिकुमुदमाला

अनुक्रमणिका

क्रमाङ्कः वर्णना	श्लोकाः	पृष्ठांकः
१—प्रस्तावना	१-१३	१
२—अङ्गशोभावर्णना	१४-३८	१०
३—अस्त्रशोभावर्णना	३९-५९	२८
४—अश्ववर्णना	६०-७४	४३
५—हस्तिवर्णना	७५-९२	५४
६—पत्तिवर्णना	९३-९९	६६
७—प्रयाणवर्णना	१००-११०	७१
८—अरिविजयवर्णना	१११-१३३	७९
९—शत्रोरकीर्तिवर्णना	१३४-१३५	९६
१०—दानवर्णना	१३६-१५२	९७
११—देवकुलादिवर्णना	१५३-१६०	१०९
१२—तडागादिवर्णना	१६१-१६६	११५
१३—आरामवर्णना	१६७-२०३	११९
१४—यशोवर्णना	२०४-२३६	१४४
१५—प्रतापवर्णना	२३७-२५९	१६६
१६—कीर्तिप्रतापवर्णना	२६०-२६९	१८१
१७—सम्पूर्तिः	२७०-२७२	१८८

२६॥


सं १७३१
पार्वत्याः १
न्तोऽस्तु २५ ग्रन्थेनतत्रनाथेप्रवरनयनघनोद्भासितेमासिमाद्रेपक्षेकृष्णेतिथावप्यगणति
द्विद्वितुर्वासरेभास्करस्य त्रैविक्रम्याङ्गिरैषासहजविमलयाज्योत्स्नयैवोल्लसंतीसंपूर्णास्त
हारैःसुरभिसहृदयाःकैरवस्रक्प्रमुदेस्तु २६ इतिश्रीविश्वंभरात्मसंभवश्रीगुरुधरणी
धरचरणासाधनसावधानत्रिविक्रमकृतारामकीर्तिकुमुदमालासंपूर्णम् श्रीरस्तु
वेदाश्वाब्धमहीभिरन्वितमितो संवत्सरेवैक्रमेमासेश्चाश्विनिकेदलेचविशदेपंचेषु
तिथ्यांकवेः॥वारेणवराणावैरिकीर्तिकुमुदस्रक्पुस्तकंसुंदरं लिंभार्केंदुलापत्र
कंविलिखितंदुर्गाप्रसादेनच॥१॥त्रिपाठिनानैकडलाभिवासिनाशिवप्रिया भक्ति
रतेनछात्रकैः॥स्वकीयवंशांबु ज्ञात्मनोऽग्निहोत्रिणोविहरदत्तकस्य
शिष्यार्थि १

[एकडलाग्रामस्थश्रीदुर्गाप्रसादहस्तलिखितग्रन्थागारीयरामकीर्ति-
कुमुदमालापुस्तकस्यान्तिमपृष्ठस्य प्रतिच्छविः]

रामकीर्तिकुमुदमाला

[रामकीर्तिकुसुदस्रक्]

अथ महाकविस्त्रिविक्रमोऽज्ञानान्धकार-निरासपूर्वक-विशदज्ञान-प्रकाशनाय श्री गणेशस्य दन्तकान्तेर्जयं कामयते—

घनदानजलार्द्रगण्डभित्ति-
श्रितपुष्पन्धयकैतवान्धकारम् ।
अपनेतुमिवोद्गतार्चिरिन्दो-
र्दशनश्रीर्जयति द्विपाननस्य ॥१॥

दुर्गाप्रसादनामाऽहं त्रिपाठी जगदम्बिकाम् ।
नत्वा कुर्वे रामकीर्तिकैरवस्रजि टिप्पणीम् ॥
नत्वा गुरून् पितॄन् दुर्गां बालबोधाय सा पुनः ।
माधुरीविशदा क्रियते **चन्द्रभानुत्रिपाठिना** ॥

माधुरी—अथ तत्रभवान् त्रिविक्रमनामकः कवी रामकीर्तिकुमुदमालाकाव्यं चिकीर्षुरादौ निर्विघ्नपरिसमाप्तये श्रीगणेशवन्दनां कुरुते-घनेति । **घनदानजलार्द्रगण्डभित्ति-श्रितपुष्पन्धयकैतवान्धकारम् घनम्** निरन्तरम् यत् **दानजलम्** मदवारि तेन **आर्द्रा** सरसा या **गण्डभित्तिः** कपोलप्रदेशः ताम् आश्रिताः ये **पुष्पन्धयाः** मधुकराः तेषाम् **कैतवेन** छलेन योऽन्धकारः तमः तम् **अपनेतुम्** दूरीकर्तुम् **इन्दोः** चन्द्रमसः **उद्गतार्चिः** उन्नत-किरणप्रभा इव **द्विपाननस्य** गणेशस्य **दशनश्रीः** दन्तकान्तिः **जयति** सर्वोत्कृष्टा वर्तते ।

हिन्दी अनुवाद—निरन्तर बहते हुये मदजल से गीले कपोल प्रदेश में स्थित भ्रमरों द्वारा किये गये अन्धकार को मानों दूर करने के लिये चन्द्रमा की प्रस्फुटित किरणप्रभा हो ऐसी, श्री गणेशजी के दाँत की शोभा की जय हो ।

टिप्पणी—**घनम्**—घनं निरन्तरं सान्द्रम् इत्यमरः । **दानम्**—दानं हस्तिमदे दत्तोच्छेदरक्षणबुद्धिष्विति धरणिः । **गण्डः**—गण्डो व्यालकपोले स्यादश्वभूषणबुद्बुदे इति

हैमः । पुष्पन्धयः—पुष्पाणि धयति इति पुष्प√धे+खश् मुमागमः अर्चिः—ज्वाला भासोर्न पुंस्यर्चिरित्यमरः । मालभारिणी छन्दः, अनुप्रासः, उत्प्रेक्षाऽलङ्कारश्च ।

स्वापराधविनाशाय महाकविः पार्वत्याश्चरणसरोजं वन्दते—

अङ्घ्रिरघमेष मम हन्तु हिमवद्भुवो
यत्सहजमञ्जिमविनिर्जितदलद्युति ।
कोकनदमानयति हंसवलयच्छला-
दात्मदहनाय हिमपिण्डपटलीमिव ॥२॥

माधुरी—हिमवद्भुवः पार्वत्याः एषः अयम् अङ्घ्रिः चरणः मम अघम् पापम् हन्तु नाशयतु । **यत्सहजमञ्जिमविनिर्जितदलद्युति** यस्य सहजेन स्वाभाविकेन **मञ्जिम्ना** सौन्दर्येण **विनिर्जिता** पराजिता **दलानाम्** कोमलपत्राणाम् **द्युतिः** कान्तिः यस्य तत् (बहु०) **कोकनदम्** रक्तकमलम् **हंसवलयच्छलात्** हंसानां वलयम् तस्य छलात् व्याजात् **आत्मदहनाय** स्वविनाशाय **हिमपिण्डपटलीम्** हिमस्य घनराशिम् इव आनयति ।

हिन्दी अनुवाद—पार्वती का वह चरण मेरे पाप का विनाश करे, जिसके स्वाभाविक सौन्दर्य से जिसके पत्रों (पंखुड़ियों) की कान्ति पराजित हो गई है, ऐसा रक्त कमल [दुःखी होकर] हंसों के मण्डल के ब्याज (बहाने) से मानो आत्मदाह करने के लिये हिम का ढेर लाता है । (बर्फ में कमल का जलना प्रत्यक्ष सिद्ध है ।)

टिप्पणी—**मञ्जिम**—मञ्जु+इमनिच् । **दलम्**—पत्रं पलाशं छदनं दलं पर्णं छदः पुमानित्यमरः । **कोकनदम्**—रक्तोत्पलं कोकनदमित्यमरः । निशिपालच्छन्दः उत्प्रेक्षालङ्कार,ः ।

महाकवि भगवतो विष्णोः पाञ्चजन्यशंखस्य विजयध्वनिं स्तौति—

हर्यक्षो हैमवत्याः किमिति दश दिशः प्रेक्षते क्षीणदर्पः
त्रासादाच्छिद्य दाम भ्रमति गिरिपतौ गोपतिः शूलपाणेः ।
जम्भारेर्भाति चित्रार्पित इव तुरगो मन्दुराभित्तिलग्नः
तारं यत्राहवेषु ध्वनति जयति स श्रीपतेः पाञ्चजन्यः ॥३॥

माधुरी—श्रीपतेः विष्णोः सः प्रसिद्धः पाञ्चजन्यः तन्नामकः शंखः आहवेषु युद्धेषु यत्र यस्मिन् स्थले तारं ध्वनति उच्चैः शब्दं करोति, (तदा) हैमवत्याः पार्वत्याः हर्यक्षः सिंहः त्रासात् भयात् क्षीणदर्पः गर्वरहितः (सन्) किमिति किम् भवति, इति दश

दिशः सर्वतः **प्रेक्षते** पश्यति। **शूलपाणेः** शिवस्य **गोपतिः** वृषभः **दाम** बन्धनरज्जुम् **आच्छिद्य** त्रोटयित्वा **गिरिपतौ** हिमालये भ्रमति। **जम्भारेः** इन्द्रस्य **मन्दुराभित्तिलग्नः** वाजिशालायाः भित्तौ संश्लिष्टः **तुरगः** अश्वः **चित्रार्पितः** उल्लिखितः इव **भाति** शोभते।

हिन्दी अनुवाद—भगवान् विष्णु का प्रसिद्ध पाञ्चजन्य नामक शंख युद्धों में जिस स्थल पर बजता है [तब] पार्वती का सिंह भय से गर्वरहित होकर, क्या हो रहा है? [यह सोचकर] सब ओर देखने लगता है। शिवजी का बैल रस्सी तुड़ाकर हिमालय में भटक जाता है [तथा] इन्द्र का [उच्चैः श्रवाः] घोड़ा वाजिशाला की दीवाल में सटा हुआ चित्रित जैसा प्रतीत होने लगता है।

टिप्पणी—**हर्यक्षः**—हर्यक्षः केशरी हरि रित्यमरः, हर्यक्षो नरवरायुधो मृगरिपुः सिंहश्च कण्ठीरवः इत्यभिधानरत्नमालायाम्। **हैमवत्याः**—हिमवतोऽपत्यं स्त्री हैमवती, हिमवत् + अण् + ङीप्। **दाम**—नपुंसि दामः सन्दानं पशुरज्जुस्तु दामनीत्यमरः **मन्दुरा**—मन्दुरा वाजिशाला स्यादित्यमरः। **तारम्**—तारोऽत्युच्चैस्त्रयस्त्रिष्वित्यमरः, तारं च रजतेऽत्युच्चस्वरे इति विश्वः। **स्रग्धरा छन्दः, उपमालङ्कारः स्वभावोक्तिश्च।**

शिवभक्तो महाकविः स्वनामोल्लेखपूर्वं जनतायाः प्रमोदाय काव्यरचनायाः सङ्कल्पं करोति—

यस्त्रिविक्रम इति क्षितिचक्रे
विश्रुतः श्रितशिवाङ्घ्रिसरोजः।
रामकीर्तिकुमुदस्रजमेता
मातनोति स मुदे जनतायाः ॥४॥

माधुरी—यः क्षितिचक्रे पृथिवीमण्डले **श्रितशिवाङ्घ्रिसरोजः** उमामहेश्वरचरणकमलाराधकः **त्रिविक्रमः** त्रिविक्रमनामा **विश्रुतः** प्रसिद्धः, सः कविः **जनतायाः मुदे** आनन्दाय एताम् **रामकीर्तिकुमुदस्रजम्** तन्नामकम् **काव्यम् आतनोति** रचयति।

हिन्दी अनुवाद—जो पार्वती तथा शङ्कर के चरण कमलों के आश्रित (होकर) पृथ्वी मण्डल में त्रिविक्रम नाम से प्रसिद्ध हैं, वे जनता के आनन्द के लिये इस (अपनी बुद्धि में स्थित) रामकीर्तिकुमुदमाला काव्य की रचना कर रहे हैं।

टिप्पणी—**श्रितशिवाङ्घ्रिसरोजः**—शिवा च शिवश्चेति शिवौ तयोः अङ्घ्रयः—चरणाः ते एव सरोजानि, श्रितानि शिवाङ्घ्रिसरोजानि येन सः (बहु०) **त्रिविक्रमः**—तिसृषु—संस्कृतप्राकृत भाषा (हिन्दी) सु क्रमः—शक्तिर्यस्य सः, अथवा त्रिषु वेदेषु क्रमः—शक्तिर्यस्य सः, त्रिवेदिवंशोत्पन्नत्वात्, त्रिवेदिविश्वम्भरात्मसम्भवत्वाद्वा, अथवा त्रिषु कालेषु विक्रमो ज्ञानं यस्य सः। **रामकीर्तिकुमुदस्रजम्**—रामस्य कीर्तयः एव

कुमुदानि—रात्रौ सरोवरेषु विकासशीलानि पुष्पाणि रजतानि वा तेषां स्रक्-माला ताम् । स्वागता छन्दः, रूपकालङ्कारः ।

महाकविः स्वकाव्यस्य श्रीरामचन्द्रस्तुतिरूपं वर्ण्यवस्तु निर्दिशति—

रुचिजितरतिजानिः प्रत्यनीकक्षितीश-
क्षपणनिपुणपाणिर्निःस्वविश्राणितश्रीः ।
सुमतिभिरतिवेलं सान्यराजन्यहेलम्
शमितभुवनतन्द्रः स्तूयते रामचन्द्रः ॥५॥

माधुरी—रुचिजितरतिजानिः सौन्दर्येण कामस्यविजेता **प्रत्यनीकक्षितीशक्षपण-निपुणपाणिः** शत्रुभूतराज्ञां नाशायद क्षकरः **निःस्वविश्राणितश्रीः** निर्धनेभ्यो धनप्रदाता **शमितभुवनतन्द्रः** लोकस्यक्लान्तिप्रशामकः **रामचन्द्रः** श्रीरामः **सुमतिभिः** विद्वद्भिः **अतिवेलम्** अत्यधिकम् **सान्यराजन्यहेलम्** अन्यराज्ञामनादरेण साकम् स्तूयते प्रशस्यते ।

हिन्दी अनुवाद--सौन्दर्य के द्वारा जिन्होंने कामदेव को जीत लिया है, जिनका हाथ शत्रुभूतराजाओं के नाश में निपुण है, जिन्होंने अपनी सम्पत्ति को निर्धनों को वितरित कर दिया है तथा जिनके द्वारा समस्त विश्व की क्लान्ति दूर कर दी गई है, ऐसे भगवान् श्रीराम की स्तुति विद्वान् कवियों के द्वारा दूसरे राजाओं के अनादर पूर्वक की जाती है । (अतः मैं भी उनकी स्तुति करता हूँ यह ध्वनि है ।)

टिप्पणी—रतिजानिः—रतिः जाया यस्य सः (बहु०) 'जायायाः निङ्' (अष्टा० ५/४/१३४) सूत्रेण आकारस्य निङ् (नि) आदेशः 'लोपो व्योर्वलि' (अष्टा ६/१ ६६) सूत्रेण यलोपः **प्रत्यनीकः—**प्रत्यनीको द्विषन्मतः इत्यभिधानरत्नमालायाम् । **निःस्वः—** निःस्वस्तु दुर्विधो दीनो दरिद्रो दुर्गतोऽपि सः इत्यमरः **विश्राणिता—**दत्ता **सान्यराजन्यहेलम्—** मूर्धाभिषक्तो राजन्यः इत्यमरः । हेला—अनादरः अन्येषां राजन्यानां हेलया सहितं यथा स्यात्तथा । मालिनीच्छन्दः, वृत्यनुप्रासः ।

महाकवि भगवतो रामस्य जयघोषपूर्वक कविभिस्तत्कीर्तिवर्णनस्य हेतु कथयति—

जयति नृपतिचूडापद्मरागांशुसंग-
द्विगुणचरणपद्मारुण्यसम्पत्कृपाब्धिः ।
रघुपतिरनिशं यत्कीर्तिमल्लीविकाशाद्
विदधति कविभृङ्गाः काव्यझङ्कारमुच्चैः ॥६॥

माधुरी—नृपतिचूडापद्मरागांशुसंगद्विगुणचरणपद्मारुण्यसम्पत् नृपतीनां [पादा-

वनत] राज्ञां चूडायाम् मस्तकालङ्कारभूते लग्नस्य पद्मरागस्यांशूनाम् किरणानां संगेन द्विगुणा चरणपद्मस्यारुण्यम् रक्तवर्णस्तस्य सम्पत् यस्य सः (बहु०) **कृपाब्धिः** परमदयालुः सः **रघुपतिः** रामचन्द्रः **अनिशं** निरन्तरम् जयति । **यत्कीर्तिमल्लीविकाशात्** यस्य कीर्तिरेव मल्ली मल्लिका, तस्याः विकाशात् विकाशं दृष्ट्वा **कविभृङ्गाः** कविरूपिणो मधुकराः उच्चैः **काव्यझङ्कारम्** काव्यमेव गुञ्जनम् **विदधति** कुर्वन्ति ।

हिन्दी अनुवाद—[चरणों में प्रणत] राजाओं के मस्तकों के आभूषणों में जटित पद्मराग (लाल मणि मानिक) की किरणों के सम्पर्क से जिनके चरणकमलों की लालिमा की सुन्दरता दुगुनी हो गई है, ऐसे परम दयालु भगवान् राम की निरन्तर जय हो। जिनकी कीर्तिरूपिणी मल्लिका (बेला) के विकाश को देखकर कविरूपी मधुकर उच्च स्वर से काव्य रूपी गुंजन करते हैं।

टिप्पणी—विकाशात्—विकाशं दृष्ट्वा 'ल्यब्लोपे कर्मणि पञ्चमी' **मालिनीच्छन्दः**, वृत्त्यनुप्रासः रूपकालङ्कारः, काव्यलिङ्गञ्च ।

नववारिदाभिरामस्य रामस्याह्लादकशक्तिं वर्णयति महाकविः—

यं रावणारण्यहिरण्यरेताः
विभ्राजमानोज्ज्वलहेतिभीमः ।
सद्यः समासाद्य शशाम राम-
श्यामाम्बुवाहः स मुदे न कस्य ॥७॥

माधुरी—विभ्राजमानोज्ज्वलहेतिभीमः (अग्निपक्षे) विभ्राजमाना दीप्तिमती उज्ज्वला समिद्धा या हेतिः ज्वाला तयाभीमः भयानकः (रावणपक्षे) हेतिः आयुधविशेषः शेषं पूर्ववत् **रावणारण्यहिरण्यरेताः** रावणरूपो दवाग्निः **यम्** [मेघरूपं] श्रीरामम् **समासाद्य** प्राप्य **सद्यः** तत्क्षणमेव **शशाम** शान्तोऽभवत् **सः रामश्यामाम्बुवाहः** रामः एव श्याममेघः कस्य **मुदे** हर्षाय न (भवति) सर्वस्यैव मोदकर इतिभावः ।

हिन्दी अनुवाद—प्रदीप्त चमकदार आयुधों से भयानक रावणरूपी [प्रदीप्त उज्ज्वल ज्वाला के कारण भयानक] दवाग्नि जिसे पाकर अतिशीघ्र शान्त हो गई, वह रामरूपी श्याम घन किसको प्रमुदित नहीं करता है। (श्रीराम सभी के आनन्ददायक हैं।)

टिप्पणी—उज्ज्वलः उज्ज्वलस्तूल्बणो शृङ्गारे विशदे दीप्तेऽपीति हैमः। हेतिः—हेतिः सूर्यस्य वह्नेश्च भासि हेतिस्तथायुधे इति धरणिः, हिरण्यरेताः—हिरण्यरेतास्तमोघ्नो रोहिताश्वो हुताशनः इति हलायुधः । **इन्द्रवज्राच्छन्दः**, वृत्त्यनुप्रासो रूपकालङ्कारः श्लेषश्च, ।

महाकविः श्रीरामराज्ये सर्वेषां विप्राणां सम्पन्नतां भगवतश्च प्रजाप्रणयं दर्शयति—

अथ युग्मम्

किमिति हनुमान् मेरोरुन्मीलनाय नियुज्यते
कनकनिचयः सद्मान्तर्नः सुराद्रिसहस्रवत् ।
त्वयि वसुमतीनाथे राम ! प्रभूतविभूतयः
क्षितिसुरगणाः कस्मै देयं न केचन मार्गणाः ॥८॥
इति परिजनस्योक्तिं रम्यां निशम्य रघूद्वहो
जलदरसिताबद्धस्पर्धां जगाद मुदा गिरम् ।
क्षितिसुमनसां तुष्टिर्नैसर्गिकीति किमुच्यते
परिषदि स कस्तेषां यः स्यादसप्रणयो मयि ॥९॥

माधुरी—हे राम ! (भवता) **मेरोः** सुमेरुपर्वतस्य **उन्मूलनाय** उत्पाटनाय हनुमान् **नियुज्यते** आदिश्यते **इति किम्** किं प्रयोजनमित्यर्थः **नः** अस्माकं **सद्मान्तः** गृहाभ्यन्तरे **सुराद्रिसहस्रवत्** सहस्रसुमेरुसमः **कनकनिचयः** स्वर्णसमूहः (स्यात्) त्वयि **वसुमतीनाथे** पृथ्वीपाले [सति, सर्वे] **क्षितिसुरगणाः** भूसुराः (ब्राह्मणाः) **प्रभूतविभूतयः** बहुधनयुताः भवन्ति [तत् सुवर्णम्] कस्मै देयम् केचन **मार्गणाः** याचकाः (न सन्ति) ।

रघूद्वहः रामचन्द्रः **परिजनस्य** भृत्यवर्गस्य **इति** ईदृशीम् **रम्याम्** मनोहारिणीम् **उक्तिम्** कथनम् **निशम्य** श्रुत्वा मुदा हर्षेण **जलदरसिताबद्धस्पर्धाम्** मेघगर्जनसदृशीम् **गिरम्** वाणीम् **जगाद** अकथयत् । **इति** एवम् **किम्** किमर्थम् **उच्यते** कथ्यते (युष्माभिरितिशेषः) **क्षितिसुमनसाम्** विप्राणाम् **तुष्टिः** सन्तोषः (प्रसन्नता) **नैसर्गिकी** स्वाभाविकी (भवति) **परिषदि** सभायाम् **तेषाम्** विप्राणांमध्ये **कः**, **यः** मयि **असप्रणयः** प्रीतिरहितः, अविश्वस्तो वा **स्यात्** भवेत् ।

हिन्दी अनुवाद—हे राम ! [आपके द्वारा] सुमेरु के उन्मूलनार्थ श्री हनुमान् जी को नियुक्त किया जा रहा है, इसका क्या प्रयोजन है ? हमारे घरों में हजारों सुमेरु के समान स्वर्णराशि हो जाय [क्या इसलिये हनुमान् की नियुक्ति की गई है ।] आपके पृथ्वीपति होने पर [सभी] ब्राह्मण प्रचुरधन से सम्पन्न हैं, अतः वह सुवर्ण किसे देना है ? कोई भी याचक नहीं है ।

[भगवान्] रामचन्द्र सेवकों के ऐसे मनोहर कथन को सुनकर हर्ष से घन-गर्जन के समान (मन्द्रमधुर) वाणी बोले—[तुम लोग] ऐसा क्यों कह रहे हो ? ब्राह्मणों

की प्रसन्नता स्वाभाविक होती है। सभा में उनके मध्य में [ऐसा] कौन है जो मेरे प्रति अविश्वस्त हो। [अथवा मेरा दान न स्वीकार करे]

टिप्पणी—नियुज्यते—नि√युज्+कर्मणि यक् **सुराद्रिसहस्रवत्**—सुराद्रीणां सहस्रं तद्वत् **प्रभूतविभूतयः**—प्रभूता विभूतिः येषां ते (बहु०)। **मार्गणाः**—याचकाः मार्गणो याचके बाणे याच्ञाऽन्वेषणयोर्विदुः (धरणिः) **रघूद्वहः**—रघोः उद्वहः (उद् √वह्+अच्) पुत्रः (रघुवंशजः इत्यर्थः) अथवा रघुश्रेष्ठः, **जलदरसिताबद्धस्पर्धाम्**—जलदस्य रसितं—मेघस्य गर्जनम् तेन आबद्धा स्पर्धा यया सा ताम् (बहु०) क्षितिसुमनसाम्—क्षितौ सुमनसः—देवाः (विप्रा इत्यर्थः) **असप्रणयः**—प्रणयेन सहितः इति सप्रणयः न सप्रणयः इति असप्रणयः प्रणयः प्रेमणिख्यातो याच्ञाविश्रम्भयोरपि (धरणिः) हरिणीच्छन्दः, वृत्यनुप्रासालङ्कारः।

कविर्दानेन ब्राह्मणान् सत्कर्तुमिच्छतो रामस्यान्तिकं तेषामागमनं वर्णयति—

इत्याशयं भूमिपतेः सुमेधसो
विज्ञाय विश्राणनदत्तचेतसः।
आनीतवन्तोऽन्तिकमस्य वाग्मिनः
प्रसाद्य विप्रान् स्वगुणैर्गरीयसः ॥१०॥

माधुरी—सुमेधसः शोभनप्रज्ञस्य **विश्राणनदत्तचेतसः** दानेच्छावतः **भूमिपतेः** महाराजस्य (रामस्य) **इति आशयम्** ईदृशं विचारं **विज्ञाय** ज्ञात्वा **वाग्मिनः** वाक्पटवः (परिजनाः) **स्वगुणैर्गरीयसः** त्यागादिभिः (ब्राह्मण) गुणैः श्रेष्ठान् **विप्रान्** **प्रसाद्य** अनुमान्य **अस्यान्तिकम्** रामस्य समीपम् **आनीतवन्तः** आनयन्।

हिन्दी अनुवाद—सद्बुद्धि से सम्पन्न, दान के लिये उद्यत महाराज [राम] का यह विचार समझकर चतुर (वाक्पटु) दूत त्यागादि गुणों से श्रेष्ठ ब्राह्मणों को मनाकर इनके पास ले आये।

टिप्पणी—सुमेधसः—सुष्ठु मेधा यस्य सः (बहु०) तस्य 'नित्यमसिच् प्रजामेधयोः' (अष्टा० ५/४/१२२) सूत्रेण असिच्। **विश्राणनदत्तचेतसः**—विश्राणने दत्तं चित्तं येन सः तस्य (बहु०) विश्राणनं वितरणं दानमित्यमरः। **वाग्मिनः**—वाच्+ग्मिन् 'वाचो ग्मिनिः' (अष्टा ५/२/१२४) **गरीयसः**—गुरु+ईयसुन् (द्वि० बहु०)। **इन्द्रवंशा वंशस्थयोः साङ्कर्यादुपजातिच्छन्दः** वृत्यनुप्रासालंकारः।

भगवतो रामस्य गुणैर्वशीकृतानां ब्राह्मणानां प्रतिग्रहेच्छां व्यनक्ति कविः—

तेऽप्यलुब्धबुद्धयस्तस्य भूपतेर्गुणैः ।
चक्रिरे प्रतिग्रहे साभिलाषमानसाः ॥११॥

माधुरी—अलुब्धबुद्धयः निर्लोभमनसः अपि ते ब्राह्मणाः तस्य भूपतेः महाराजस्य (रामस्य) गुणैः दानादिभिः प्रतिग्रहे दानस्वीकारे साभिलाषमानसाः इच्छुकाः चक्रिरे कृताः ।

हिन्दी अनुवाद—लोभरहित भी वे (ब्राह्मण) उन महाराज (रामचन्द्र) के गुणों के द्वारा धन को स्वीकार करने के इच्छुक बना दिये गये ।

टिप्पणी—अलुब्धबुद्धयः—न लुब्धाः बुद्धयो येषां ते (बहु०) प्रतिग्रहः—प्रतिग्रहः स्वीकरणे सैन्यपृष्ठोपरागयोः योग्येभ्यो विधिवद्देये करसम्पीडने तथा इति विश्वः । साभिलाषमानसाः—अभिलाषेण सहितं मानसं येषां ते (बहु०) उष्णिक् छन्दः वृत्त्यनुप्रासः ।

ब्राह्मणेभ्योऽभीष्टदानानन्तरं सिंहासनमधितिष्ठतो भगवतो वन्दिकृतां वन्दनामाह—

दत्त्वा तेभ्यो यदभिलषितं तत्प्रसन्नास्यचन्द्रः
पीठे भास्वन्मणिशबलताभाजि हैमे निषण्णः ।
राज्ञामङ्घ्रिद्वयनखरुचा रञ्जयन्नेष मौली-
नुद्दामश्रीरिति रघुपतिं वन्दिवृन्दैर्ववन्दे ॥१२॥

माधुरी—तेभ्यः विप्रेभ्यः यत् अभिलषितम् इष्टम् तत् दत्त्वा तद्वस्तु वितीर्य प्रसन्नास्यचन्द्रः प्रसन्नमुखचन्द्रः भास्वन्मणि-शबलताभाजि मणीनां भासा चित्रिते हैमे स्वर्णमये पीठे आसने निषण्णः उपविष्टः अङ्घ्रिद्वयनखरुचा द्वयोश्चरणयोः नखानां कान्त्या राज्ञाम् प्रणतभूपालानाम् मौलीन् मस्तकानि रञ्जयन् शोभयन् उद्दामश्रीः उत्कृष्टशोभाशाली रघुपतिः रामचन्द्रः वन्दिवृन्दैः स्तुतिपाठकानां समूहैः इति वक्ष्यमाणरूपेण ववन्दे वन्दितोऽभूत् ।

हिन्दी अनुवाद—उन [ब्राह्मणों] को जो अभीष्ट था, उसे देकर प्रसन्न मुख रूपीचन्द्र वाले, चमकती हुयी मणियों से चित्रित स्वर्णनिर्मित आसन में विराजमान, दोनों चरणों के नखों की कान्ति से [प्रणत] भूपालों के मस्तकों को सुशोभित करते हुये, उत्कृष्ट सुषमा से सम्पन्न इन रामचन्द्र जी की स्तुतिपाठकों के समूह ने इस प्रकार वन्दना की ।

टिप्पणी—प्रसन्नास्यचन्द्रः—प्रसन्नम् आस्यमेव चन्द्रः यस्य सः (बहु०) भास्वन्मणिशबलताभाजि—भास्वन्तो ये मणयः तैः शबलम् तस्य भावस्तां भजते तच्छील-

स्तस्मिन् । चित्रं किर्मीरकल्माषशबलैताश्चकर्बुरे (अमरः) हैमे—हेम्नो विकारः इति हैमम् हेमन् + अण् पीठे—विष्टरः पीठमासनम् इत्यभिधानरत्नमालायाम् । उद्दामश्रीः—उद्दामा श्रीः यस्य सः (बहु०) त्रितं स्यादुद्दाममुच्छृङ्खलमनर्गलम् (हलायुधः) वन्दिनः-वन्दिनः स्तुतिपाठकाः (अमरः) मन्दाक्रान्ता वृत्तम्, उदात्तालङ्कारः ।

कविर्भगवद्गुणाङ्कितस्य काव्यस्य माधुर्यं तदितरस्य च वैरस्यं कथयति—

पीयूषाक्षेपदक्षा नवपरिणतया द्राक्षया बद्धकक्षाः,
ते काण्डैः पुण्ड्रकाणां कथमपि कलितं नोपमानं सहन्ते ।
राम क्ष्मापालचक्रार्चितचरणगुणैः रङ्किता ये त्वदीयै-
रन्ये मन्युस्त्रुताहीश्वरविषविरसा वाग्विलासाः कवीनाम् ।१३।

माधुरी—हे क्ष्मापालचक्रार्चितचरण ! राजसमूहपूजितपाद ! **राम** ! ये **त्वदीयैः** तव **गुणैः** दानादिभिः (शौर्यमाधुर्यौदार्यादिभिर्वा) **अङ्किताः** युक्ताः **कवीनाम् वाग्विलासाः** वाणीशोभाऽऽधायकाः श्लोकाः सन्ति । **पीयूषाक्षेपदक्षाः** अमृतस्य तिरस्कारे पटवः **नवपरिणतया** नवीनपरिपाकेन **द्राक्षया** मधुरसया **बद्धकक्षाः** स्पर्धां कुर्वन्तः ते **पुण्ड्रकाणाम्** मधुरस्थूलानाम् इक्षूणाम् **काण्डैः** समूहैः **कथमपि** यथाकथञ्चित् **कलितम्** विहितम् **उपमानम्** सादृश्यम् **न सहन्ते** मृष्यन्ति । **अन्ये** भवदीय-गुणवर्णनविरहिताः श्लोकाः **मन्युस्त्रुताहीश्वरविषविरसाः** क्रोधाच्च्युतं यत् सर्पराजस्य विषं तद्वत् **विरसाः** रसरहिताः अनास्वाद्याः इत्यर्थः ।

हिन्दी अनुवाद—हे राजसमूह से पूजितपाद रामचन्द्र ! आपके [शौर्य-माधुर्य तथा औदार्य आदि] गुणों से युक्त, कवियों के द्वारा रचित जो वाणी के शोभा-धायक श्लोक हैं, [माधुर्य में] अमृत का तिरस्कार करने में चतुर, नवीन परिपाक होने से अंगूरों से स्पर्धा करते हुये वे (श्लोक) मोटे गन्ने (पौंड़ा) के पोरों या समूहों से किसी प्रकार किये गये सादृश्य को सहन नहीं करते हैं (अति मधुर ईख के पोरों में भी वह माधुर्य नहीं है ।) । [उन श्लोकों के अतिरिक्त] दूसरे [श्लोक] क्रोध से गिरे हुये सर्प-राज (शेषनाग) के विष के समान नीरस हैं (अतः उनका आस्वादन भी नहीं किया जा सकता अथवा अमृत, द्राक्षाफल तथा ईख के पोरों के अतिरिक्त अन्य पदार्थ इन श्लोकों के समक्ष नीरस है ।)

टिप्पणी—पीयूषम्—पीयूषममृतं सुधा (अमरः) **नवपरिणतया**—सद्यः पक्वतया, लतायामेव परिपक्वानि द्राक्षाफलानि हृदये चैवाविर्भूतानि काव्यानि मधुरतराणि भवन्ति । मृद्वीका गोस्तनी द्राक्षा स्वाद्वी मधुरसेति च (धरणिः) **कक्षा**—कक्षा स्पर्धापदे काञ्च्यां रथांगे वप्रकोष्ठयोः (विश्वः) **काण्डैः**—काण्डं चावसरे बाणे

नाले स्कन्धे च शाखिनां । स्तम्बे रहसि वर्गे च गाह्य पानीययोरपि (धरणिः) पुण्ड्रकाणाम्—रसाल इक्षुस्तद्भेदाः पुण्ड्रकांतारकादयः (अमरः) पुण्ड्रेक्षौ पुण्ड्रकः सेव्यः पौण्ड्रकोऽतिरसो मतः । अत्यन्तमृदुमधुरस्थूल इक्षोर्विशेषकः पुण्ड्रकः (वाचस्पतिः) स्नुतम्—स्यन्नंरीणं प्लुवंस्नुतम् (अमरः) । स्रग्धराच्छन्दः, व्यतिरेकालङ्कारः ।

अथ श्रीरामचन्द्रस्याङ्गशोभावर्णना

अथ कविः भगवतश्चरणयोर्वर्णनं करोति—

त्वं लक्ष्म्याः पतिरेक एव भुवने ख्याताः परे ते मृषा
व्यक्तं कोकनदे स्थितां तव पदे लक्ष्मीमिमे लुण्टतः ।
एतत्पूजनमाचरन्ति निखिला लुण्टाकदण्डोचिताः
भूपालाः कथमन्यथा वसुमतीसुत्रामचूडामणे ! ॥१४॥

माधुरी—हे वसुमतीसुत्रामचूडामणे ! महिमहेन्द्रवर ! भुवने पृथिव्याम् लक्ष्म्याः पतिः त्वम् एकः एव (ख्यातः इति शेषः) (ये) परे अन्ये राजानः ते मृषा मिथ्या ख्याताः लक्ष्मीपतिरूपेण प्रसिद्धाः । तव इमे पदे चरणौ कोकनदे रक्तोत्पले स्थिताम् लक्ष्मीम् शोभाम् सम्पत्तिम् वा व्यक्तम् स्पष्टरूपेण लुण्टतः चोरयतः । अन्यथा निखिलाः सर्वे लुण्टाकदण्डोचिताः चोरान् दण्डयन्तः भूपालाः राजानः एतत्पूजनम् एतयोस्तव पादयोः पूजनम् कथम् केन हेतुना आचरन्ति कुर्वन्ति ।

हिन्दी अनुवाद—हे पृथ्वी के इन्द्रों (राजाओं) में श्रेष्ठ ! पृथ्वी में लक्ष्मी के स्वामी के रूप में आप अकेले ही प्रसिद्ध हैं । जो दूसरे राजा (सम्पत्ति के स्वामी कहे जाते हैं) हैं, वे मिथ्या लक्ष्मीपति के रूप में प्रसिद्ध हैं । आपके ये चरण लाल कमल में विराजमान शोभा को स्पष्ट ही (सर्वसमक्ष) लूटते हैं । [यदि आप लक्ष्मीपति न होते तो चोरों को दण्डित करने के अभ्यस्त भूपाल आपके इन चरणों का पूजन क्यों करते ।

(चोरों को दण्ड देने वाले राजा लाल कमल की लक्ष्मी को चुराने वाले आपके चरणों को पूजते हैं अतः आप ही एक मात्र लक्ष्मी के स्वामी सिद्ध होते हैं, लाल कमल की लालिमा भी आपके चरणों की छाया सदृश है यह भाव है ।)

टिप्पणी—वसुमतीसुत्रामचूडामणे वसुमत्याः सुत्रामाणः (सुष्ठु त्रायन्ते

इति सु √ त्रै + मनिन् पृषोदरादि गण में पाठ होने से सिद्ध प्रयोग है) इन्द्राः तेषां चूडामणिः सर्वोत्तमः (तत्०) तत्सम्बोधने । इन्द्रः""""सुत्रामा गोत्रभिद्वज्री ....इत्यमरः । **कोकनदम्**—रक्तोत्पलम् कोकनदम् इत्यमरः । **लक्ष्मीः**—लक्ष्मीः पद्मालया पद्मेत्यमरः । सम्पत्तिश्च श्रीश्च लक्ष्मीश्च सम्पदिति च । **एतत्पूजनम्**— (ष० तत्०) **लुण्टाकदण्डोचिताः**—लुण्टाकाः (लुण्ट् + षाकन्) चौरादयः तेषां दण्डः उचितः लुण्टाकदण्डः येषां ते 'वाहिताग्न्यादिषु' (अष्टा० २/२/३७) सूत्र से उचित का पद के अन्त में प्रयोग अर्थात् चोरों को दण्ड देने में अभ्यस्त अभ्यस्तेऽप्युचितं न्याय्यम् इति यादवः । **शार्दूलविक्रीडितं छन्दः काव्यलिङ्गमलङ्कारः ।**

प्रकारान्तरेण पुनस्तद्युगलं वर्णयति कविः—

वैदेहीदयित ! त्वदीयपदयोर्द्वन्देन यः स्पर्धते,
पद्मस्तस्य जलाशयाप्तजनुषोऽनौचित्यमेतत्कुतः ।
आत्मानं किमवैति स प्रतिनिशं राज्ञा निरस्तश्रियम्,
किंवा तद्भृशमर्चितं विपुलया लक्ष्म्या स्वया राजभिः ॥१५॥

माधुरी—हे **वैदेहीदयित** सीतापते ! **यः पद्मः** यत्कमलम् **त्वदीयपदयो-र्द्वन्द्वेन** तव पादयुगलेन **स्पर्धते** प्रतियोगितां ईर्ष्यां वा करोति, **जलाशयाप्तजनुषः** तडागेजातस्य तस्य एतत् **अनौचित्यम्** अनुचिताचरणं **कुतः** कस्मात् हेतोः (अस्तीतिशेषः ।) **सः पद्मः राज्ञा** भवता चन्द्रेण वा **प्रतिनिशम्** निरन्तरम् **निरस्तश्रियम्** गतशोभम् **आत्मानम्** स्वम् **किम् अवैति** जानाति, **वा** अथवा (पक्षान्तरे) **राजभिः** प्रणतभूपालैः **स्वया विपुलया लक्ष्म्या** स्वकीयप्रचुरसम्पत्या **भृशम्** अत्यधिकम् **अर्चितम्** पूजितम् **तत्** चरणयुगलम् **किम्** (अवैतीतिशेषः) ।

हिन्दी अनुवाद—हे सीतापते (श्रीराम) ! जो कमल आपके चरणयुगल से डाह करता है । [या प्रतियोगिता करता है ।] जलाशय में उत्पन्न उस कमल का यह अनुचित कार्य किस कारण से है ? क्या वह कमल [आप] महाराज [अथवा चन्द्रमा] के द्वारा निरन्तर हरण (तिरस्कृत) की गई शोभा (सम्पत्ति) वाला अपने को मान रहा है ? अथवा क्या प्रणाम करने वाले (अधीन सामन्त) राजाओं के द्वारा अपनी प्रचुर सम्पत्ति से अत्यन्त पूजित उन (दोनों चरणों) को जानता है ?

(विशेष तात्पर्य — जलाशय का अर्थ तालाब या मूर्ख है क्योंकि साहित्य में ड तथा ल का भेद नहीं माना जाता है । कमल की तालाब से उत्पत्ति सर्वविदित है । मूर्ख अर्थ करने पर मूर्ख से उत्पन्न अर्थ होगा । वह आपसे स्पर्धा रूप अनुचित कार्य करेगा ही । ईर्ष्या में दो कारण दिखाये गये हैं (१) महाराज रामचन्द्र के लाल तथा ललाम चरणों द्वारा उसकी शोभा रूप सम्पत्ति हर ली गई है या चन्द्रमा के द्वारा न देखने से

कमल की शोभा तिरस्कृत की गई है। (२) अन्य सामन्त उन चरणों की पूजा प्रचुर धन देकर करते हैं।)

टिप्पणी—पद्मः—पदोर्मा—लक्ष्मीः यस्य सः। **जलाशयाप्तजनुषः**—जलानाम् आशयः तडागादिः अथवा डलयोः सावर्ण्यात् जलाशयो मूढः जलो जडमतिः ख्यातः इति धरणिः जनुर्जननजन्मानीत्यमरः। जलाशयात् आप्तं जनुः येन सः तस्य (बहु०) **किम्**—ह्रासे कलङ्के धिक्कारे दोषे कुत्सावितर्कयोरिति धरणिः। **राज्ञा**—जनाधिपेन रामेण पक्षे चन्द्रेण सोमो राजा रोहिणीवल्लभोऽब्जः इत्याभिधानरत्नमालायाम्, इनः सूर्ये प्रभौ राज्ञि मृगाङ्के क्षत्रिये नृपे इत्यमरः **निरस्तश्रियम्**—निरस्ता—संत्यक्ता श्रीः यस्य सः तम् निरस्तो निष्ठ्यूते त्वरितवचनाक्षिप्तशरयोर्निरस्तः संत्यक्ते प्रतिहतबले चापि गदितः इति धरणिः। **लक्ष्म्या**—सम्पत्तिः श्रीश्च लक्ष्मी श्चेत्यमरः। **शार्दूलविक्रीडितं छन्दः सन्देहालङ्कारः श्लेषश्च** ।

पुनरपि भगवतश्चरणकमलपत्रद्वयस्य वर्णनम् कुरुते—

चित्रं विलसित मेतन्नरपतिमौले ! तवाङ्घ्रिपल्लवयोः ।
यद्द्वावपि तावखिलां शतपत्रश्रियं तिरस्कुरुतः ॥१६॥

माधुरी—हे **नरपतिमौले** ! हे भूपालवर ! तव भवतः **अङ्घ्रिपल्लवयोः** पादपद्मदलयोः एतत् **विलसितम्** कार्यम् **चित्रम्** अद्भुतम् यत् **द्वावपि तौ** द्वौ अपि चरणौ **अखिलाम्** सम्पूर्णाम् **नवशतपत्रश्रियम्** नवकमलशोभाम् पक्षे नवशतसंख्यानाम् पत्राणाम् शोभाम् **तिरस्कुरुतः** नीचैः **कुरुतः**। [द्वौ चरणपल्लवौ नवशतपत्राणां शोभाम् अवमानयतः इति महदाश्चर्यम् इति भावः।]

हिन्दी अनुवाद—हे राजशिरोमणि राम ! आपके दोनों पादपद्मपत्रों का यह कार्य बड़ा ही अद्भुत है कि वे दोनों कमलों की सम्पूर्ण शोभा का तिरस्कार करते हैं। [अथवा दो की अल्प संख्या वाले भी चरण नव सौ पत्रों की शोभा का तिरस्कार करते हैं यह आश्चर्य ही है।]

टिप्पणी—नरपतिमौले—नराणां पतयः तेषां मौलिः तत्सम्बोधने **मौलिः** संहतकेशेषु चूडामुकुटयोरपीति धरणिः। **नवशतपत्रश्रियम्**—नूतनकमलशोभाम्, नवशतसंख्यानां पत्राणां श्रियं वा। सहस्रपत्रं कमलं शतपत्रं कुशेशयम् इत्यमरः। **गीतिश्छन्दः श्लेषो व्यतिरेकश्चालङ्कारौ** ।

कवि भगवत उरुस्थलं वर्णयति—

आभाति यद्भवदुरःस्थलकैतवेन,
देवातसीकुसुमकान्ति दृषत्कपाटम् ।
नित्यं रुणद्धि तव मानसवेश्मनोऽन्तः
शङ्के तदेव परवामदृशः प्रवेशम् ॥१७॥

माधुरी—हे देव ! हे राजन् रामभद्र ! **भवदुरःस्थलकैतवेन** तववक्षसो व्याजेन **अतसीकुसुमकान्ति** अतसीकुसुमसदृशनीलवर्णम् **दृषत्कपाटम्** प्रस्तरकपाटम् **आभाति** शोभते। **तदेव** तत्कपाटमेव **तव भवतः मानसवेश्मनोऽन्तः** मनोरूपगृहाभ्यन्तरे **परवामदृशः** अन्यस्त्रियाः शत्रुवनितायार्वा **प्रवेशम्** अभ्यन्तरागमनं **नित्यं** सदा **रुणद्धि** वारयति, [इत्यहं] **शङ्के** मन्ये।

हिन्दी अनुवाद—हे महाराज रामचन्द्र! आपके वक्षःस्थल के बहाने से अलसी के कुसुम के समान नीलवर्ण का एक शिला का कपाट (किवाँड़) शोभित हो रहा है। वही आपके मन रूपी घर के अन्दर दूसरी [शत्रु की] स्त्री के प्रवेश को सदा रोकता है, ऐसा मैं मानता हूँ।

टिप्पणी—देव—देवौ सुरमहीभुजाविति धरणिः। **अतसीकुसुमकान्ति**—अतसीकुसुमानां कान्तिरिव कान्तिर्यस्यतत् द्रष्टव्यः अतसीकुसुमोपमेयकान्तिः (शिशुपालवधस्यश्लोकः) **दृषत्कपाटम्**—दृषदः कपाटम् **वेश्मनोऽन्तः**—अन्तो नाशसमीपयोर्निगदितः प्रान्ते स्वरूपेऽप्यसाविति धरणिः। **शङ्के**—उत्प्रेक्षे मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादयः। उत्प्रेक्षाव्यञ्जकाः शब्दाः इवशब्दोऽपि तादृशः इति दण्डी। **परवामदृशाम्**—परेषाम्—अन्येषाम् शत्रूणां वा **वामदृशः**—वामाः—अतिशोभनाः दृशः—नेत्राणि यासां ताः (ष० ब० व०) वामं निर्भरसुन्दरद्रविणयोर्वामः प्रतीपार्थकः इति धरणिः। वसन्ततिलकावृत्तम् उपमोत्प्रेक्षापह्नुतीनां सङ्करः।

पुनस्तदेव वक्षःस्थलं वर्णयति कविः प्रकारान्तरेण—

दृशः केषामुच्चैः सुखयति न रामक्षितिभृतः,
समुन्मीलद्दूर्वारुचिररुचिवक्षःस्थलमिदम्।
स्फुरन्मुक्ताहारावलिसलिलधारापरिगते,
नितान्तं वैदेहीहृदयहरिणो यत्र रमते ॥१८॥

माधुरी—**रामक्षितिभृतः** महाराजस्य रामस्य [पक्षे पर्वतस्य] **इदम्** पुरतो विराजमानं **समुन्मीलद्दूर्वारुचिररुचि** विकसद्दूर्वादलसम [रोम] कान्ति **वक्षःस्थलम्** **केषाम्** (पश्यताम् जनानाम्) **दृशः** नेत्राणि **उच्चैः** अत्यधिकं **न सुखयति** सुखसहितानि करोति। **स्फुरन्मुक्ताहारावलिसलिलधारापरिगते** स्फुरन्तः प्रकटीभवन्तः ये मुक्ताहाराः तेषाम् आवलिः पङ्क्तिः सैव सलिलधारा तया **परिगते** युक्ते **यत्र** यस्मिन् (वक्षःस्थले) **वैदेहीहृदयहरिणः** सीतामनोमृगः **नितान्तम्** अत्यन्तम् **रमते** प्रसीदति।

हिन्दी अनुवाद—महाराज राम का अंकुरित दूर्वादल के समान [रोमावलि

से] सुन्दर कान्ति वाला वक्ष:स्थल किन (दर्शक जनों) के नेत्रों को सुखी नहीं करता है। प्रकट होती हुयी मुक्ताहारों की पङ्क्ति रूपिणी जलधारा से युक्त जिस (वक्ष:स्थल) में सीता का हृदय रूपी हरिण अत्यन्त प्रसन्न होता है।

(विशेष भावार्थ—इस श्लोक में राम का उपमान क्षितिभृत् है उसका अर्थ पर्वत भी होता है। जैसे पर्वत के पठार में जहाँ दूब उगी है तथा जलधारायें बह रही हैं वहाँ पर मृग अत्यधिक सुखी होकर विचरण करते हैं। तथैव भगवान् राम के सुन्दर रोमावलि तथा मुक्ताहार की लड़ियों से युक्त वक्ष:स्थल में भगवती विदेह पुत्री सीता का मन अत्यन्त रमण करता है।)

टिप्पणी—रामक्षितिभृत:–रामस्य राज्ञ: द्वितीयपक्षे पर्वतस्य **मुक्ताहारावलि:**—मौक्तिकसराणाम् आवलि:—वीथ्यालिरावलि: पङ्क्तिरित्यमर:। वैदेहीति विशेषणं साभिप्रायं विदेहस्य सुतापि तादृश्येव विरक्ता परं तस्या अपि मन: सगुणस्य परब्रह्मण: श्रीरामस्य वक्षसि अमन्दानन्दसन्दोहं लभते। **शिखरिणीछन्द: श्लेषरूपकपरिकरालङ्कारा:।**

कवि: क्रमप्राप्तस्य भगवतो बाहुयुगलस्य वर्णनं कुरुते—

गोपालत्वमुपेयुषो भगवतस्तं बाहुदण्डं स्तुम:,
श्रीभर्तुर्दिविषद्विभूतिसुरभिस्त्रस्ता यदुल्लासनात्।
पौलस्त्येन हृता पुराऽस्य सदनं हित्वा द्रुतं निर्यती
रोद्धुं नाकलिता कथञ्चिदमुना दोरर्गलश्रेणिभि: ॥१६॥

माधुरी—गोपालत्वम् राजत्वम् गोपत्वं वा **उपेयुष:** प्राप्तवत: **श्रीभर्तु:** लक्ष्मीपते: **भगवत:** श्रीरामस्य **तम्** प्रसिद्धम् **बाहुदण्डम्** भुजदण्डम् **स्तुम:** प्रशंसाम:। **यदुल्लासनात्** [रामपक्षे रावणवधाय गोपपक्षे गवामाकारणाय] यस्य ऊर्द्ध्वीकरणात् **पौलस्त्येन** रावणेन **पुरा** पूर्वकाले **हृता** बलान्नीता [सम्प्रति] **अस्य** रावणस्य **सदनम्** प्रासादम् **हित्वा** परित्यज्य **द्रुतम्** अतिजवेन **निर्यती** निर्गच्छन्ती **त्रस्ता** भीता **दिविषद्विभूतिसुरभि:** देवसम्पत्तिरूपिणी गौ: **अमुना** रावणेन **दोरर्गलश्रेणिभि:** विंशतिभुजबन्धनै: **कथञ्चित्** कथमपि **रोद्धुम्** वशीकर्तुम् न **आकलिता** शक्या। [आसीदिति शेष:]।

हिन्दी अनुवाद—[हम सभी कविजन] गोपाल [राजा या गोप] के भाव को प्राप्त लक्ष्मीपति भगवान् श्रीराम के उस प्रसिद्ध भुजदण्ड की स्तुति करते हैं। [रावण के वधार्थ या गायों को बुलाने के लिये] जिसके ऊपर उठाने से, रावण के द्वारा पहिले हरी गई [तथा इस समय] उसका भवन त्याग कर शीघ्रता पूर्वक निकलती हुई भयभीत देव सम्पत्ति रूपिणी गाय उस (रावण) के द्वारा [बीस] भुजाओं के बन्धनों की पङ्क्ति से किसी प्रकार भी रोकी नहीं जा सकी थी।

(विशेष भाव—जैसे कोई गोप जब भुजा उठाकर अपनी गाय को पुकारता है तो उसकी डरी हुई गाय शत्रु के बन्धन को तोड़कर निकल भागती है उसी प्रकार भगवान् राम ने जब रावण को मारने के लिये अपनी भुजा उठाई तो उसके द्वारा पहिले हरी गई देवसम्पत्ति (पारिजात, पुष्पक, ऐरावत आदि) उसकी बीसों भुजाओं के बन्धन के द्वारा किसी प्रकार भी रोकी नहीं जा सकी।)

टिप्पणी—**गोपालत्वम्**—गौः पृथ्वी सुरभिश्च अतस्तां पालयतीति गोपालः भूमिपालो गोपो वा तस्य भावः—राजत्वम् आभीरत्वम् वा। (दिग्दृष्टिदीधितिस्वर्ग-वज्रवाग्बाणवारिषु। भूमौ पशौ च गोशब्दो विद्वद्भिर्दशसु स्मृतः इत्यभिधानरत्नमाला-याम्।) **उपेयुषः**—उप√इ + लिट्→क्वसु (ष० ए० व०) **यदुल्लासनात्**—यस्य उल्लासनम्—उत्√लस् + णिच् + ल्युट् (रावणमारणे गवामाह्वाने वा ऊर्ध्वम् करणात्) हेतौ पञ्चमी **पौलस्त्येन**—पुलस्त्यस्य गोत्रापत्यम् इति पुलस्त्य + यञ्। **दिविषद्विभूति-सुरभिः**—आदितेयाः दिविषदो लेखा अदितिनन्दनाः दिविषदां विभूतिः (ष० तत्०) सैव सुरभिः (उपमितसमासः) **दोरर्गलश्रेणिभिः**—दोषाम् अर्गलानां श्रेणिभिः—पंक्तिभिः (ष० तत्०) विष्कम्भोऽर्गलं न नेत्यमरः। **शार्दूलविक्रीडितम्** छन्दः **श्लेषरूपककाव्यलिङ्गा-लङ्काराः**।

पुनरपि भगवद्भुजवर्णनं कुरुते कविः—

पुष्यतस्त्विषमपेत कञ्चुकौ
गन्धसारमधिगम्य हृष्यतः।
यद्दशाननरिपो भवद्भुजौ
स्पर्धया ध्रुवमहीश्वरस्य तत् ॥२०॥

माधुरी—**हे दशाननरिपो**! हे राम! **यत्** येन कारणेन **अपेतकञ्चुकौ** [भुज-पक्षे] त्यक्तवस्त्रविशेषौ [सर्पपक्षे] त्यक्तनिर्मोकौ **भवद्भुजौ** भवदीयबाहू **त्विषम्** कान्तिम् **पुष्यतः** वर्धयतः **गन्धसारं** चन्दनम् **अभिगम्य** प्राप्य **हृष्यतः** प्रसीदतः **ध्रुवम्** नूनम् **तत्** शोभावर्धनादिकरणम् **अहीश्वरस्य** सर्पश्रेष्ठस्य वासुकेः **स्पर्धया** प्रतियोगितया [कुरुतः इति शेषः]

हिन्दी अनुवाद—हे रावणशत्रो राम! जो वस्त्र रहित [केंचुली से रहित सर्प के समान] आपकी भुजायें कान्ति को बढ़ाती हैं तथा चन्दन को पाकर प्रसन्न होती हैं। निश्चय ही वह सब कार्य सर्पराज वासुकि की स्पर्धा से (करती हैं)।

(विशेषतात्पर्य—सर्प भी केंचुली रहित होकर अधिक चमकता है तथा चन्दन को पाकर प्रसन्न होता है तथैव भगवान् राम की भुजायें वस्त्र उतार देने पर अधिक शोभित होती हैं तथा चन्दन लगाने की अभ्यस्त हैं।)

टिप्पणी—अपेतकञ्चुकौ—अपेतः कञ्चुको याभ्यां तौ (बहु०) कञ्चुको बाणवारे स्यान्निर्मोके कवचेऽपिच वर्द्धापकगृहीताङ्गस्थितवस्त्रे च चोलके (विश्वमेदिन्यौ)। कञ्चति—शोभते बध्नाति वा देहम् इति कञ्चुकः √कचि (दीप्ति बन्धनयोः) + उकन् गन्धसारम्—गन्धसारो मलयजो भद्रश्रीश्चन्दनोऽस्त्रियाम् इत्यमरः। **रथोद्धतावृत्तम्** उत्प्रेक्षा श्लेषः काव्यलिङ्गमिति सर्वेषां सङ्करः।

प्रकारान्तरेणापि भगवद् भुजौ वर्णयति कविः—

केयूरबद्धोपलसन्महामणि-
प्रभोर्मिकिर्मीरितयो जगत्प्रभो।
शृङ्गारितस्यापि करस्य दन्तिनो
न दुर्जया श्रीर्भुजयोर्द्वयेन ते ॥२१॥

माधुरी—हे **जगत्प्रभो**! हे विश्वेश्वर! **ते** तव **केयूरबद्धोपलसन्महामणिप्रभोर्मिकिर्मीरितयोः** केयूरयोः बद्धानाम् विलसतां महामणीनाम् प्रभायाः ऊर्मिभिः तरङ्गरेखाभिः किर्मीरितयोः शबलयोः (ष०, तृ० तत्०) **भुजयोः द्वयेन** द्वाभ्यां बाहुभ्यामित्यर्थः **शृङ्गारितस्य** रचितमनोज्ञवेषस्य **अपि दन्तिनः** हस्तिनः **करस्य** शुण्डायाः **श्रीः** शोभा **न दुर्जया** न जेतुं शक्येति भावः।

हिन्दी अनुवाद—हे विश्व के स्वामिन्! केयूरों (बाजुबन्दों) में जड़ी हुई चमकती हुई बहुमूल्य मणियों की प्रभा की तरङ्गों से शबल (अनेक रंगों की) आपको दोनों भुजाओं से सजाये गये भी हाथी की सूँड़ की शोभा जीती जा सकती है।

टिप्पणी—किर्मीरितयोः—किर्मीरः अस्ति अस्येति किर्मीर + इतच् किर्मीरितस्तयोः चित्रं किर्मीर कल्माष शबलैताश्च कर्बुरे इत्यमरः। **शृङ्गारितस्य**—शृङ्गारः अस्ति अस्येति शृङ्गार + इतच् शृङ्गारितस्तस्य। **श्रीः**—शोभा श्री शब्दः कविभिः प्रोक्तो लक्ष्मीसम्पत्तिकान्तिषु। अधिकारे सरस्वत्यां शोभा कीर्ति प्रभासु चेति धरणिः। उपजातिच्छन्दः व्यतिरेकालङ्कारः।

कविः श्रीरामस्य कण्ठस्य शोभां कम्बुसादृश्यमुखेन वर्णयति—

कम्बुः कश्चिदितस्ततो जलनिधेः शुक्तीः समुक्ताफलाः
पश्यन्नौर्वहुताशने निपतितस्त्वत्कण्ठतावाप्तये।
सद्यस्तामधिगम्य तेन गुरुणा हारेण भाति प्रभो
जन्मस्थानसमानता जनयति स्पर्द्धां मिथो जन्मिनाम् ॥२२॥

माधुरी—**हे प्रभो** ! हे स्वामिन् श्रीराम ! **कश्चित्** कोऽपि भाग्यवान् **कम्बुः** शङ्खः **जलनिधेः** समुद्रस्य **इतस्ततः** यत्र तत्र **समुक्ताफलाः** मुक्ताफलैः सहिताः **शुक्तीः** मुक्ताजननीः **पश्यन्** अवलोकयन् **त्वत्कण्ठताऽवाप्तये** (तपस्यया) भवतः कण्ठत्वं प्राप्तुम् **और्वहुताशने** समुद्राग्नौ **निपतितः** प्रविष्टः **सद्यः** तत्क्षणमेव **ताम्** कण्ठस्वरूपम् **अधिगम्य** प्राप्य **तेन गुरुणा** महार्घ्येण **हारेण** मुक्तावल्या **भाति** शोभते । **जन्मस्थानसमानता** सोदर्यता **जन्मिनाम्** प्राणिनाम् **मिथः** परस्परम् **स्पर्द्धाम्** वृद्धिभावे प्रतियोगितां **जनयति** उत्पादयति ।

हिन्दी अनुवाद—हे प्रभो ! कोई [भाग्यशाली] शंख समुद्र के इधर उधर किनारों पर मोतियों के सहित सीपियों को देखता हुआ आपका कण्ठ बनने की इच्छा से बड़वाग्नि में गिर पड़ा । (तथा) तत्क्षण ही कण्ठ के स्वरूप को प्राप्त होकर उस बहुमूल्य मुक्ताहार से सुशोभित हो जाता है । जन्मस्थान की एकता (सहोदरता) प्राणियों में परस्पर प्रतियोगिता उत्पन्न कर देती है ।

(**विशेष तात्पर्य**—शंख तथा मोती समुद्र में एक ही जगह उत्पन्न होते हैं । मोती श्रीराम के गले की माला बनेगी अतः उनके सहोदर शंख में भी स्पर्धा के भाव से भगवान् का कण्ठ बनने की इच्छा जगी, बिना तपस्या के ऐसा उच्च पद नहीं प्राप्त हो सकता इसलिये वह (उग्र तपस्या के भाव से) बड़वानल में गिर पड़ा तथा तत्काल त्रिवली रूप बहुमूल्य हार से युक्त हो गया । मोती की स्पर्धा से वह भी भगवान् के त्रिवली विलसित कण्ठ के स्वरूप को प्राप्त हो गया ।)

टिप्पणी—कम्बुः—शंखः स्यात्कम्बुरस्त्रियामित्यमरः **और्वहुताशनः**—और्वः समुद्रवह्निः स्याद्वाडवो वडवामुखः इत्यभिधानरत्नमालायाम् **कंठता**—कण्ठो गले गलध्वाने कण्ठं फेणसमीपयोरिति धरणिः (बडवानले शंखस्य प्रवेशस्तपश्चरणाय, तपोभिर्मनसेप्सितं लभ्यते नास्त्यलभ्यं तपोभिरिति ।) **हारेण**—हारो मुक्तावली देवच्छन्दोऽसौ शतयष्टिकः इत्यमरः **जन्मस्थानसमानता**—जन्मनः स्थानस्य समानता (ष० तत्०) सोदर्यतेत्यर्थः स्थानं स्थितिसादृश्ये सन्निवेशावकाशयोः स्थानशब्दो निपानन्तु युक्तार्थः करणार्थकः इति धरणिः । **शार्दूलविक्रीडितं छन्दः अर्थान्तरन्यासोऽलंकारः** ।

व्यतिरेकालङ्कारेण पुनरपि श्रीरामकण्ठं वर्णयति कविः—

कौशल्यासूनुकण्ठस्य तस्य कम्बो र्भिदा कुतः ।
कापि श्री र्यस्य वैदेहीबाहुव्यतिकरोचिता ॥२३॥

माधुरी—**कौशल्यासूनुकण्ठस्य** श्रीरामगलस्य **तस्य कम्बोः** शङ्खस्य **भिदा** भेदः **कुतः** कस्मात्कारणात् (अस्तीतिशेषः) **यस्य** कण्ठस्य **काऽपि** अनिर्वचनीया **श्रीः** शोभा **वैदेहीबाहुव्यतिकरोचिता** बाहुस्पर्शभ्यस्ता सीताभुजलतास्पर्शात् श्रेष्ठेत्यर्थः ।

हिन्दी अनुवाद—श्रीराम के कण्ठ तथा उस शङ्ख के मध्य में किस कारण भेद है ? जिस कण्ठ की अनिर्वचनीय शोभा, भगवती जानकी की भुजाओं के स्पर्श की अभ्यस्त होने से श्रेष्ठ है। (अतः स्पष्ट ही दोनों में भेद है।)

टिप्पणी—**कौशल्यासूनुः**—कौशल्यायाः सूनुः—पुत्रः (ष० तत्०) **वैदेहीबाहुव्यतिकरोचिता**—वैदेह्याः बाहू तयोः व्यतिकरः तस्योचिता (ष० तत्०) अनुष्टुप्छन्दो व्यतिरेकालङ्कारः।

भगवतो रामस्य मुखशोभां वर्णयति—

न त्वया मुखमात्रेण समस्तं राम भूपते !
दोःस्तम्भयुगलेनापि निर्जितं राजमण्डलम् ॥२४॥

माधुरी—हे भूपते राम, हे जगदीश रामचन्द्र ! त्वया भवता **मुखमात्रेण** मुखशोभा मात्रेण **समस्तम्** सम्पूर्णम् **राजमण्डलम्** चन्द्रविम्बं न **निर्जितम्** हीनवर्णं कृतम् (अपितु) **दोःस्तम्भयुगलेनापि** बाहुयुग्मेनापि [समस्तम् **राजमण्डलम्** राजचक्रम् क्षत्रियसमूहः **निर्जितम्** पराजितः]।

हिन्दी अनुवाद—हे जगदीश्वर राम ! आपने केवल मुख के द्वारा पूर्णचन्द्रविम्ब को पराजित नहीं किया बल्कि दोनों भुजदण्डों से भी सम्पूर्ण राजचक्र (क्षत्रियों के समूह) को हरा दिया है।

टिप्पणी--**राजमण्डलम्**—चन्द्रविम्बम् क्षत्रियकदम्बकम् वा राजा नृपे प्रभौ शक्रे राजा क्षत्रियचन्द्रयोरिति धरणिः (चन्द्रपक्षे राज्ञः मण्डलम् क्षत्रियपक्षे तु राज्ञां मण्डलम् इत्युभयत्रापि षष्ठीतत्पुरुषः) स्यान्मण्डलं द्वादशराजके च देशे च विम्बे च कदम्बके च। कुष्ठप्रभेदेऽप्युपसूर्यके च भुजङ्गभेदे शुनि मण्डलः स्यादिति विश्वः। अनुष्टुप्छन्दः, राजमण्डलपदे श्लेषःप्रतीपश्चालङ्कारौ।

पुनरपि तदेव विशिनष्टि—

दोषाकरस्तव मुखेन तिरस्कृतश्रीः
रोषात्कुशुम्भकुसुमच्छविरुज्जिहीते।
देव ! प्रसीदति पुनस्तमसो निरासाद्
व्यक्तन्ततो बुधगुरुर्द्विजराज एषः ॥२५॥

माधुरी—हे देव ! हे प्रभो ! तव भवतः **मुखेन तिरस्कृतश्रीः** वदनेन दूरीकृतशोभः **दोषाकरः** चन्द्रः दोषनिधिः कश्चित्प्राणी वा **रोषात्** क्रोधात् **कुशुम्भकुसुमच्छविः**

कुशुम्भपुष्पवत् ईषद्रक्तकान्तिः **उज्जिहीते** उदेति समक्षम् आगच्छति **वा पुनः** उदयानन्तरम् प्रत्यक्षम् आगमनानन्तरम् **वा तमसो निरासात्** अन्धकारस्य दूरीकरणात् तमोगुणनाशाद् वा **प्रसीदति** विशदो भवति प्रसन्नो भवति वा । ततः तेन कर्मणा **व्यक्तम्** स्पष्टम् (यत्) **एषः** अयम् **द्विजराजः** चन्द्रः ब्राह्मणश्रेष्ठो वा **बुधगुरुः** बुधस्य पिता पण्डितानां गुरु र्वा ।

हिन्दी अनुवाद—हे प्रभो ! चन्द्रमा [महादुष्ट प्राणी] आपके मुख से पराजित-कान्ति वाला होकर क्रोध से कुशुम्भ पुष्प (केसर) के समान वर्ण वाला (लाल रंग का) उदय होता है [सामने आता है । तदनन्तर] अन्धकार [तमोगुण] का नाश होने से श्वेत वर्ण का [प्रसन्न] हो जाता है । इससे स्पष्ट ही यह चन्द्रमा [श्रेष्ठ ब्राह्मण] बुधग्रह का पिता [विद्वानों का गुरु] है ।

(**विशेष तात्पर्य**—दोषाकर का अर्थ दोषा-रात्रि को करने वाला चन्द्रमा तथा दोषों का आकर—बड़ा दुष्ट है । चन्द्रमा उदयकाल में लाल होता है, क्रमशः अन्धकार के दूर होने पर धवल हो जाता है । कवि ने उत्प्रेक्षा की है कि चन्द्रमा श्रीराम के मुख की शोभा से पराजित होकर पहिले क्रोध के कारण लाल हो जाता है पुनः उनके दिव्य दर्शन से अज्ञान का नाश होने पर प्रसन्नता से शुभ्रवर्ण का होकर चमकने लगता है तथा वह बुध जैसे सौम्य ग्रह का जनक बनता है। इसी भाव को श्लेषालङ्कार से महादुष्ट के पक्ष में इस प्रकार घटित किया जाता है—

कोई महादुष्ट अपने प्रतिद्वन्द्वी भगवान् के मुख की शोभा को देखकर (तमोगुण के प्रभाव से) क्रोध से कुछ लाल वर्ण का हो जाता है पुनः (परमात्मा के अनुग्रह से) तमोगुण का नाश होने से वह सत्त्वगुण के प्रभाव से प्रसन्न होता है तथा श्रेष्ठ ब्राह्मण बन कर पंडितों का गुरु हो जाता है ।)

टिप्पणी—**दोषाकरः**—दोषाम्-रात्रिं करोतीति चन्द्रः दोषाणाम् आकरः दोषनिधि र्वा पुरुषः **तिरस्कृतश्रीः**—तिरस्कृता श्रीः यस्य सः (बहु०) **कुशुम्भकुसुमच्छविः**—कुशुम्भकुसुमम्—ईषद्रक्तं पुष्पम् तद्वत् छविः कान्तिर्यस्य सः (बहु०) स्यात्कुशुम्भंवह्निशिखं महारजनमित्यपीत्यमरः । **तमसो निरासात्**—अन्धकारदूरीकरणात् पक्षे तमोगुणनाशात् तमो ध्वान्तं तमो राहुस्तमः शोकस्तमो गुणः इति धरणिः । **वसन्ततिलकावृत्तम् श्लेषः प्रतीपं काव्यलिङ्गञ्चैतेषां सङ्करः ।**

प्रकारान्तरेण रामवदनच्छविं वर्णयति—

क्षीराब्धिसम्भवेऽपीन्दौ त्वदाननरुचिः कुतः ।
केन सम्भाव्यते राम ! सा पद्मे पङ्कजन्मनि ॥२६॥

माधुरी—हे राम ! त्वदाननरुचिः तव मुखकान्तिः **क्षीराब्धिसम्भवेऽपि** क्षीर-

समुद्रोत्पन्नेऽपि इन्दौ चन्द्रे कुतः कथमस्ति । केन केनकारणेन सा शोभा पङ्कजन्मनि कर्दमोत्पन्ने पद्मे कमले सम्भाव्यते उत्प्रेक्ष्यते ।

हिन्दी अनुवाद—हे राम ! आपके मुख की कान्ति क्षीरसागर में उत्पन्न होने वाले चन्द्रमा में भी कहाँ है ? किस कारण उसकी सम्भावना कीचड़ [पाप] में उत्पन्न कमल में की जाती है ?

(**विशेष तात्पर्य**—चन्द्रमा दुग्ध के समुद्र जैसे श्वेत व पवित्र स्थान में उत्पन्न हुआ है, जब उसमें आपके मुख की कान्ति नहीं है तो कीचड़ जैसी गन्दी व पाप पूर्ण जगह में होने वाले कमल में कैसे होगी ।)

टिप्पणी—**क्षीराब्धिसम्भवे**—क्षीरस्य अब्धिः तत्र सम्भवो यस्य सः तस्मिन् (बहु०) **पङ्कजन्मनि**—पङ्कात् जन्म यस्य सः तस्मिन् (बहु०) पङ्कः कर्दमपापयोरिति धरणिः । **अनुष्टुप्छन्दो व्यतिरेकालङ्कारश्च** ।

मुखमेव पुनः विशिनष्टि—

स्पृशति तवानन सममिति
कमलं स्वकरेण योजयति लक्ष्म्या ।
शुद्धस्ववंशजे त्वयि
राम ! रविर्व्यक्तबहलवात्सल्यः ॥२७॥

माधुरी—हे राम ! रविः सूर्यः, [इदम्] **तवाननसमम्** तवमुखसदृशम् इति अस्माद्धेतोः **कमलम्** पद्मम् **स्वकरेण** स्वहस्तेन [किरणेन] **स्पृशति** परामृशति **लक्ष्म्या** कान्त्या [च] **योजयति** युक्तं करोति । [अतः सः] **शुद्धस्ववंशजे** स्वपवित्रकुलोत्पन्ने **त्वयि** भवति **व्यक्तबहलवात्सल्यः** स्पष्टप्रेमातिशयः (अस्तीतिशेषः) ।

हिन्दी अनुवाद—हे रामचन्द्र ! सूर्य, [यह] तुम्हारे मुख के समान है अतः कमल को अपने हाथ [किरण] से छूते हैं (तथा) कान्ति से युक्त करते हैं । [इसलिये] अपने पवित्र कुल में उत्पन्न तुम्हारे ऊपर (उनका) अत्यन्त प्रेम स्पष्ट हो रहा है ।

टिप्पणी—**स्वकरेण**—स्वपाणिना, स्वकिरणेन वा **शुद्धस्ववंशजे**—शुद्धो यः स्ववंशस्तत्र जातस्तस्मिन् शुद्धः शुक्ले च वंशे चेति धरणिः, वंशो वेणौ कुले वर्गे पृष्ठाद्यवयवेऽपि चेति विश्वमेदिन्यौ **व्यक्तबहलवात्सल्यः**—व्यक्तं बहलं वात्सल्यं यस्य सः (बहु०) **गीतिश्छन्दः काव्यलिङ्गमुपमाचैतयोः संसृष्टिः** ।

स्मयमानस्य भगवतः श्रीरामस्यौष्ठवर्णनं करोति कविः—

बंधूकविम्बविद्रुम-
लक्ष्मीचौरं निजौष्ठमवगम्य ।
स्मयमानस्तं रचयसि
दशनमयूखच्छटापटाच्छन्नम् ॥२८॥

माधुरी—[हे राम ! त्वम्] **निजौष्ठम्** स्वदशनच्छदम् **बंधूकविम्बविद्रुम-लक्ष्मीचौरम्** बंधुजीवकुसुमस्य विम्बाफलस्य प्रवालस्य च शोभायाः अपहर्तारम् **अवगम्य** ज्ञात्वा **स्मयमानः** स्मितं कुर्वाणः **तम्** ओष्ठम् **दशनमयूरवच्छटापटाच्छन्नम्** दन्तकिरण-कान्तिपटप्रावृतम् **रचयसि** करोषि ।

हिन्दी अनुवाद—(हे राम ! आप) अपने ओंठ को दुपहरिया पुष्प, विम्बा-फल (कुंदरू) तथा मूंगे की शोभा का अपहारक समझकर मन्द हास करते हुये उसे दाँतों की किरणों की कान्ति रूपी श्वेतवस्त्र से आच्छादित किये रहते हो ।

टिप्पणी—**बन्धूक**—रक्तकस्तु बन्धूको बन्धुजीव इत्यमरः । **बिम्बम्**—बिम्बं तु प्रतिबिम्बे स्यान्मण्डले विम्बिकाफले इति हैमः । **विद्रुमम्**—प्रवालो ऽस्त्री किशलये वीणादण्डे च विद्रुमे इति विश्वः । **मयूरवच्छटा**—किरणोऽस्रमयूरवांशुगभस्तिघृणिरश्मयः इत्यमरः । **गीतिश्छन्दः व्यतिरेकगूढोत्प्रेक्षयोः साङ्कर्यम् ।**

पुनरधरशोभां वर्णयति—

प्रव्यक्तपाटलश्रीः
स्मितमल्लीमञ्जुलोऽयमधरस्ते ।
उष्मागम इव तनुते
राघव ! मुखशीतभानुसौभाग्यम् ॥२९॥

माधुरी—हे **राघव** ! हे राम ! **ते** तव **प्रव्यक्तपाटलश्रीः** प्रव्यक्ता [अधरपक्षे] प्रस्फुटा पाटलस्य पाटलरागस्य श्री रिवश्री र्यस्मिन् सः [ग्रीष्म पक्षे] प्रव्यक्तानां पाटल-कुसुमानां श्रीर्यस्मिन् सः **स्मितमल्लीमञ्जुलः** [अधरपक्षे] स्मितस्य मल्ली मृत्पात्रम् तेन मञ्जुलः सुन्दरः [ग्रीष्म पक्षे] स्मिता विकसिता या मल्ली तृणशून्या (बेला नाम का फूल) तया मञ्जुलः **अयम्** वर्ण्यः **अधरः** अधरोष्टः **उष्मागमः इव** ग्रीष्मसदृशः **मुखशीतभानु-सौभाग्यम्** मुखचन्द्रशोभाम् **तनुते** विस्तारयति ।

हिन्दी अनुवाद—हे राम ! जिसमें श्वेत-अरुण रंगों की शोभा स्पष्ट हो रही है ऐसा, मन्द हास (मुसकान) का सुन्दर प्याला बना हुआ तुम्हारा यह अधर विकसित

गुलाब तथा बेला की शोभा से सुन्दर ग्रीष्म ऋतु की तरह मुख रूपी चन्द्रमा की शोभा को बढ़ा रहा है ।

टिप्पणी—पाटलः—श्वेतरक्तस्तु पाटलः इत्यमरः । **मल्ली**—मल्लिका तृणशून्येऽपि मीन मृत्पात्रभेदयोरिति विश्वः । **उष्मागमः**—उष्मणः आगमः अस्मिन्निति (बहु०) निदाघ उष्णोपगम उष्ण उष्मागमस्तपः इत्यमरः । **शीतभानुः**—शीताः भानवः-किरणाः यस्य सः चन्द्रः । **गीतिश्छन्दः** श्लेषोपमारूपकाणां सङ्करोऽलङ्कारः ।

भगवतो दन्तानां शोभां वर्णयति—

भवदास्यसम्भवानां
राम द्विजता स्थितैव दन्तानाम् ।
एते निसर्गविमला
न केन मुक्ता इति प्रतीयन्ते ॥३०॥

माधुरी—हे राम ! **भवदास्यसम्भवानाम्** भवतो मुखे मुखाद् वा समुत्पन्नानाम् **दन्तानाम्** रदानाम् [ब्राह्मणानाञ्च] **द्विजता** दन्तता ब्राह्मणता च **स्थितैव** सिद्धा एव । **निसर्गविमलाः** स्वभावेन निर्मलाः जन्मना निष्पापाः **एते** दन्ताः विप्राश्च **केन** (दर्शकेनेत्यर्थः) **मुक्ताः** मौक्तिकानि मुक्तिं प्राप्ताश्च **न प्रतीयन्ते** निश्चीयन्ते (सर्वे जनास्तान् दन्तान् मुक्ताः ब्राह्मणांश्च मुक्तिं प्राप्तान् जानन्तीति भावः ।)

हिन्दी अनुवाद—हे राम ! आपके मुख में उत्पन्न दाँतों की दन्तता तथा मुख से उत्पन्न ब्राह्मणों की ब्राह्मणता [स्वतः] सिद्ध है । कौन (दर्शक पुरुष) स्वभाव से निर्मल इन दाँतों को मोती [तथा] जन्म से निष्पाप इन ब्राह्मणों को मुक्त नहीं मानता है ।

टिप्पणी—भवदास्यसम्भवानाम्—भवतः आस्यम् (ष० तत्०) तस्मिन् सम्भवो येषां ते दन्तास्तस्मात् सम्भवो येषां ते ब्राह्मणाः (बहु०) तेषाम् ब्राह्मणोऽस्य मुखमासीदिति श्रुतिः । **द्विजता**—दन्तविप्राण्डजा द्विजा इत्यमरः **निसर्गविमलाः**—निसर्गेण विमलाः विगतं मलं कालुष्यं पातकं वा येभ्यस्ते (बहु०) **मुक्ताः**—मुक्तस्त्यक्ते मुक्तिगते मुक्ता स्यान्मौक्तिकेऽपि चेति विश्वः मौक्तिकानि मोक्षभागिनो वेति । **गीतिश्छन्दः** श्लेषोत्प्रेक्षाऽलङ्कारौ ।

भगवतो नेत्रशोभां वर्णयति—

अर्पिते रामचन्द्राय चकोरेण स्वलोचने ।
अद्यापि दृश्यते तस्य यच्चन्द्रे नयनार्पणम् ॥३१॥

माधुरी—**चकोरेण** तन्नामकेन पक्षिणा [तृप्तेन भक्तेन च] **स्वलोचने** स्वकीयनेत्रे **रामचन्द्राय** भगवते **अर्पिते** दत्ते **यत्** यतोहि **तस्य चकोरस्य अद्यापि** साम्प्रतमपि **चन्द्रे नयनार्पणम्** नेत्राणां निश्चलीकरणम् **दृश्यते** अवलोक्यते जनैरिति शेषः। (भक्ताः स्वाराध्ये निश्चलां भक्तिं कुर्वन्तीति गूढाशयः)

हिन्दी अनुवाद—चकोर नामक पक्षी ने भगवान् रामचन्द्र को अपने नेत्र समर्पित कर दिये थे क्योंकि उसका चन्द्रमा में नेत्रों का स्थिर करना (चन्द्रमा को बिना पलक मारे देखना) आज भी देखा जाता है। [तृप्त भक्त विश्वविमोहन भगवान् के दर्शन कर अपने नेत्रों को उन्हें अर्पित कर देते हैं तथा संसार की ओर नहीं देखते यह गूढ़ भाव है।]

टिप्पणी—चकोरेण—जीवजीवश्चकोरकः, इत्यमरः √चक् (तृप्तौ) + ओरन् कठिचकिभ्यामोरन् (उणादि० ६७) अनुष्टुप्छन्दः काव्यलिङ्गरूपकालङ्कारौ।

पुनरपि नेत्रशोभां वर्णयति कविः—

एतेन व्यक्तमम्भोजे सीतादयितलोचने।
परदारमुखेन्दौ यत्प्रादुर्भूते निमीलतः ॥३२॥

माधुरी—**सीतादयितलोचने** रामस्य नेत्रे **एतेन** एतस्माद्धेतोः व्यक्तम् स्पष्टरूपेण **अम्भोजे** कमले [स्तः] **यत्** यतः [ते] **परदारमुखेन्दौ** परस्त्रीमुखचन्द्रे **प्रादुर्भूते** उदिते समक्षमागते वा **निमीलतः** निद्रिते भवतः संकुचिते भवतो वा।

हिन्दी अनुवाद—सीतापति के नेत्र इस कारण स्पष्ट रूप से कमल हैं, क्योंकि [वे] पराई स्त्री के मुख रूपी चन्द्रमा के निकलने पर मुँद जाते हैं [संकुचित होते हैं]।

टिप्पणी—परदारमुखेन्दौ—परेषां परे—शत्रूणां परे परकीयाः वा दाराः—परभार्याः तेषां मुखानि इन्दुरिवेति (उप० समासः) भार्या जायाऽथ पुंभूम्नि दाराः स्यात्तु कुटुम्बिनीत्यमरः। अनेन रामस्यैक पत्नीव्रत स्वरूपो वस्तुध्वनिः अनुष्टुप्छन्दः काव्यलिङ्गं रूपकञ्चालंकारौ।

पुनस्तदेव विशिनष्टि—

पद्मं त्वदङ्घ्रिद्युतिचौरमुच्चैः
संवीक्ष्य राजाश्रितवारिदुर्गम्।
पादाहतिप्रापितदीर्घनिद्रम्
लक्ष्म्या वियुक्तं विदधाति सद्यः ॥३३॥

माधुरी—**राजा** चन्द्रो भूपालो वा **पद्मम्** कमलम् **उच्चैः** अत्यधिकम् **त्वदक्षिद्युतिचौरम्** तव नेत्रशोभापहर्तारम् धनापहारकं वा **आश्रितवारिदुर्गम्**—जलरूपे दुर्गे स्थितम् गहनस्थानेऽवस्थितं वा **संवीक्ष्य** दृष्ट्वा **सद्यः** शीघ्रमेव **पादाहतिप्रापितदीर्घनिद्रम्** किरणानाम् आघातैर्विहितसङ्कोचं चरणघातैर्मुकुलितं जीवरहितं वा [कृत्वा] **लक्ष्म्या** कान्त्या सम्पत्या वा **वियुक्तम्** विरहितं **विदधाति** करोति ।

हिन्दी अनुवाद—चन्द्रमा [राजा] कमल को भलीभाँति तुम्हारे नेत्रों की शोभा का अपहर्ता [सम्पत्ति का चोर] जल रूप दुर्ग में स्थित [दुर्गम प्रदेश में वर्तमान] देखकर तुरन्त ही किरणों के आघात [पैरों के प्रहार] से संकुचित [निर्जीव बनाकर] कान्ति [सम्पत्ति] से रहित कर देता है।

(**विशेष तात्पर्य** – चन्द्रमा की किरणों के पड़ने से जलाशय में कमल का निमीलित होना प्रत्यक्ष तथा राजा के द्वारा घाटी आदि दुर्गम प्रदेश में स्थित चोर को मारकर उसका धन ले लेना व्यवहार सिद्ध है।)

टिप्पणी—**राजा**—चन्द्रः कश्चिद्भूपालो वा **पादाहतिप्रापितदीर्घनिद्रम्**—पादानाम् आहतिभिः प्रापिता दीर्घनिद्रा यस्मिन् स तम् (बहु०) दीर्घनिद्रा सर्वथा निमीलनं मृत्युर्वा **लक्ष्म्या वियुक्तम्**—लक्ष्मीः सम्पत्तिकान्तिष्विति धरणिः। **इन्द्रवज्रावृत्तम् श्लेषोरूपकञ्चालङ्कारौ** ।

प्रकारान्तेरणापि नयनशोभां वर्णयति—

गोत्रगुरुस्तव दीधितिमाली
तामरसाय ददौ श्रियमेषः ।
लुण्टसि तामपि यन्नयनाभ्यां
राम सुराज्ञि न तत्त्वयि युक्तम् ॥३४॥

माधुरी—हे राम ! **तव गोत्रगुरुः** भवत्पूर्वजः **एषः** प्रसिद्धः **दीधितिमाली** सूर्यः **तामरसाय** कमलाय [याम्] **श्रियम्** कान्तिं सम्पत्तिम् वा **ददौ यत्** यतः **ताम्** पूर्वदत्तामपि **नयनाभ्याम् लुण्टसि** अपहरसि **तत् सुराज्ञि** सन्नृपतौ **त्वयि** भवति **न युक्तम्** नोचितम् ।

हिन्दी अनुवाद—हे राम ! तुम्हारे वंश के पूर्वज इन भगवान् सूर्य ने कमल को [जो] शोभासम्पत्ति प्रदान की थी, उसे [अपने] नेत्र युगल से [आप] जो लूट रहे हो यह [पूर्वदत्तापहरण रूप कार्य] अच्छे राजा आपके लिये उचित नहीं है।

(**विशेष तात्पर्य**—पूर्वजों के द्वारा प्रदान की गई सम्पत्ति का अपहरण अच्छे राजा के लिये अनुचित होता है।)

टिप्पणी—गोत्रगुरुः—गोत्रं क्षेत्रेऽन्वये छत्रे सम्भाव्ये बोधवर्त्मनोः । वने नाम्नि च गोत्रोऽद्रौ गोत्रा भुवि गवां गणे इति हैमः । गोत्रस्य—अन्वयस्य (वंशस्य) गुरुः—पिता गुरुस्त्रिलिङ्ग्यां महति दुर्जनालघुनोरपि । पुमान्निषेकादिकरे पित्रादौ सुरमन्त्रिणीति विश्वः । **दीधितिमाली**—दीधितीनां मालाऽस्यास्तीति दीधितिमाला+इनि सूत्र 'सुखादिभ्यश्च' (अष्टा० ५।२।१७१) **तामरसाय**—पङ्केरुहं तामरसं सारसं सरसीरुहम् इत्यमरः **सुराज्ञि**—शोभनो राजेति सुराजा तस्मिन् 'नपूजनात्' (अष्टा० ५।४।६९) इति सूत्रेण समासान्तटचो निषेधः । दोधकवृत्तम् व्याजस्तुतिरलङ्कारः ।

कविः श्रीरामस्य केशशोभावर्णनं करोति—

केशव्रजीभूय षडङ्घ्रिसंघा-
स्तद्व्यक्तमेतस्य विभान्ति यस्मात् ।
पुष्पाणि देवः सुरभीणि तेषा-
मामोदहेतोः शिरसा बिभर्ति ॥३५॥

माधुरी—षडङ्घ्रिसंघाः भ्रमरसमूहाः **एतस्य** श्रीरामस्य **केशव्रजीभूय** केशकलापरूपेण **विभान्ति** शोभन्ते, **तद्व्यक्तम्** तत्स्पष्टम् **यस्मात्** येन कारणेन **देवः** श्रीरामः **तेषाम्** भ्रमराणाम् **आमोदहेतोः** सुरभिनिमित्तम् [प्रसन्नतार्थं वा] **शिरसा पुष्पाणि** कुसुमानि **बिभर्ति** धारयति ।

हिन्दी अनुवाद—भँवरों के झुंड इन [श्रीराम] के केशकलाप बन कर सुशोभित हो रहे हैं, यह स्पष्ट है; क्योंकि भगवान् उनके सुगन्ध [या प्रसन्नता] के लिये शिर में फूलों को धारण करते हैं ।

टिप्पणी—षडङ्घ्रिसंघाः—षडङ्घ्रयः षट्पदाः (भ्रमराः) द्विरेफपुष्पलिड्भृङ्ग-षट्पदभ्रमरालयः इत्यमरः तेषाम् संघाः—समूहाः (ष० तत्०) **केशव्रजीभूय**—केशानां व्रजाः इत्यमरः न केशव्रजाः केशव्रजाः भूत्वा इत्यभूततद्भावे च्विः **आमोदहेतोः** आमोदो हर्षगन्धयोरिति विश्वः । इन्द्रवज्रावृत्तम् प्रतीपं रूपकञ्चालङ्कारौ ।

भगवतः किरीटवर्णनं करोति—

किं पद्मरागोपलरोचिरोघः
किं वा विभो बर्हितनूरुहश्रीः ।
कृष्णस्य गोपालनशालिनस्ते
सम्भाव्यते तद्द्वितयं किरीटे ॥३६॥

माधुरी—हे **विभो** ! **किं पञ्चरागोपलरोचिरोघः** सितासितरक्तपीतहरितवर्णानां रत्नानां कान्तिसमूहराशिः **किं वा बर्हितनूरुहश्रीः** मयूरपक्षशोभा [अस्तीति] **कृष्णस्य** श्यामवर्णस्य [नन्दसूनोः] **गोपालनशालिनः** पृथ्वीपतेः [गोरक्षकस्य] ते तव **किरीटे तद्द्वितयम्**—एतद्द्वयम् **सम्भाव्यते** उन्नीयते ।

हिन्दी अनुवाद—हे प्रभो ! श्यामवर्ण [नन्दकुमार] पृथ्वीपति [गोपाल] आपके मुकुट में, क्या [यह] पाँच [श्वेत-कृष्ण-रक्त-पीत-हरित] वर्णों के रत्नों की कान्ति के समूह की राशि है अथवा मयूर के पंखों की शोभा है; ये दोनों सम्भावनायें की जाती हैं ।

टिप्पणी—**कृष्णस्य**—कृष्णः काके पिके वर्णे विष्णौ व्यासेऽर्जुनेकलाविति हेमचन्द्रः । **गोपालनशालिनः**—गौर्नादित्ये बलीवर्दे किरणक्रतुभेदयोः । स्त्री तु स्याद्दिशि भारत्यां भूमौ च सुरभावपीति विश्वः । **पञ्चरागोपलरोचिरोघः**—पञ्चरागाः पञ्चवर्णाः [सितासितरक्तपीतहरिताः] येषु ते (बहु०) उपलास्तेषां रोचिषाम् ओघः कान्तिसमूहो रोचिः शोचिरुभे क्लीबे इत्यमरः । **बर्हितनूरुहश्रीः**—बर्हिणां तनूरुहाणां श्रीः (ष० तत्०) मयूरो बर्हिणो बर्ही नीलकण्ठो भुजङ्गभुगित्यमरः । गरुत्पक्षच्छदाः पत्रं पतत्रं च तनूरुहमित्यमरः । **इन्द्रवज्रावृत्तम् श्लेषः सन्देहोत्प्रेक्षयोः साङ्कर्यम्** ।

श्री रामस्य शरीरशोभां वर्णयति कविः—

तुलयति तनुं सीताभर्तुः सतोयतया तुलाम्
धिगयमिति सक्रोधेनान्तर्ध्रुवं दिवि वेधसा ।
क्षणरुचिगुणव्याजस्वर्णस्फुरत्कशया हतः
स्तनति जलदो मुञ्चत्यम्भः समुद्धृतमम्बुधेः ॥३७॥

माधुरी—**अयम्** (मेघः) **सतोयतया** सजलतया **सीताभर्तुः** वैदेहीवल्लभस्य **तनुम्** देहम् **तुलयति** समानीकरोति **तुलाम्** समानतां **धिक्** (निन्द्या सेति भावः) **ध्रुवम्** निश्चयेन **इति** अनेन हेतुना **अन्तर्दिवि** आकाशे **सक्रोधेन** कुपितेन **वेधसा** ब्रह्मणा **क्षणरुचिगुणव्याजस्वर्णस्फुरत्कशयाऽऽहतः** विद्युद्रश्मिकपटेन स्वर्णताडिन्या ताडितो **जलदो** मेघः **स्तनति** ग`ति **अम्बुधेः** समुद्रस्य **समुद्धृतम्** भुक्तोत्सृष्टम् **अम्भः** जलम् (मूत्रजलम्) **मुञ्चति** उत्सृजति (च) ।

हिन्दी अनुवाद—यह (मेघ) सजल होने के कारण सीतापति (श्रीराम) के शरीर की समानता करता है [ऐसी] समानता को धिक्कार है । निश्चय ही इस कारण आकाश में कुपित ब्रह्मा के द्वारा बिजली की डोर के बहाने सुनहले चमकदार कोड़े से ताड़ित मेघ गर्जन करता है [तथा] समुद्र के पिये गये जल को छोड़ रहा है ।

(विशेष तात्पर्य—जैसे कोई राजा किसी अनुचित कर्म करने वाले प्राणी को कोड़ा से इतना मारता है कि वह रोवे तथा मूत्र-त्याग कर दे तथैव श्रीराम के श्याम-शरीर को अपने समान बनाने के अपराध से ब्रह्मा मेघ को बिजली की लेखा रूप कोड़े से इतना मारता है कि वह गर्जन करता हैं तथा पहिले पिये गये समुद्र के जल को त्याग देता हैं यही उसका रोना तथा मूत्र त्याग करना है।)

टिप्पणी—सतोयतया—तोयेन सहेति सतोयस्तस्य भावस्तया **अन्तर्दिवि**—आकाश इत्यर्थः अन्तः स्वरूपे निकटे प्रान्ते निश्चयनाशयोरिति विश्वः **क्षणरुचिः**—शम्पा-शतह्रदाह्रादिन्यैरावत्यः क्षणप्रभा इत्यमरः (रुचिप्रभे समानार्थे) **कशयाहतः**—कशया+आहतः (दीर्घसन्धि) अश्वोदस्ताडिनी कशेत्यमरः, आहतं गुणिते चापि ताडिते च मृषार्थके। स्यात्पुरातनवस्त्रेऽपि नववस्त्रे वितानके इति हेमचन्द्रः। **समुद्धृतम्**—उद्धृतं स्यात्त्रिषूत्क्षिप्तं भुक्तोज्झितमुद्धृतमिति विश्वः। समुद्धृतं भुक्तोत्सृष्टमिति धरणिः (अन्योऽपि-कश्चित्कशादिहतः सन्नादौ भुक्तं पश्चादुत्सृष्टं तदेव समुद्धृतं वस्तुतस्तु मूत्रजलं मुञ्चतीत्यर्थः। हरिणीच्छन्दः प्रतीपमपह्नुतिश्चैतयोः साङ्कर्यम्।

श्रीरामस्य केशसौन्दर्यं वर्णयति कविः—

कलयसि गतिमुत्तमां गजानाम्
दधदसितं चयमुत्तमांगजानाम्।
तुलितदिनकरस्तवप्रताप-
स्त्वमसि गुणौघनिरस्तवप्रतापः ॥३८॥

माधुरी—[हे राम !] **उत्तमाङ्गजानाम्** केशानाम् **असितम्** श्यामं **चयम्** समूहम् **दधत्** धारयन् [त्वम्] **गजानाम्** हस्तिनाम् **उत्तमाम्** श्रेष्ठाम् **गतिम्** गमनम् **कलयसि** गच्छसि। **तव प्रतापः तुलितदिनकरः** सूर्यसम इत्यर्थः, **त्वम् गुणौघनिरस्तवप्रतापः** गुणानां समूहेन दूरीकृतपितृशोको ऽसि।

हिन्दी अनुवाद—[हे राम !] श्यामवर्ण के केशकलाप को धारण करते हुये आप गजों की श्रेष्ठ गति से चलते हो। तुम्हारा प्रताप सूर्य की समता करता है [तथा] तुम सद्गुणगण से (सीता हरण रूप) पितृशोक को दूर करने वाले हो।

टिप्पणी—उत्तमाङ्गजानाम्—उत्तमाङ्गं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रिया मित्यमरः उत्तमाङ्गे जाता इत्युत्तमाङ्गजाः केशास्तेषाम् **गुणौघनिरस्तवप्रतापः**—गुणानाम् ओघस्तेन निरस्तः—दूरीकृतः वप्रस्य पितुस्तापो येन सः (बहु०) वप्रः पितरि केदारे वप्रः प्राकाररोधसोरित्यमरः **कलयसि**—√कल् (गतौ संख्याने च)+लट् (प्र० पु० ए० व०) **पुष्पिताग्रावृत्तम् यमकमुपमाव्यतिरेकयोः संसृष्टिश्च।**

अथ श्रीरामास्त्रवर्णना

रणस्थलाय प्रस्थिते रामे शत्रूणां पलायनं वर्णयति कविः—

कराकलितकार्मुके त्वयि रणाय बद्धोद्यमे
नृप प्रतिमहीपतिस्त्यजति दुर्गमप्यूर्जितम् ।
तपर्तुमरुदीरिते ज्वलति दावधूमध्वजे
जहाति शिखरं गिरेरुदितसाध्वसः केशरी ॥३९॥

माधुरी—हे नृप ! राजन् ! **कराकलितकार्मुके** हस्तगृहीतचापे **त्वयि** भवति **रणाय** युद्धाय **बद्धोद्यमे** यतमाने [सति] **प्रतिमहीपतिः** शत्रुनृपतिः **ऊर्जितम्** साधन-सम्पन्नम् **अपि दुर्गं त्यजति । तपर्तुमरुदीरिते** ग्रीष्मवायुप्रेरिते **दावधूमध्वजे** दावाग्नौ **ज्वलति** [सति] **उदितसाध्वसः** जातभयः **केशरी** सिंहः **गिरेः** पर्वतस्य **शिखरम् जहाति** त्यजति ।

हिन्दी अनुवाद—हे राजन् ! हाथ में धनुष् लिये हुये आपके युद्धार्थ उद्योग करने पर शत्रु राजा साधन सम्पन्न भी दुर्ग को त्याग देते हैं । ग्रीष्म की हवा (लू) से प्रेरित दावाग्नि (जंगल की आग) के जलने पर, सिंह पर्वत के शिखर को त्याग देता है ।

टिप्पणी—**करा कलितकार्मुके**—करेणाकलितं गृहीतं कार्मुकं चापो येन स तस्मिन् (बहु०) धनुश्चापौ धन्वशराशनकोदण्डकार्मुकम् इत्यमरः **ऊर्जितम्**—ऊर्जः सञ्जातोऽस्येति ऊर्जो बले तथोत्साहे ऊर्जो मासश्च कार्तिके इति कोषः **तपर्तुः**—निदाघ उष्णोपगम उष्ण ऊष्मागमस्तपः इत्यमरः **दावधूमध्वजे**—धूमध्वजो हव्यवाडित्यभिधान-रत्नमालायाम् । **पृथ्वीच्छन्दो दृष्टान्तालङ्कारः भावध्वनिः ।**

रघुपतिना निशाचराणामसकृद्विनाशं व्यतिरेकमुखेन वर्णयति—

निरस्तवानमरविरोधिवाहिनीः
पिताऽस्य यः स दशरथोऽपि विश्रुतः ।
पदातिना रघुपतिना निबर्हिता
निशाचराः सह बहुभिर्बलैर्मुहुः ॥४०॥

माधुरी—अस्य श्रीरामस्य पिता **दशरथः** दशरथनामकः [दशरथानां स्वामी], **यः** [इन्द्रहिताय] **अमरविरोधिवाहिनीः** असुरसेनाः **निरस्तवान्** पराजितवान्; **सोऽपि**

विश्रुतः प्रसिद्धः । रघुपतिना श्रीरामेण पदातिना पदगामिना [एव] बहुभिः बलैः सह निशाचराः राक्षसाः मुहुः असकृत् निर्वहिताः हताः । (पितुरभ्यधिकः शूर इति ध्वनिः ।)

हिन्दी अनुवाद—इन [श्रीराम] के पिता दशरथ, [दश रथों वाले] जिन्होंने [इन्द्र के लिये] असुरों की सेनाओं को पराजित किया था; वे भी प्रसिद्ध हैं । श्रीराम ने पैदल ही बहुत सैनिकों सहित राक्षसों को बार-बार मारा । (राम अपने पिता से भी अधिक वीर हैं यह व्यञ्जना है ।)

टिप्पणी—**दशरथः**—दशरथनामको महाराजः, दश रथा यस्य सः इति वा महावीरः **पदातिना**—पदाभ्याम् अतति—गच्छतीति तच्छीलः पद √अत् (सातत्यगमने) + णिनि । अतिरुचिराच्छन्दः, श्लेषव्यतिरेकालङ्कारौ ।

श्रीरामस्यासिप्रहारपरिणामं वर्णयति—

> **लोठयत्यवनिमण्डले शिरः-**
> **सैंहिकेयमचिरेण विद्विषः ।**
> **चन्द्रहासकर एष भूपति-**
> **श्चेष्टते तदुचितं यदात्मनः ॥४१॥**

माधुरी—चन्द्रहासकरः खड्गहस्तः [राहुमर्दनात् चन्द्रस्य सुखकरो वा एष भूपतिः श्रीरामः आत्मनो यत् उचितम् प्रथानुरूपम् तत् चेष्टते कुरुते [तथा] अचिरेण शीघ्रमेव विद्विषः शत्रोः शिरःसैंहिकेयम् शिरोरूपं राहुम् अवनिमण्डले लोठयति प्रतिघातयति ।

हिन्दी अनुवाद—हाथ में तलवार लिये हुये [अथवा राहु के नाश से चन्द्रमा को सुख देने वाले विष्णु] ये महाराज श्रीराम जो [शत्रुहनन] अपनी प्रथा के अनुरूप है, वह करते हैं [तथा] शीघ्र ही शत्रु के मस्तक रूप राहु को पृथ्वी मण्डल में लुढ़का देते हैं ।

टिप्पणी—**चन्द्रहासकरः**—चन्द्रहासः खड्गः करे यस्य सः (बहु०) चन्द्रहासो रावणासिरसिमात्रे च कथ्यते इति धरणिः अथवा राहुमर्दनाच्चन्द्रस्य हासं करोतीति चन्द्र हस् + अच् (उपपद०) रथोद्धतावृत्तम् श्लेषोरूपकञ्चालङ्कारौ ।

रामबाणानां प्रभावं वर्णयति—

रघुपतिविशिखव्रणप्रसूनै-
र्गुरुभिरलङ्गमिताः क्षितिं विरेजुः ।
रणसमयमधावपेतपत्राः
प्रचुरपरागपरागताः पलाशः ॥४२॥

माधुरी—**रणसमयमधौ** युद्धकालरूपिणि वसन्तकाले **प्रचुरपरागपरागताः** प्रचुरेण परागेण रणरेणुना पुष्परजसा वा परागताः व्याप्ताः **अपेतपत्राः** वाहनरहिताः पत्रहीनाः वा **पलाशाः** राक्षसाः किंशुकवृक्षा वा **गुरुभिः** गहनैः भारयुक्तैर्वा **रघुपतिविशिखव्रणप्रसूनैः** रामबाणकृतक्षतैः रक्तकुसुमैर्वा कृत्वा **क्षितिं गमिताः** पृथ्वीं प्रापिताः (सन्तः) अलम् अत्यन्तं **विरेजुः** शोभिताः बभूवुः ।

हिन्दी अनुवाद—युद्धकालरूपी वसन्त काल में रण की धूलि से व्याप्त [पुष्परज से व्याप्त] वाहनों से रहित [पत्तों से हीन] राक्षस [किंशुक वृक्ष] श्रीराम के बाणों द्वारा किये गये गम्भीर घाव रूपी भारी पुष्पों के कारण धरती में गिराये गये [पहुँचाये गये] अत्यन्त शोभित हुये ।

(**विशेष तात्पर्य**—जैसे वसन्त में पराग से व्याप्त, पत्रविहीन पलाशवृक्ष फूलों के बोझ से धरती तक नवाये जाने पर शोभित होते हैं तथैव युद्धकाल में रण की धूलि से व्याप्त वाहनों से रहित राक्षस श्रीराम के बाणों के गम्भीर घावों के कारण धरती पर गिराये गये शोभित हुये ।)

टिप्पणी—**अपेतपत्राः**—अपेतानि पत्राणि वाहनानि येषां ते राक्षसाः, अपेतानि पत्राणि छादनानि येभ्यस्ते वृक्षाः पत्रं वाहनपक्षयोरित्यमरः **पलाशः**—पलाशो हरितो ज्ञेयः पलाशः किंशुकः सटी । पलाशाः राक्षसाः प्रोक्ताः पलाशं पत्रमुच्यते । पलं मांसमश्नन्तीति पलाशाः राक्षसाः पुष्पिताग्रा छन्दः श्लेषो यमकं रूपकञ्चालङ्काराः ।

राक्षसेषु श्रीरामेण कृतं बाणपातनं वर्णयति—

रोषस्तवकारुणिते
पथिकाहितसाध्वसे पलाशगणे ।
रघुपतिधनुर्लतायाः
शिलीमुखाः पेतुरस्रमधुलुब्धाः ॥४३॥

माधुरी—**रघुपतिधनुर्लतायाः** श्री रामस्यधनुषो निर्गत्य लतायाश्चोत्पत्य **अस्रमधुलुब्धा** रक्तलुब्धाः मधुलुब्धाः वा **शिलीमुखाः** बाणाः मधुकराः वा **रोषस्तवकारुणिते**

रोषसमूहरञ्जिते रोषवद्रक्तपुष्पगुच्छारुणीकृते पथिकाहितसाध्वसे रौद्रतया प्रियजनानिष्टशंकया वा पथिकानां भयप्रदे पलाशगणे राक्षसगणे किंशुकवृक्षवने वा पेतुः न्यपतन् ।

हिन्दी अनुवाद—श्रीराम के धनुष् रूपिणी लता से निकलकर [उड़कर] रक्त के लोभी [पुष्परस के प्रेमी] बाण [भ्रमर] रण के महान् उत्साह से लाल [रोष के समान लाल वर्ण के गुच्छों से रञ्जित] [भयानकता से अथवा प्रियजन के अनिष्ट की शंका से] पथिकों को भयभीत करने वाले राक्षस गण [किंशुक वृक्षों के वन] के ऊपर गिरे ।

(**विशेष तात्पर्य**—जैसे भ्रमर लाल फूल के गुच्छों से भरे टेसू फूल के जंगल में टूट पड़ते हैं तथैव श्री राम के बाण रण की उमंग से रंञ्जित राक्षस गण के ऊपर गिरे। क्रोध का रंग लाल माना गया है अतएव वह टेसू का उपमान हो सकता है ।)

टिप्पणी—रोषस्तवकारुणिते—रोषवत् स्तवकं रोषस्य स्तवकं वा अरुणो व्यक्तरागेऽर्के सन्ध्यारागेऽर्कसारथाविति हैमः पलाशगणे—राक्षसानां किंशुकानां वा गणे (ष० तत्०) शिलीमुखाः बाणाः पक्षे भ्रमराः अलिबाणौ शिलीमुखावित्यमरः । अस्रमधुलुब्धाः—अस्रं वाष्पं जलं रक्तमस्रः शिरसिजः स्मृतः इति धरणिः, मधु मद्ये मधु क्षौद्रे दुग्धे पुष्परसे जले मधुश्चैत्रे मधूके च मधुर्दैत्यवसन्तयोरिति । गीतिश्छन्दः श्लेषरूपकावलङ्कारौ ।

श्रीरामस्य खड्गेन समरे तदर्थं कीर्तिसमुपार्जनमाह—

तव कीर्तिमरालावलि-
रसिलूनशिरोविरोधिमुखपद्मैः ।
रमणीये नृप समर-
क्षितितलकमलाकरे समुल्लसति ॥४४॥

माधुरी—हेनृप ! तव भवतः कीर्तिमरालावलिः कीर्तिहंसपङ्क्तिः असिलूनशिरोविरोधिमुखपद्मैः [त्वदीय-] खड्गकृत्तानि शिरांस्येव शत्रुमुखपद्मानि तैः रमणीये शोभिते समरक्षितितलकमलाकरे रणभूमितलमेव कमलाकर स्तडाग स्तस्मिन् समुल्लसति शोभते ।

हिन्दी अनुवाद—महाराज ! आपकी कीर्तिरूपिणी हंसपङ्क्ति [आपकी] तलवार से काटे गये [शत्रुओं] के शिरोरूप शत्रुमुखकमलों से सुन्दर रणस्थल रूप (कमलों से भरे गहरे) तालाब में विलसित हो रही है ।

टिप्पणी—कीर्तिमरालावलिः—कीर्तिरेव मरालानाम् आवलिः श्वेततया,

सुन्दरतयोभयोः साम्यम् । कमलाकरे—पद्माकरस्तडागोऽस्त्रीत्यमरः । गीतिश्छन्दः, अनुप्रासो रूपकञ्चालङ्कारौ ।

श्रीरामस्य पर्वतसाम्येऽपिन पर्वततेति वक्ति—

न दरीसविधस्थितद्विजिह्वो
न हिमानीजनितव्यथः प्रजानाम् ।
न महासुरदारुणाश्रितश्चे-
दसि गोत्राधिपतिः कथं न विद्मः ॥४५॥

माधुरी—[हे राम ! त्वम्] **चेत्** यदि **गोत्राधिपतिः** वंशश्रेष्ठो राजा पर्वतश्रेष्ठो वा **असि** भवसि [तर्हि वयम्] **कथं न विद्मः** जानीमः (अवगच्छाम एवेत्यर्थः ।) [राजपक्षे त्वम्] **न दरी** भयरहितः [न] **सविधस्थितद्विजिह्वः** निकटस्थितखलः **न हि मानी** गवयुक्तः [नच] **प्रजानां** जनानां **जनितव्यथः** कष्टप्रदः **न महासुरदारुणाश्रितः** महाऽसुरेषु ये दारुणाः हिरण्यकशिपुप्रभृतय स्तैराश्रितः सेवितः (महाऽसुराः विष्णुं नाश्रयन्ति स्म) [पर्वतपक्षे] **न दरीसविधस्थितद्विजिह्वः** कन्दरासु निकटवर्तिसर्पः **न प्रजानां हिमानीजनितव्यथः** हिमानी हिमसंहतिस्तया जनानां कष्टकारकः **न महासुरदारुणाश्रितः** महासुरदारुर्देवदारुस्तेनाश्रितोऽधिष्ठितः (त्वं गोत्राधिपतिः राजाऽसि न गोत्राधिपतिः पर्वत इति भावः ।)

हिन्दी अनुवाद—[हे राम ! आप] यदि गोत्राधिपति (वग में श्रेष्ठ राजा या महापर्वत) हो तो [हम] कैसे नहीं जानते ? (अर्थात् जानते हैं ।) (राजा के पक्ष में) [आप] भय से तथा समीप में रहने वाले दुष्टों से रहित हो । (आप) गर्वयुक्त नहीं हो, न प्रजा को कष्ट देते हो [तथा] अतितीक्ष्ण हिरण्यकशिपु आदि असुर आपका आश्रय नहीं लेते ।

(पर्वत के पक्ष में) न तुम्हारे कन्दरायें तथा (उनके) निकटवर्ती सर्प स्थित हैं न हिमसमूह से प्रजा को कष्ट देते हो, न बड़े देवदारु नामक वृक्ष ही तुम्हारे ऊपर हैं । [अतः आप गोत्राधिपति राजा हो, गोत्राधिपति पर्वत नहीं हो यह भाव है ।]

टिप्पणी—**न दरी**—दरोऽस्यास्तीति दरी—भयसहितस्तादृशो न भवतीति न दरी कन्दरा वा, दरोऽस्त्री साध्वसे गर्त्ते कन्दरातुदरीस्मृता । **द्विजिह्वः**—द्विजिह्वौ सर्पसूचकावित्यमरः । **मानी**—मानं प्रमाणे प्रस्थादौ मानश्चित्तोन्नतौ ग्रहे इति हैमः **गोत्राधिपतिः**—गोत्रं नामान्वयो गोत्रं गोत्रश्च धरणीधरः **मालभारिणीच्छन्दः यमकालङ्कारः ।**

श्री रामस्य गजसादृश्यं वर्णयति—

नागवल्लीरसज्ञोऽसि न दानोदयदुर्बलः ।
अनेकपतयैव त्वं विख्यातो राजकुञ्जरः ॥४६॥

माधुरी—[हे राम !] त्वम् **नागवल्लीरसज्ञः** ताम्बूलीरसाभिज्ञः असि राजगजस्तु **न अगवल्ली रसज्ञः** [प्रासादे निवासात्] पर्वतलतानां रसाभिज्ञो न भवति [तथा] **न दानोदयदुर्बलः** दानसमये न दुर्बलो बद्धमुष्टि र्न गजस्तु मदजलस्रुतिकाले दुर्बलः क्षीणो भवति [केवलम्] **अनेकपतयैव** बहुजनपालकत्वेन **अनेकपः** अनेकपनाम्ना च **राजकुञ्जरः** राजवारणो **विख्यातः** प्रसिद्धोऽसि ।

हिन्दी अनुवाद—[हे राम !] आप ताम्बूल के रस के आस्वादन कर्ता हैं [आपका हाथी (राजप्रासाद में रहने से) पर्वतीय लताओं का रसज्ञ नहीं है । तथा आप] दान करते समय दुर्बल (मूठी बाँधे हुये) नहीं रहते [परन्तु गज मदजल के स्रवण काल में क्षीण हो जाता है । [केवल] अनेक प्राणियों का पालन करने [अनेकप नाम] के कारण तुम राज कुञ्जर विख्यात हो ।

(**विशेष तात्पर्य**—अन्य विशेषणों का साम्य न होने पर भी श्रीराम बहु पालक होने से यौगिक रूप में 'अनेकप' हैं तथा गज का पर्याय 'अनेकप' है यह साम्य है ।)

टिप्पणी—**नागवल्ली**—ताम्बूलवल्ली ताम्बूली नागवल्ल्यपीत्यमरः न+अगवल्ली वा **दानोदयदुर्बलः**—दानस्योदये दुर्बलः दानं त्यागे मदेऽपिचेत्यमरः । **अनेकपतयैव**—दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो द्विप इत्यमरः । अनुष्टुप्छन्दः श्लेषालङ्कारः ।

श्रीरामस्य कामसादृश्यं गजसादृश्यञ्चाह—

श्यामोर्जितशृङ्गारः
स्फुरदुरुदानोऽभिनन्दितकरेणुः ।
पुष्करचारुकरश्री-
र्यदसि तवेभस्य तन्नृप न चित्रम् ॥४७॥

माधुरी—हे नृप ! भो राम ! **इभस्य** कामसदृशसुन्दरस्य **तव** राजश्रेष्ठस्य **तत्** वक्ष्यमाणं सर्वं **चित्रम्** आश्चर्यकरं **न यत्** [त्वम्] **श्यामोर्जितशृङ्गारः** श्यामवर्णः उत्कृष्टशृङ्गारश्च [कामोऽपि श्यामवर्णः ऊर्जितः शृङ्गारो यस्य तादृशो भवति] **स्फुरदुरुदानः** बहुवितरणशीलो बहुशत्रुशिरःकर्त्तनकारी [कामोऽपि मानिनीमानखण्डको भवति] **अभिनन्दितकरेणुः** आनन्दितगजः [कामोऽपि करेणूनाम्—हस्तिनीनामानन्दको

भवति] **पुष्करचारुकरश्रीः** पुष्करनाम्ना हस्तचिह्नविशेषेण शोभितः [कामोऽपि पुष्करेण-कमलबाणेनोर्जितहस्तशोभो भवति] **असि विलससि** ।

अथवा हे राम ! **तवेभस्य** तव इभस्य हस्तिनो **यद् वैशिष्ट्यं तन्न चित्रम्** तथाहि सः गजः श्यामवर्ण ऊर्जितशृङ्गारो भवति, तस्मिन् बहु मदजलं शोभते, स हस्तिनीरानन्दयति पुष्करेण—शुण्डाग्रेण तस्य करस्य शोभा वर्धते ।

हिन्दी अनुवाद्—हे राम ! काम सदृश कान्ति वाले आपका यह सब (वक्ष्यमाण) वैशिष्ट्य आश्चर्य कारक नहीं है (अर्थात् स्वाभाविक है ।) जो आप श्याम वर्ण के तथा श्रेष्ठ शृङ्गार से सम्पन्न, [श्याम वर्ण का तथा श्रेष्ठ सजावट वाला] अति दान शील अथवा बहु संख्यक शत्रुओं के शिरों को खण्डित करने वाले, [मानिनी स्त्रियों के मान को नष्ट करने वाला ।] गजों के आनन्ददायक, [हस्तिनीसंज्ञक नायिका को हर्षित करने वाला ।] हाथ में कमल के चिह्न से सुशोभित [कमल का बाण हाथ में लेने से अति सुन्दर] हैं । [कामदेव है ।]

अथवा हे राम ! तुम्हारे हाथी का वैशिष्ट्य आश्चर्य कारक नहीं है वह हाथी भी श्याम वर्ण का सजा हुआ है, उसमें प्रचुर मद जल शोमित हो रहा है, वह हथिनियों को हर्षित करता है तथा सूँड़ की नोक से उसकी (सूँड़ की) शोभा और बढ़ जाती है ।

टिप्पणी—श्यामोर्जितशृङ्गारः—श्यामः श्यामवर्णः स चासावूर्जितशृङ्गारः ऊर्जितः शृङ्गारो यस्य सः (बहु०) **स्फुरदुरुदानः**—स्फुरत् उरु प्रचुरं श्रेष्ठं वा दानं (राजपक्षे) वितरणं (राजपक्षे शत्रूणाम् शिरसां कामपक्षे मानिनीनां मानस्य) खण्डनं (गजपक्षे मदजलं) वा यस्य सः । **अभिनन्दितकरेणुः**—अभिनन्दिता करेणुः (राजपक्षे हस्ती कामपक्षे हस्तिनी नारी गजपक्षे हस्तिनी) येन सः करेणुः करिणी गजौ । हस्तिनी नारी कामोत्सुका भवति यथा चोक्तम्—'स्थूलाधरा स्थूलनितम्बबिम्बा स्थूलाङ्गुलिः स्थूलकुचा सुशीला । कामोत्सुका गाढरतिप्रिया च नितान्तभोक्त्री खलु हस्तिनी स्यात् ।' **पुष्करचारुकरश्रीः**—पुष्करेण (क्रमशो हस्तचिह्नेन, कमलबाणेन, शुण्डाग्रेण वा) चार्वी करस्य श्री र्यस्य सः **इभस्य**—इः कामस्तस्य भा इव भा यस्य स तस्य कामवत्कान्तस्य यद्वा इभः हस्ती (√इण् गतौ + भ) । **गीतिश्छन्दः श्लेषोपमयोः साङ्कर्यम्** ।

रामराज्ये प्रजानां सौख्यं वर्णयति—

आषाढे धरणीभृति भद्रश्रीखण्डभूषिते भवति ।
विद्रावितद्विजिह्वे सन्निहिते न प्रजासु परितापः ॥४८॥

माधुरी—हे **भद्र** ! कल्याणकारिन् ! आषाढे मासि मलये वा **श्रीखण्डभूषिते** चन्दनालङ्कृते **विद्रावितद्विजिह्वे** दूरीकृतसूचके दूरीकृतसर्पे **भवति धरणीभृति** राज्ञि पर्वते **सन्निहिते** समीपस्थे सति **प्रजासु परितापो** जनेषु सन्तापो न (अस्तीति शेषः)

हिन्दी अनुवाद—हे भद्र ! आषाढ़ के महीने में चन्दनालङ्कृत, पिशुनों को दूर किये हुये आप राजा के समीपस्थ होने पर प्रजा में सन्ताप नहीं होता है। चन्दनालङ्कृत साँपों को दूर किये हुये मलय पर्वत के समीपस्थ होने पर प्रजा में सन्ताप नहीं होता है। (वर्षा काल में सर्प मलय पर्वत से हिमालय चले जाते हैं यह वैद्यक शास्त्र में कहा गया है।)

टिप्पणी—आषाढे—आषाढो मासभेदे स्यान्मलयाद्रौ च कथ्यत इति धरणिः **भद्रश्रीखण्डभूषिते**—[रामपक्षे] भद्र इति सम्बोधने श्रीखण्डश्चन्दनोऽस्त्रियाम् [मलयपक्षे] भद्रश्रीश्चन्दनस्तस्य खण्डः समूहस्तेन भूषिते **विद्रावितद्विजिह्व**—विद्राविताः द्विजिह्वाः [रामपक्षे] सूचकाः [मलयपक्षे] सर्पा यस्मात् स तस्मिन् द्विजिह्वौ सर्पसूचकावित्यमरः **वैद्यकशास्त्रे इत्युक्तम्**—मलये सहस्रवर्षपर्यन्तवासिनः सर्पाः सपक्षाः भवन्ति ते आषाढ़े उड्डीय हिमवन्तं यान्ति, अतश्चातुर्मास्यरात्रिषु सुप्तानामुपरितेषां गमनं सम्भवति तस्मान्निरावरणशयनं न कार्यमित्यर्थः। **गीतिश्छन्दः श्लेषो रूपकञ्चालंकारौ।**

हंसरूपिणं श्रीरामं स्तौति—

> **अयशोजलदाहितोरुभीति-**
> **र्दयितोदारयशःसुरापगौघः।**
> **कमलाकरसेवितारुणाङ्घ्रि-**
> **र्जनकर्णामृतगीः स्फुटोऽसि हंसः ॥४६॥**

माधुरी—[हे राम त्वम्] **अयशोजलदाहितोरुभीतिः** [विजययात्रायाः प्रतिबन्धकत्वात्] अयश एव जलदस्तेनाहिता कृतोरुभीति र्बहुभयं यस्य सः (बहु०) [हंसोऽपि जलदभीतो मानसरोवरं गच्छति] **दयितोदारयशःसुरापगौघः** दयितः प्रियः यशः एव [हंस पक्षे] यशोवत् सुरापगायाः गङ्गाया ओघः यस्य सः (बहु०) **कमलाकरसेवितारुणाङ्घ्रिः** कमलाकराः राजानस्तैः [हंसपक्षे कमलसमूहेन] सेवितेऽरुणाङ्घ्री यस्य सः (बहु०) **जनकर्णामृतगीः** जनानां कर्णेषु अमृतवन्मधुरा गीर्वाणी यस्य सः [हंसपक्षेऽप्येवम्] स्फुटः प्रत्यक्षम् हंसः राजा हंसनामकः पक्षी वा असि। [विशेषणसाम्यात् रामस्य विष्णुत्वमभिव्यज्यते।]

हिन्दी अनुवाद—[हे राम ! विजययात्रा का प्रतिबन्धक होने से] अयश रूपी जलद से डरने वाले, [हंस भी मेघ से डरता है] यशस्स्वरूप गङ्गाजल के प्रेमी, राजाओं से [हंस के पक्ष में कमल समूह से] सेवित हैं लाल चरण जिनके ऐसे, [तथा] जिनकी वाणी श्रोतृगण के कानों में, सुधावत् पड़ती है इस प्रकार के आप प्रत्यक्ष ही हंस हैं। [विशेषणों की समता से राम का विष्णु होना भी व्यक्त होता है।]

टिप्पणी—**हंसः**—हंसो राजा विष्णुः पक्षिविशेषश्च हंसो लोभपराङ्मुखे नरपतौ हंसो विहंगान्तरे इति धरणिः **सुरापगौघः**—सुरापगायाः ओघः (ष० तत्०) सुराणाम् आपगा नदी स्रवन्ती निम्नगाऽऽपगेत्यमरः ओघो वृन्देऽम्भसां चये इत्यमरः **अमृतगीः**—अमृतं यज्ञशेषेस्यात्पीयूषे सलिले घृते अयाचिते च मोक्षे च ना धन्वन्तरिदेवयोः । (विष्णुरपि निद्राकारणाज्जलदाद्बिभेति, नरवान्निर्गतायाः गंगायास्तोयं तस्य प्रियं भवति, कमलायाः कराभ्यां तदीयारुणचरणौ सेव्येते इति श्रीरामस्य विष्णवोश्चैक्यरूपो ध्वनिः) **मालभारिणी छन्दः श्लेषरूपकालङ्कारौ ।**

श्रीरामस्य करे खड्गशोभां वर्णयति—

करपुष्करमाश्रितोऽद्भुतस्ते
नृप धाराधर एष युध्यतो यः ।
स्वयमाहितया कबन्धवृद्ध्या
ज्वलयत्याजिवने प्रतापवह्निम् ॥५०॥

माधुरी—हे नृप ! **युध्यतः** युद्धं कुर्वाणस्य **ते करपुष्करम्** करकमलम् [आकाशम्] **आश्रितः एषः** प्रसिद्धः **धाराधरः** खड्गो मेघो वा **अद्भुतः** आश्चर्यकरः [अस्ति] **यः स्वयम् आहितया** एकत्रकृतया **कबन्धवृद्ध्या** तुण्डबाहुल्येन जलप्राचुर्येण वा **आजिवने** संग्रामे वृक्षसमूहे वा **प्रतापवह्निम्** प्रतापानलम् **ज्वलयति** समिद्धं करोति । धाराधरेणाग्निप्रज्ज्वलनम् विस्मयकरमिति भावः ।

हिन्दी अनुवाद—हे राजन् ! युद्ध करते हुये तुम्हारे करकमल में स्थित यह तलवार [आकाश में स्थित मेघ] विस्मयकारक है, जो स्वयम् एकत्र किये गये धड़ों की प्रचुरता [जल की अधिकता] से संग्राम [वृक्ष समूह] में प्रताप रूपी अग्नि को प्रज्ज्वलित करता है। [मेघ के द्वारा अग्नि जलाना विस्मयकारक है।]

टिप्पणी—**करपुष्करम्**—करः पुष्करमिवेत्युपमितसमासः विसप्रसूनराजीवपुष्कराम्भोरुहाणि च तथा व्योम पुष्कर मंबर मित्यमरः **धाराधरः**—धाराधरो जलधरः इत्यमरः धाराधरः खड्गो मेघश्चेति **कबन्धवृद्ध्या**—कबन्धानां शिरोरहितानां कबन्धस्योदकस्य वा वृद्ध्या बाहुल्येन कबन्धमुदकं पाथः कबन्धं सलिलं तुण्ड मिति शाश्वतः कं सुखं बध्नातीति **कबन्धः आजिवने** आजिः समावनौ युद्धे इति धरणिः । **मालभारिणी छन्दः श्लेषो रूपकञ्चालङ्कारौ ।**

पुनः श्रीरामस्य खड्गशोभां वर्णयति—

पाणिच्छद्मारविन्दव्यतिकररुचिरा कीर्तिहंसावतंसा
तेजोमार्त्तण्डमाखण्डलमणिशकलश्यामलोल्लासयन्ती ।
एषा निस्त्रिंशलेखादिवसकरसुता भाति ते भूमिजाने
यद्धारामेत्य नश्यन्त्यनुदिनमसुहृद्वाहिनीजीवनानि ॥५१॥

माधुरी—हे भूमिजाने महीपते ! ते तव **एषा** (विशिष्टा) **पाणिच्छद्मारविन्दव्यतिकररुचिरा** पाणेश्छद्मना कमलस्य व्यतिकरेण रुचिरा करकैतवेन कमल-सम्पर्करम्या **कीर्तिहंसावतंसा** कीर्तिरेव हंसः सोऽवतंसो कर्णभूषणं यस्याः सा (बहु०) **आखण्डलमणिशकलश्यामला** इन्द्रनीलमणिखण्डवत्श्यामवर्णा **तेजोमार्त्तण्डम्** प्रताप-रूपिणं सूर्यम् **उल्लासयन्ती** प्रकाशयन्ती **निस्त्रिंशलेखादिवसकरसुता** खड्गधारारूपिणी-यमुना **भाति** शोभते **यद्धाराम्** यस्य खड्गस्य यस्या यमुनाया वा **धाराम् एत्य** आगत्य **अनुदिनम्** प्रतिदिनम् **असुहृद्वाहिनीजीवनानि** शत्रुसेनायाः प्राणाः प्राणहराणि पर्वतनदी-जलानि वा नश्यन्ति ।

हिन्दी अनुवाद—हे पृथ्वीपते ! तुम्हारी यह (विशिष्टा), हाथ के बहाने से कमल के सम्पर्क से रम्य, यशःस्वरूप हंस को कर्णभूषण बनाये हुये, इन्द्रनीलमणिशिला की तरह श्यामल, प्रतापरूपी सूर्य को प्रकाशित करती हुई, खड्ग की धार रूपिणी यमुना सुशोभित हो रही है; जिसकी धारा में पहुंचकर प्रतिदिन शत्रु-सेना के प्राण [यमुना नदी पक्ष में पहाड़ी नदियों के प्राण हारक जल] नष्ट होते हैं ।

टिप्पणी—**अवतंसः**—उत्तंसोऽप्यवतंसश्च कर्णपूरे च शेखरे इति धरणिः **शकलम्**—शकलं कल्कले खण्डे शकलं रागवस्तु चेति धरणिः **निस्त्रिंशलेखा**—खड्गेतु निस्त्रिंशचन्द्रहासासिरिष्टयः इत्ययरः वीथ्यालिरावलिः पङ्क्तिः श्रेणी लेखास्तु राजयः इत्यमरः **भूमिजाने**—भूमिर्जाया यस्य सः तत्सम्बोधने (बहु०) **असुहृद्वाहिनीजीवनानि**—असुहृद् न सुहृदिति शत्रुः असून् हरतीति प्राणहरः असुहृदां वाहिनीनां सेनानां जीवनानि प्राणाः अथवा असुहृदः वाहिनीनां पर्वतनदीनां जीवनानि जलानि वाहिनीसिन्धुसेनयोरिति रभसः, जलम्.........जीवनं भुवनं वनमित्यमरः स्रग्धरावृत्तम् रूपकालङ्कारः । [विशेषः—पाठान्तरम् नश्यन्त्यसुहृदवनिभृद्वाहिनीति मुख्यः पाठः अवनिभृद्राजा पर्वतश्चेति] ।

पुनरपि खड्गं विशिनष्टि—

तवासिरायसं वर्मच्छित्वाऽरातिं द्विधाऽकरोत् ।
राजन्निसर्गतीक्ष्णस्य कुतो ज्ञातेयगौरवम् ॥५२॥

माधुरी—हे राजन् ! तव असिः (लोहनिर्मितः) खड्गः आयसंवर्म लोहनिर्मितं कवचं छित्वा भित्त्वा अरातिं शत्रुं द्विधा भागद्वये विभक्तम् अकरोत् । निसर्गतीक्ष्णस्य स्वभावतः कुटिलस्य [लोहस्य] ज्ञातेयगौरवम् बन्धुतासद्भावः कुतः (न भवतीतिभावः) ।

हिन्दी अनुवाद—हे राम ! आपकी (लोहनिर्मित) तलवार ने लोहे का कवच चीर कर शत्रु के दो खण्ड कर दिये । स्वभाव से तीक्ष्ण (लोह) में बिरादरी का बड़प्पन कहाँ हो सकता है । (कहावत है कि लोहा लोहे से ही कटता है ।)

टिप्पणी—आयसम्—अयसो विकारः इति अयस्+अण् वर्म—तनुत्रं वर्म ....कवचोऽस्त्रियामित्यमरः निसर्गतीक्ष्णस्य—निसर्गेणतीक्ष्णस्तस्य तीक्ष्णं स्यात्संयुगे लोहविषतिग्मात्मवातिष्वितिधरणिः ज्ञातेयगौरवम्—ज्ञातीनां समूहो ज्ञातिजातं वा ज्ञातेयं ज्ञाति+ढक् ज्ञातेयं बन्धुता तेषां क्रमाद्भावसमूहयोरित्यमरः अनुष्टुप् छन्दोऽर्थान्तर-न्यासोऽलङ्कारः ।

तामेवासिलतां वर्णयति—

नीलिम्ना तुलिताम्बुदा जनतया दृश्याङ्गलक्ष्मीरलम्
तन्वाना परितः पलाशकलनादादित्यतापव्ययम् ।
प्रत्यासन्नफला वनद्विजकुलोद्वेगं निराकुर्वती
कौशल्येय समुल्लसत्यसिलताकोशाहितश्रीस्तव ॥५३॥

माधुरी—हे कौशल्येय कौशल्यापुत्र ! तव भवतः नीलिम्ना तुलिताम्बुदा श्यामतया मेघसदृशी जनतया दृश्याङ्गलक्ष्मीः जनसमूहेन दृश्या द्रष्टुंयोग्या अङ्गलक्ष्मीः अङ्गचिह्नकान्तिः (जौहर) [शाखाप्रतिशाखानां शोभा] यस्याः सा परितः सर्वतः पलाशकलनात् पलाशानाम् राक्षसानां कलनात् मारणात् [पत्राणाम् आच्छादनात्] आदित्यतापव्ययम् देवदुःखनाशम् [सूर्यस्य तापशान्तिम्] तन्वाना कुर्वाणा प्रत्यासन्नफला मुष्टिसन्निहितफला [फलभराढ्या] वनद्विजकुलोद्वेगं निराकुर्वती वनवासिनां द्विजानां [पक्षिणाम्] कुलस्य समूहस्योद्वेगं कष्टं (राक्षसानां वधेन, फलदानेन वा) दूरीकुर्वाणा कोशाहितश्रीः कोशे खड्गविधाने [कुड्मले] स्थितशोभा असिलता असिरूपिणीलता समुल्लसति ऊर्ध्वं सम्यक्तया शोभते ।

हिन्दी अनुवाद—हे कौशल्यानन्दन ! नीलिमा में मेघसदृश जनसमूह के द्वारा जिसके चिह्नों की शोभा देखी गई है [जिसकी शाखा प्रशाखाओं की शोभा जनता द्वारा दर्शनीय है] राक्षसों के वध से देवों के शोक को दूर करती हुई [पत्तों के आच्छादन से सूर्य के ताप को शान्त करती हुई] मूठी के समीप ही जिसकी धार है [फलों से भरी हुई] वनवासी ब्राह्मणों [पक्षियों] के दुःख का निराकरण करने वाली (तथा) कोश

(म्यान) [कली] में जिसकी शोभा निहित है ऐसी तलवार रूपिणी लता (रणभूमि या वनभूमि में) सुशोभित हो रही है।

टिप्पणी—**कोशल्येयः**—कौशल्यायाः अपत्यं पुमान्निति कौशल्या + ढक् तत्सम्बोधने **आदित्यः**—आदित्याः ऋभवोऽस्वप्ना इति, सूरसूर्यार्यमादित्य इति चामरः (देवाः सूर्यो वा) **प्रत्यासन्नफला**—प्रत्यासन्नं फलं मुष्टिसमीपे प्रतिशारवासमीपे वा यस्याः सा (बहु०) फलं हेतुकृते जातीफले च फलसस्ययोः त्रिफलायां च कक्कोले शाखाग्रेव्युष्टिलाभयोरिति विश्वः **कोशाहितश्रीः**—कोशे—खड्गविधाने कुड्मले वा आहिता श्रीर्यस्याः सा (बहु०) कोशोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोरित्यमरः। **भुजङ्गप्रयातंछन्दः उपमारूपकयोः सांकर्यम्**।

भगवत्कृपाणस्य कार्यान्तरं कथयति—

छिनत्ति मूर्धानमरातिभूभृतो
भुजार्गलामूरुमपि क्षणेन यत्।
भवत्कृपाणः स्वयमङ्गवांस्ततः
परस्य नूनं सहते न साङ्गताम् ॥५४॥

माधुरी—[हे राम!] **भवत्कृपाणः** भवदीयखड्गः **क्षणेन** शीघ्रमेव **अरातिभूभृतः** शत्रुराज्ञः **मूर्धानम्** मस्तकम् **भुजार्गलाम्** बाहुविष्कम्भम् **ऊरुम्** सक्थि **छिनत्ति** खण्डयति। **यत्** यतः स्वयम् अङ्गवान् पुरुषः [चिह्नवान् अस्ति] **ततः** तस्मात् **परस्य** शत्रोः **साङ्गताम्** अङ्गयुक्तत्वम् **न सहते** न मर्षयति [इति] **नूनम्**।

हिन्दी अनुवाद—हे राम! आपका खड्ग क्षणभर में ही शत्रुभूत राजा के मस्तक भुजरूप विष्कम्भ (सिटकिनी या ब्योंड़ा) [तथा] जाँघों (घुटने के ऊपर के भाग को काट देता है।) क्योंकि (चूँकि) वह स्वयम् अङ्गी (पुरुष) [अथवा चिह्नों से युक्त] है अतः दूसरे [शत्रु] की साङ्गता [अंगों से युक्त होने] को नहीं सहन करना, यह निश्चित है। (जो स्वयं प्रधान होता है वह दूसरे की प्रधानता को नहीं सहता यह निश्चित है।)

टिप्पणी—**भुजार्गलाम्**—भुजावेवार्गला ताम् तद्विष्कम्भोऽर्गलं न नेत्यमरः **ऊरुम्**—सक्थि क्लीबे पुमानूरुरित्यमरः **अङ्गवान्**—अङ्गानि सन्त्यस्येति खड्गपक्षे चिह्नवान् अरिघातेन चिह्नानि भवन्ति **साङ्गताम्**—अङ्गैः सह वर्तमान इति साङ्गस्तस्य भावस्ताम् (यः स्वयम् अङ्गी भवति सः परस्याङ्गिताम् प्रधानतां न सहते।) **वंशस्थवृत्तम् उत्प्रेक्षाऽलङ्कारः**।

भगवत्कृपाणस्य सदासन्निहितत्वं कथयति—

मुष्टिं यत्काञ्चनेनाकलयसि तनुषे मार्जनं यत्कलङ्के
चञ्चत्पट्टांशुकेनावृतमिह कुरुषे यत्परीवारमस्य ।
खड्गस्तीक्ष्णोऽपि तेन त्यजति न भवतः पार्श्वमेष त्वदीयान्
देव द्वेष्यान्निकृन्तन्नयनिपुणमतेः कोऽपि न क्वाप्यवश्यः ।५५॥

माधुरी—हे देव ! यत् यतः अस्य स्वकीयखड्गस्य **मुष्टिम्** सङ्कोचितपाणिम् **काञ्चनेन** सुवर्णेन **आकलयसि** शोभयसि [काञ्चने-सम्पत्तौ मुष्टिं नाकलयसि-कृपणतां न कुरुषे] यत् **कलङ्के** लोहमले [अपयशसि] **मार्जनं तनुषे** क्षालयसि [दूरीकरोषि] यत् परीवारम् खड्गकोषम् [परिजनं] **चञ्चत्पट्टांशुकेन** चारुदुकूलेन **आवृतम् इह** अत्र सम्प्रति वा **कुरुषे तेन त्वदीयान् द्वेष्यान्** तव शत्रून् **निकृन्तन्** खण्डयन् **एषः** अयम् **तीक्ष्णः** शानघर्षितः [आत्मघाती] अपि **भवतः पार्श्वम्** सामीप्यम् **न त्यजति नयनिपुणमतेः** नीतिज्ञस्य **कोऽपि** कश्चिदपि प्राणी **क्वापि** कुत्रापि **अवश्यः** अशासनीयो न (भवतीतिशेषः । सर्वोऽपि जनस्तस्य वशे तिष्ठतीति भावः ।)

हिन्दी अनुवाद—हे देव ! [आप] जो इस खड्ग [आत्मघाती दुष्टप्राणी] की मूठी को सुनहली (सोने से मढ़ी हुई) रखते हो [मूठी खोलकर इसे धन देते हो] जो मैल (मुर्चा) [अपयश] होने पर उसे साफ करते हो [दूर करते हो] (तथा) इसके म्यान [कुटुम्बी जन] को चमकीले रेशमी वस्त्र से ढके रहते हो [वस्त्र देते हो] इस कारण, तुम्हारे शत्रुओं को मारता हुआ यह खड्ग [आत्मघाती पुरुष] आपका सामीप्य नहीं त्यागता है । नीतिज्ञ पुरुष का कोई भी प्राणी अवश्य नहीं होता (सभी उसके वश में रहते हैं ।)

(**विशेष तात्पर्य**—खड्ग तथा आत्मघाती अर्थात् धर्मविरोधी दोनों के विवेक नहीं होता परन्तु आप खड्ग की मूठी को स्वर्णमण्डित, उसे मुर्चा से रहित तथा उसके कोश (म्यान) को सुन्दर भड़कीले रेशमी वस्त्र से ढके रहते हो तथा दुष्ट को द्रव्य देते हो उसका अपयश नहीं करते तथा उसके परिवार को भी वस्त्रादि से सन्तुष्ट करते हो इसलिये दोनों ही आपके वशीभूत रहते हैं ।)

टिप्पणी—**तीक्ष्णः**—तीक्ष्णस्त्वात्मघाती स्यात्तीक्ष्णः शानघर्षितः **परीवारः**—परीवारः परिजने खड्गकोशे परिच्छदे इति विश्वः **स्रग्धराछन्दः समासोक्तिरर्थान्तरन्यासश्चालङ्कारौ ।**

स्वखड्गे भगवतः प्रेमातिशयं व्यनक्ति—

कोशादाशु वियोजितोऽपिभवतानिघ्नंस्तवारिं निज-
स्वामिद्रोहदरिद्रतामयमसिः प्रादुष्करोति प्रभो !
भूयो रक्ततयान्वितं रणशतेऽप्यप्राप्तभङ्गं भवांस्-
तेनैनं कलयन्निवेदयति किन्न स्वं गुणग्राहिणम् ॥५६॥

माधुरी—हे प्रभो ! अयम् असिः खड्गः भवता कोशात् आवरणयन्त्रात् [पक्षे भाण्डागारात्] **वियोजितः** निष्काशितः अपि तव अरिम् निघ्नन् मारयन् स्वामिद्रोह-दरिद्रताम् स्वामिने द्रोहस्याभावं **प्रादुष्करोति** ख्यापयति । **रणशतेऽप्यप्राप्तभङ्गं** शताधिकेषु युद्धेष्वपि पराजयरहितम् **रक्ततयाऽन्वितम्** रक्तलिप्तम् [पक्षे सानुरागम्] **एनम्** खड्गम् [अर्थम्] **तेन** कोशेन **भूयः** पुनः **कलयन्** योजयन् **भवान्** किम् **स्वम्** आत्मानम् **गुणग्राहिणम्** गुणज्ञम् **न निवेदयति** प्रथयति (प्रथयत्येवेत्यर्थः) ।

हिन्दी अनुवाद—हे प्रभो ! यह खड्ग आपके द्वारा कोश (म्यान) से निकाला गया भी, तुम्हारे शत्रु को मारता हुआ स्वामी के प्रति द्रोह के अभाव को प्रकट करता है । सैकड़ों युद्धों में पराजय को अप्राप्त (न हारा हुआ) रक्त से लिप्त [अनुरागी] इसे उस कोश में पुनः रखते हुये आप क्या अपने को गुणग्राही नहीं प्रकट करते हो ।

(**विशेष तात्पर्य**—प्रायः निकाला गया मनुष्य स्वामी के प्रति द्रोह करता है परन्तु राम के खड्ग में उसका अभाव देखा गया, अतएव उन्होंने पुनः उसे अपने कोश में स्थान दिया यह उनकी गुणज्ञता का निदर्शन है । कोश व रक्ततया जैसे श्लिष्ट विशेषणों से 'धनागार से निकाला गया धन याचकों की दरिद्रता को दूर कर पुनः श्रीराम के प्रति अनुराग करता है अतः वे उसे अपने कोष में रख लेते हैं' यह अर्थ भी प्रकट होता है ।)

टिप्पणी—**कोशात्**—आवरणयन्त्रात् भाण्डागाराद्वा **रक्ततया**—खड्गपक्षे रक्ततया सानुरागतया चान्यत्रानुरागतयैव रक्तं क्षतजकाश्मीरलोहितेषु प्रयुज्यते । नील्यादिरञ्जिते शुक्ले रक्तं रक्तोऽनुरागिणीति धरणिः । शार्दूलविक्रीडितंछन्दः अनुप्रासः समासोक्तिश्चालङ्कारौ ।

पुनरपि खड्गवर्णनं करोति—

विमुक्तकञ्चुकासितद्विजिह्वराजविभ्रमम्
बिभर्ति कोशनिःसृतः स्वयं कृपाण एष यः ।
स एव भूपते भवत्करप्रहारदारित-
द्विषद्गजासृगुक्षितः क्षणेन तक्षकायते ॥५७॥

माधुरी—हे भूपते ! स्वयं कोशनिःसृतः कोशान्निर्गतः यः एषः कृपाणः विमुक्तकञ्चुकासितद्विजिह्वराजविभ्रमम् वासुकिविलासम् बिभर्ति धारयति भवत्करप्रहारदारितद्विषद्गजासृगुक्षितः भवतः करप्रहारेण दारितानाम्—खण्डितानाम् द्विषद्गजानाम्—शत्रुहस्तिनाम् असृजा—रक्तेनोक्षितः—सिक्तः स एव खड्गः क्षणेन तक्षकायते—तक्षक इवाचरति (आरक्तो भवतीतिभावः) ।

हिन्दी अनुवाद—हे राजन् ! स्वयं कोश से निकला हुआ जो यह कृपाण केंचुल रहित श्याम वर्ण के नागराज (वासुकि) की शोभा को धारण करता है। आपके हाथ के प्रहार से विदीर्ण, शत्रुओं के गजों के रक्त से सिक्त वही (कृपाण) शीघ्र ही तक्षक की तरह (गाढ़े लाल रंग का) बन जाता है।

टिप्पणी—**द्विजिह्वराजः**—द्विजिह्वानां राजा टच् समासान्तः वासुकिः वासुकिस्तु सर्पराज इत्यमरः **विमुक्तकञ्चुकः**—निर्मोकरहितः समौ कञ्चुकनिर्मोकौ इत्यमरः **असृगुक्षितः**—असृजा उक्षितः—सिक्तः प्रोक्षितं निहतं सिक्ते इति रभसः **तक्षकायते**—तक्षक इवाचरति तक्षकस्त्वारक्तः । **पञ्चचामरच्छन्दः उपमालङ्कारः** ।

पुनरपि श्रीरामस्य खड्गं वर्णयति—

प्रतिभटशोणितसङ्गाद्

दाडिमकुसुमच्छविस्तव कृपाणः ।

तापित इव भाति भवद्-

भुजभवभूरिप्रतापदहनेन ॥५८॥

माधुरी—[हे राम !] **प्रतिभटशोणितसङ्गात्** शत्रुरक्तस्पर्शात् **दाडिमकुसुमच्छविः** दाडिमपुष्पवल्लोहितः तव **कृपाणः भवद्भुजभवभूरिप्रतापदहनेन** भवतो भुजाभ्यां जातेन प्रबलप्रतापानलेन **तापित** उष्णत्वमापादित **इव भाति** शोभते ।

हिन्दी अनुवाद—[हे राम !] शत्रुओं के शोणित के सम्पर्क से अनार के फूल के समान कान्ति वाला तुम्हारा कृपाण आपकी भुजाओं से उत्पन्न प्रबल प्रताप रूपी अग्नि से तपाया गया जैसा शोभित हो रहा है।

टिप्पणी—**दाडिमकुसुमच्छविः**—दाडिमस्य कुसुमानां (छविरिव) छविर्यस्य सः (बहु०) **भवद्भुजभवभूरिप्रतापदहनेन**—भवतो भुजाभ्यां भवतीति भवः यो भूरिः प्रतापः स दहनमिव तेन (उप० समासः) **गीतिश्छन्दः अनुप्रासः उपमोत्प्रेक्षारूपकाणां संसृष्टिः** ।

भूयोऽपि खड्गप्रशंसां करोति—

तव भुजमलयजशाखा-
निषेविणा मण्डलाग्रकुण्डलिना ।
यस्त्यज्यते विषाग्नि-
र्भवत्प्रतापं वदन्ति तं कवयः ॥५९॥

माधुरी—[हे राम !] तव भवतः भुजमलयजशाखानिषेविणा भुजचन्दन-शाखामाश्रितेन मण्डलाग्रकुण्डलिना खड्गरूपिणा सर्पेण यः विषाग्निः त्यज्यते कवयः तम् भवत्प्रतापं वदन्ति ।

हिन्दी अनुवाद—[हे राम !] आपकी भुजा रूप चन्दन शाखा में आश्रित खड्ग रूपी सर्प के द्वारा जो विष रूप अग्नि का त्याग किया जाता है कवि उसे आपका प्रताप कहते हैं ।

टिप्पणी—मण्डलाग्रकुण्डलिना—मण्डलाग्रः खड्गः स एव कुण्डली सर्पः तेन रिष्टिरसिचन्द्रहासौ तरवारि मण्डलाग्रं चेत्यभिधानरत्नमालायाम् । कुण्डली गूढपाच्चक्षुः-श्रवाः काकोदरः फणीत्यमरः । गीतिश्छन्दो रूपकालङ्कारः ।

इत्यस्त्रवर्णना समाप्तिमगात् ।

अथाश्ववर्णना

श्रीरामस्याश्वानां गतिप्रकर्षं वर्णयति कविः—

धावद्भिः सार्धमेतैस्तव हयनिवहैः स्पर्धया गन्धवाहो
वाति स्म क्षिप्रमादौ तदनुसरणतः श्रान्तिरस्याविरासीत् ।
स्वग्रीवाचामरान्तःस्थितिचतुरतया योजितस्तैर्ध्रुवं स प्रेम्णा
तत्स्वामिनं त्वां सुखयति निभृतं चामराभ्यां प्रवृत्तः ॥६०॥

माधुरी—[हे राम] ! गन्धवाहः—वायुः तव एतैः धावद्भिः हयनिवहैः अश्व-समूहैः सार्धम् स्पर्धया प्रतियोगितया आदौ पूर्वम् क्षिप्रम् शीघ्रमेव वाति स्म, तदनुसरणतः तेषां पूर्वजैः सहापि धावनात् अस्य वायोः श्रान्तिः श्रमः आविरासीत् अजायत ।

ध्रुवम् नूनम् तैः अश्वैः स्वग्रीवाचामरान्तः स्थितिचतुरतया स्वग्रीवायाश्चामरमध्ये निवेशनैपुण्येन योजितः प्रवेशितः सः वायुः चामराभ्याम् प्रवृत्तः उत्पन्नः [सन्] प्रेम्णा प्रीत्या तत्स्वामिनं त्वाम् निभृतं अत्यर्थम् सुखयति सुखिनं करोति ।

हिन्दी अनुवाद—[हे राम !] वायु तुम्हारे इन दौड़ते हुये अश्व समूहों के साथ प्रतियोगिता की भावना से पहिले द्रुतगति से बहता था उनके (पूर्वजों) के साथ भी दौड़ने से उसे बड़ी थकान आ गई । निश्चय ही उन (अश्वों) के द्वारा अपनी ग्रीवा के चँवर के मध्य में प्रवेश की चतुरता के कारण बैठाया गया वह (वायु) चामरों से उत्पन्न होकर प्रेम से उन (घोड़ों) के स्वामी तुम्हें अत्यन्त सुखी करता है ।

टिप्पणी—**तदनुसरणतः**—तेषाम् (पितृपितामहादीनाम्) अनुसरणात् **चामराभ्यां प्रवृत्तः**—कविः असम्भाव्याच्चामराद्वातोत्पत्तिमुत्प्रेक्षया दृढयति । **स्रग्धरावृत्तम्** उत्प्रेक्षालङ्कारः ।

रामस्याश्वानां वैशिष्ट्यं समासोक्त्या भगवद्वताराणां जयं कथयति—

जुष्टाः श्रिया देवमणीन् वहन्तः
स्वरंहसाधःकृतवैनतेयाः ।
रणे रणे भूरिपरागसान्द्र-
च्छायाम्बरास्ते हरयो जयन्ति ॥ ६१ ॥

माधुरी—[हे राम !] **ते** त्वदीयाः **श्रिया जुष्टाः** कान्त्या व्याप्ताः **देवमणीन्** तन्नामकानि शुभलक्षणानि **वहन्तः** धारयन्तः **स्वरंहसाधःकृतवैनतेयाः** स्ववेगेन तिरस्कृतगरुडाः **रणे रणे** प्रतियुद्धम् **भूरिपरागसान्द्रच्छायांबराः** खुरोत्थापितेन बहुरेणुनाऽऽच्छादिताकाशाः **हरयः** अश्वाः **जयन्ति** ।

[विशेषणानां संश्लिष्टतया गृहीतावताराणां विष्णूनामपि जयं कामयते कविः—

श्रियाजुष्टाः सीतादिरूपया लक्ष्म्या सेविताः **देवमणीन्** कौस्तुभमणीन् **वहन्तः** **स्वरंहसाधःकृतवैनतेयाः** स्ववेगेनोत्प्लुत्याधःकृतगरुडाः **भूरिपरागसान्द्रच्छायाम्बराः** भूरिरेणुवत्सुवर्णधूलिसदृशानि सान्द्रच्छायानि-अतिसुन्दराणि पीतवर्णान्यम्बराणि येषान्ते एवम्भूताः **हरयः** रामादयः **जयन्ति**]

हिन्दी अनुवाद—हे राम ! तुम्हारे कान्तिमान्, देवमणि नामक शुभ लक्षणों से युक्त, अपने वेग से गरुड़ को तिरस्कृत करने वाले [तथा] प्रतियुद्ध में (खुरों से उठाई गई) अत्यधिक धूलि से आकाश को आच्छादित किये हुये घोड़ों की जय हो ।

[कवि श्लिष्ट विशेषणों द्वारा अवतार धारण किये हुये रामादिरूप विष्णु के स्वरूपों के जय की कामना करता है—

(सीतादिरूप) लक्ष्मी से सेवित, कौस्तुभमणि को धारण करते हुये, अपने वेग से (उछलकर) गरुड़ को नीचे किये हुये [तथा] सुवर्ण की धूलि के समान गाढ़े रंग के (पीत) वस्त्र धारण किये हुये नारायणों की जय हो ।]

टिप्पणी – श्रिया जुष्टाः (जुष् प्रीतिसेवनयोः + क्त) कान्त्या व्याप्ता लक्ष्म्या वा सेविताः श्री शब्दः कविभिः प्रोक्तो लक्ष्मीसम्पत्ति कान्तिष्वित्यमरः **देवमणि** :— देवमणिः समाख्यातः कौस्तुभे हयलक्षणे । **उपजातिश्छन्दः समासोक्तिरलंकारः** ।

विरोधमुखेनाश्वसैन्यं वर्णयति—

क्षिप्रवाहमिदं सैन्यं कुतो दाशरथे ! तव ।
अक्षिप्रवाहं जनयत्यश्रु वैरिमृगीदृशाम् ॥६२॥

माधुरी—हे **दाशरथे** ! राम ! **इदं तव सैन्यम्** सेना **क्षिप्रवाहम्** क्षिप्रवाहकम् **कुतः** कस्मात्कारणात् **वैरिमृगीदृशाम्** शत्रुरमणीनाम् **अक्षिप्रवाहम्** न शीघ्रवहनशीलं **अश्रु जनयति** उत्पादयति यः क्षिप्रवाहो भवति स कथमक्षिप्रवाहं जनयितुं शक्नोतीति विरोधस्तत्परिहारस्तु **क्षिप्रवाहम्** इति पदस्य क्षिप्रगामिभिर्वाहैरश्वैर्युक्तम् **अक्षिप्रवाहम्** इत्यस्य च नेत्रेषु प्रवहणशीलम् इत्यर्थकरणेन भवति ।

हिन्दी अनुवाद—हे दशरथ नन्दन राम ! यह तुम्हारी सेना शीघ्रगामी वाहनों से युक्त है फिर कैसे क्षिप्रवाहनों से रहित होकर शत्रुरमणीजन के आँसू उत्पन्न करती है ? क्योंकि जो क्षिप्रवाह है वह अक्षिप्रवाह (क्षिप्रवाहरहित) कैसे हो सकता है उसके परिहारार्थ यह अर्थान्तर अपेक्षित है—**क्षिप्रवाहम्**—शीघ्रगामी अश्वों से युक्त तथा **अक्षिप्रवाहम्**— नेत्रों में बहने वाले (आँसू) ।

टिप्पणी—**क्षिप्रवाहम्**–(विरोधपक्षे) क्षिप्राः वाहाः वाहनानि भारवाहकाः वा यस्मिन् तत् (परिहार पक्षे) क्षिप्राः वाहाः अश्वाः यस्मिन् तत् **अक्षिप्रवाहम्**–(विरोधपक्षे न क्षिप्रवाहम् (नञ् तत्०) (परिहारपक्षे) अक्षिषु प्रवाहो यस्य तत् (बहु०) अनुष्टुप्छन्दः, विरोधाभासोऽलङ्कारः ।

पुनरपि श्रीरामस्याश्वानां गतिवैशिष्ट्यं वर्णयति—

देव त्वद्दन्तिपंक्त्या निजमदसलिलैः सर्वतोनिर्मितेऽस्मिन्
जंबाले जानुदघ्ने प्रतिरिपुचलिता केन सेनाध्वना ते ।
क्षोणीस्पर्शानपेक्षप्रचलदुरुभवद्वाहटापाहतानां
चक्रे चूर्णैर्गिरीणामियमुपलमयीवक्षितिस्तर्कयामि ॥६३॥

माधुरी—हे देव ! **त्वद्दन्तिपङ्क्त्या** तव हस्तिनां श्रेण्या **निजमदसलिलैः** स्वमदजलैः अस्मिन् जंबाले (राजमार्गस्य) पङ्के **सर्वतः** परितः **जानुदघ्ने** जानुपरिमाणे **निर्मिते** कृते **ते सेना केन** अध्वना मार्गेण **प्रतिरिपु** रिपुम् प्रति **प्रचलिता** गता ? **क्षोणिस्पर्शानपेक्षप्रचलदुरुभवद्वाहटापाहतानाम्**–पृथ्वी स्पर्शं विनैव प्रचलितैः **महद्भिः** भवदीयाश्वखुरैः त्रोटितानाम् **गिरीणाम् चूर्णैः इयम् क्षितिः पृथ्वी उपलमयी** पाषाणमयी **इव** [कृतेति] **तर्कयामि** सम्भावयामि ।

हिन्दी अनुवाद—हे महाराज ! तुम्हारे हाथियों की कतार के द्वारा अपने मदजल से (राजमार्ग के) इस कीचड़ के पूर्णरूपेण घुटने तक कर दिये जाने पर तुम्हारी सेना किस मार्ग से शत्रु की ओर गई ? बिना पृथ्वी का स्पर्श किये ही चलायमान आपके घोड़ों के बड़े बड़े खुरों से तोड़े गये पर्वतों की बालू से यह धरती पत्थरों से निर्मित जैसी कर दी गई हो यह सम्भावना करता हूँ ।

टिप्पणी—**जम्बाले**—निषिद्वरस्तु जम्बालः पङ्कोऽस्त्रीशादकर्दमावित्यमरः । **जानुदघ्ने**—जानु + प्रमाणार्थे दघ्नच् सूत्र 'प्रमाणे द्वयसज्दघ्नञ्मात्रचः' (अष्टा० ५।२।३७) **प्रतिरिपु**—रिपुम् प्रति (अव्य०) **वाहटापाहतानाम्**—वाहानानां टापाः—पादन्यासास्तैर्हतानाम् (तत्०) स्रग्धराच्छन्दः, उत्प्रेक्षाऽलङ्कारः ।

अश्वसमूहस्य वैशिष्ट्यं वर्णयति—

वियदुत्पतनोत्कहंसमुच्चैः
स्फुरदिन्द्रायुधमुद्धतोर्मिशोणम्
उपमानमुपैति भूमिजाने
भवदश्वीयमिदं तपात्ययेन ॥६४॥

माधुरी—हे **भूमिजाने** भूपते ! **वियदुत्पतनोत्कहंसम्** वियति आकाशे उत्पतने उत्काः उत्सुकाः हंसाः (अश्वविशेषाः) यत्र तत् (बहु०) **उच्चैः स्फुरदिन्द्रायुधम्** उच्चैः स्फुरन्तः इन्द्रायुधाः (अश्वविशेषाः) यत्र तत् (बहु०) **उद्धतोर्मिशोणम्** उद्धता ऊर्मिः—वेगवती गतिः येषामेवं भूताः शोणाः (अश्वाः) यत्र तत् (बहु०) **इदम् भवदश्वीयम्** भवतोऽश्वसमूहः आकाशगमनोत्सुकाः हंसाः यस्मिन्, उच्चैः स्फुरन्तः इन्द्रायुधाः यत्र तथा उद्धतोर्मिः शोणो नदो यत्र स तेन **तपात्ययेन** वर्षाकालेन **उपमानम्** सादृश्यम् **उपैति** प्राप्नोति ।

हिन्दी अनुवाद—हे भूपते ! जिसमें आकाश में उछलने के लिये उत्सुक हंस घोड़े (हंसुला), ऊंचे उछलते हुये इन्द्रायुध संज्ञक घोड़े (फुलवारी) तथा अत्यन्त वेग से चलने वाले शोण नामक घोड़े (सुरंगा) हैं ऐसा यह अश्ववृन्द जिसमें मानसरोवर

के लिये प्रस्थित आकाश में उड़ने को उत्सुक हंस, बहुत चमकते हुये इन्द्रधनुष् तथा वेगवती लहरों वाला सोन नामक महानद है ऐसे वर्षाकाल से समता करता है।

टिप्पणी—हंसः—हंसो लोभपराङ्मुखेऽवनिपतौ हंसो विहङ्गान्तरे हंसौ विष्णुदिवाकरावपि हयश्रेष्ठौ च हंसौ स्मृताविति धरणिः। **इन्द्रायुधम्**—इन्द्रायुधं शक्रधनुरित्यमरः। **ऊर्मिः**—अतिवेगसमायुक्ता गतिरूर्मिरुदाहृतेति वैजयन्ती। **अश्वीयम्**—वृन्देश्ववश्वीय माश्ववदित्यमरः। तपात्ययः—तपस्य—उष्णस्यात्ययः समाप्तिर्यस्मिन् सः (बहु०) वर्षाकाल इत्यर्थः। **मालभारिणी छन्दः उपमाऽलंकारः।**

अश्वानां धूलिनिक्षेपक्रीडां वर्णयति—

ख्यातो वातः सखा नः सदृशरयतया पन्नगानस्य पाना-
त्तोषं नीतः कथञ्चित्सकरुणहृदयो वारयेदप्यहीन्द्रः।
उत्खायोत्खाय धूलीपटलमिति धिया पुष्करान्तः किरन्ति
क्ष्मापृष्ठं तेन मूर्ध्ना धृतमनघ लघूकर्तुकामा हयास्ते ॥६५॥

माधुरी—हे अनघ! सौम्य! **वातः** वायुः **सदृशरयतया** समानवेगतया **नः सखा** अस्माकं मित्रं **ख्यातः** प्रसिद्धः, **तोषं नीतः** प्रसादितः **अहीन्द्रः** शेषनागः **सकरुणहृदयः** द्रवितचित्तः [सन्] **पन्नगान्** सर्पान् **अस्य पानात्**—वायुपानात् **कथञ्चिदपि** केनापिप्रकारेण **वारयेत्** वारणं कुर्यात् **इति धिया** बुद्ध्या **तेन** सर्पराजेन **मूर्ध्ना** मस्तकेन **धृतम्** धारितं **क्ष्मापृष्ठम्** धरणीपृष्ठम् **लघूकर्तुकामाः** लघुकर्तुमिच्छन्तः **ते हयाः** तवाश्वाः **धूलीपटलम्** रजोवृन्दम् **उत्खायोत्खाय**—पुनः पुनः खनित्वा **पुष्करान्तः** आकाशमध्ये **किरन्ति** विक्षिपन्ति।

हिन्दी अनुवाद—हे सौम्य! 'वायु (हमारी) सदृश गति के कारण हमारा मित्र प्रसिद्ध है [हमारे द्वारा] प्रसन्न किये गये शेषनाग दया से पूर्णहृदय वाले होकर सर्पों को इसके पान करने से किसी भी प्रकार रोक दें' इस विचार से उन (सर्पराज) के द्वारा माथे में धारण की गई धरा की पीठ को हलका करने की इच्छा वाले आपके घोड़े धूलिसमूह को बार-बार खोद खोदकर आकाश में फैला रहे हैं। (सर्पों का वायुपान प्रसिद्ध है वायुभक्षाः सर्पाः भवन्ति।)

टिप्पणी—सदृशरयतया—सदृशोरयस्तस्य भावस्तया **लघूकर्तुकामाः**—अलघुं लघुं कर्तुं कामो येषान्ते (बहु०) अभूततद्भावे च्विः लुम्पेदवश्यमः कृत्ये तुङ्काममनसोरपीति कर्तुमित्यस्य मलोपः। **पन्नगानस्य पानात्**—सर्पान् वायोः पानात् 'वारणार्थानामीप्सितः' सूत्रेण पञ्चमी सर्पाः वायुभक्षाः भवन्ति उरगः पन्नगोभोगी जिह्मगः पवनाशनः इत्यमरः। **स्रग्धरावृत्तम् उत्प्रेक्षालङ्कारः।**

श्रीरामस्य हयैर्वायुविजयं वर्णयति—

निजधामनिर्जितनिदाघदीधिते
हरिभिस्तवायमवधीरितो हरिः ।
स्वयमिन्धनीभवति जातवेदसि
स्फुटमेष यज्ज्वलति तत्समागमात् ॥६६॥

माधुरी—**निजधामनिर्जितनिदाघदीधिते** स्वतेजसा विजितरवे ! **तव हरिभिः** अश्वैः **अवधीरितः** (वेगेन) तिरस्कृतः **अयम् हरिः** वायुः **जातवेदसि** अग्नौ **स्वयम् इन्धनीभवति । यत्** यस्मात्कारणात् **एषः** अयम् **तत्समागमात्** तस्यागमनेन **स्फुटं** प्रत्यक्षं **ज्वलति ।**

हिन्दी अनुवाद—अपने तेज से सूर्य के विजेता श्री राम जी ! तुम्हारे घोड़ों के द्वारा (अपनी द्रुत गति से) तिरस्कृत यह वायु अग्नि में स्वयम् ईंधन बनता है क्योंकि यह (अग्नि) उसके आने से (हवा देने से) प्रत्यक्ष ही जलता है ।

(**विशेष तात्पर्य**—प्रायः तिरस्कृत जन लज्जा से आग में जल जाते हैं उसी भाव को कवि ने युक्तिपूर्वक कहा है कि वायु तिरस्कृत होकर आग में प्रविष्ट होता है तभी आग जलती है ।)

टिप्पणी—**हरिभिरवधीरितो हरिः**—अश्वैस्तिरस्कृतो वायुः नभस्वान्मातरिश्वा च समीरश्च समीरणः । सदागति र्गन्धवाहो हरिरुक्तो महाबल इत्यभिधानरत्नमालायाम् । (अन्योऽपि तिरस्कृतोऽग्निप्रवेशं करोति तत्प्रवेशनं युक्त्या द्रढपति यद्वायुप्रवेशादग्ने ज्वलनं तेन वायोरग्नौ पतनं सत्यम् । मञ्जुभाषिणी छन्दः व्यतिरेको हेतूत्प्रेक्षाचालङ्कारौ ।

श्रीरामस्याश्वानां वायोर्विशिष्टत्वं वर्णयति—

अस्ति त्वद्वाहशादृश्यलेशो यन्मातरिश्वनि ।
तेनायं कोशलाधीश गन्धवाहोऽभिधीयते ॥६७॥

माधुरी—हे **कोशलाधीश** श्रीराम ! **यत्** यतः **त्वद्वाहसादृश्यलेशः** तवाश्वानां (सादृश्यगन्धः) किञ्चिन्मात्रं सादृश्यम् **मातरिश्वनि** वायौ **अस्ति तेन अयम्** वायुः **गन्धवाहः** गन्धवाहकः (सादृश्यमात्रवाहकः) **अभिधीयते** कथ्यते ।

हिन्दी अनुवाद—हे श्रीराम ! चूँकि तुम्हारे घोड़ों की समताका का लेश मात्र वायु मे है इस कारण वह वायु गन्धवाह (गन्धवाहक या सादृश्यमात्र का वाहक) कहा जाता है ।

टिप्पणी—**त्वद्वाहसादृश्यलेशः**—तव वाहास्तेषां सादृश्यस्य लेशो गन्धः सम्बन्धमात्रं वा **मातरिश्वनि**—श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिरित्यमरः । गन्धवाहः—गन्धो लेशः किञ्चिन्मात्रं त्वदश्वसादृश्यलेशो गन्धः किञ्चिन्मात्रसादृश्यं गन्धो वा तं वहतीति गन्धवाहः गन्धोलेशे तथाऽऽमोदे गन्धः सम्बन्धमात्रके इति धरणिः । अनुष्टुप्छन्दः काव्यलिङ्गमलङ्कारः ।

श्री रामस्यानेकविधानश्वान् वर्णयति—

नीरूपोऽयं नभस्वानिति सदसि बुधैरुच्यते यैरजस्रम्
जातेर्ष्यस्तेषु तादृग्बहलरयभवत्सैन्यवाहच्छलेन ।
शुक्लः शोणस्तनुश्रीतुलितमधुकरः कञ्जकिञ्जल्कहृद्यः
कायव्यूहेन सूते जननयनमुदं स स्वयं कोशलेन्द्र ।।६८।।

माधुरी—हे कोशलेन्द्र ! श्रीराम ! यैः बुधैः मनीषिभिः (नैयायिकैः) सदसि सभायाम् अयं नभस्वान् वायुः अजस्रम् निरन्तरम् नीरूपः रूपरहितः इत्युच्यते एवं कथ्यते तेषु जातेर्ष्यः ईर्ष्यालुः सः वायुः शुक्लः श्वेतः शोणः रक्तः तनुश्रीतुलितमधुकरः श्यामः कञ्जकिञ्जल्कहृद्यः पीतरक्तः (इतिहयविशेषास्तेषाम्) **बहलरयभवत्सैन्यवाहच्छलेन** वेगवतां भवदीय सेनाश्वानां छलेन—व्याजेन (स्व) **कायव्यूहेन** कायसमूहेन **स्वयं जननयनमुदम्** प्रजानेत्रामोदं सूते ददातीत्यर्थः । (रूपरहितस्पर्शवान् वायुरिति नैयायिकाः) ।

हिन्दी अनुवाद—हे कोशलाधीश्वर ! जिन नैयायिक प्रभृति विद्वानों के द्वारा सभा में वायु सदा रूप रहित (है) ऐसा कहा जाता है उनके प्रति ईर्ष्यालु वह (वायु) शुक्ल, रक्त, श्याम तथा पीतरक्त (रंग वाले) आपकी सेना के वेगवान् घोड़ों के बहाने से (अपने) शरीर के समूह से (बहुविध शरीरों से) स्वयं प्रजा के नेत्रों को आनन्द देता है । [शुक्ल, रक्त, श्याम तथा पीत रक्त रंग वाले घोड़ों को देशज भाषाओं में क्रमशः बोज, सुरंगा, मुशकी एवं सिरगी कहते हैं ।]

टिप्पणी—**नभस्वान्**—नभस्वान् मातरिश्वाच समीरश्च समीरणः इत्यभिधान रत्नमालायाम् । **कायव्यूहेन**—व्यूहः स्याद्बलविन्यासो व्यूहस्तर्कसमूहयोरित्यमरः **तनुश्रीतुलितमधुकरः**—तन्वाः श्रिया तुलितो मधुकरो येन सः (बहु०) श्यामः इत्यर्थः **कञ्जकिञ्जल्कहृद्यः**—कञ्जस्य किञ्जल्कवत् हृद्यः—कमलकेसरकान्तः पीतरक्त इतियावत् । **स्रग्धराच्छन्दः**, **कैतवापह्नुतिरुपमेत्यतयोः संसृष्टिः** ।

तदेव पुनः प्रक्रमते—

अम्बरं मलिनयन्ति तावका

वाजिनः क्षितिरजोभिरुत्थितैः ।

को निवारयतु धावनक्षमां-

स्तानजस्रमधिवाहिनि स्थितान् ॥६९॥

माधुरी—[हे राम !] **तावकाः** तव **वाजिनः** अश्वाः **उत्थितैः** उपरिगतैः **क्षितिरजोभिः** महीरेणुभिः **अम्बरम्** आकाशम् [वस्त्रम्] **मलिनयन्ति** मलिनं कुर्वन्ति । **अजस्रम्** निरन्तरम् **धावनक्षमान्** अग्रे गमने समर्थान् [प्रक्षालने समर्थान्] **अधिवाहिनि**—सेनामध्ये [नदीमध्ये] **स्थितान् तान्** (अश्वान् वस्त्रक्षालकान्) **कः निवारयतु** । (न कोऽपितान्निवारयितुं समर्थ इति भावः ।)

हिन्दी अनुवाद—[हे राम !] आपके घोड़े (खुरों से) ऊपर उठी हुई धरती की धूलि से आकाश को मटमैला बना रहे हैं। निरन्तर दौड़ने में समर्थ, सेना के मध्य में स्थित उन्हें कौन रोक सकता है। श्लिष्ट विशेषणों से निम्नलिखित अर्थ भी प्रतीत होता है—

हे राम ! (दौड़ते हुये) घोड़े वस्त्रों को मलिन करते हैं निरन्तर प्रक्षालन करने में समर्थ नदी के मध्य में स्थित वस्त्र धोने वालों को कौन मना करे (वे गन्दे वस्त्रों को स्वच्छ कर हां देंगे) ।

टिप्पणी—**अम्बरम्**—अम्बरं व्योमवाससीत्यमरः **वाजिनः**—वाजी बाणाश्वपक्षिष्विति विश्वः **धावनक्षमान्** प्रगमे, शौचेवा समर्थान् धावनं प्रगमे शौचे इति धरणिः । **अधिवाहिनि** वाहिन्यामिति (अव्य०) वाहिनी सिन्धुसेनायोरिति धरणिः । **रथोद्धता-वृत्तम्, समासोक्तिरलंकारः** ।

पुनः श्रीरामस्याश्वानां द्रुतगतिं वर्णयति—

पतत्रिराजोऽपि जगत्त्रयेऽस्मिन्

हरेरधःस्थः प्रथितो गरुत्मान् ।

राजन्नवीना अपि तावकीना

हया हरीणामुपरि स्फुरन्ति ॥७०॥

माधुरी—हे राजन् ! भो राम ! **पतत्रिराजः** पक्षिराजः **गरुत्मान्** गरुडोऽपि **अस्मिन् जगत्त्रये** त्रिभुवने **हरेः** विष्णोः वाहनत्वात् **अधः स्थः** नीचैः स्थितः **प्रथितः**

प्रसिद्धः । नवीनाः नूतनाः [न पक्षिस्वामिनः] अपि तावकीना हयाः तवाश्वाः हरीणाम् वायूनाम् उपरि स्फुरन्ति विराजन्ते ।

हिन्दी अनुवाद—हे महाराज ! पक्षिराज गरुड़ भी इस त्रिभुवन में विष्णु भगवान् के (वाहन के रूप में) नीचे रहने वाला प्रसिद्ध है। नवीन [पक्षियों के स्वामी न होते हुये] भी तुम्हारे घोड़े वायु मण्डल के ऊपर सुशोभित हैं। वेग में वायु को जीत लिया है। (गरुड़ पक्षिराज होते हुये भी एक हरि के नीचे स्थित है परन्तु आपके घोड़े पक्षियों के स्वामी न होते हुये भी अनेक हरियों (वायुगण) के ऊपर हैं यह भाव है।)

टिप्पणी—नवीनाः—नूतनाः अथवा वयः पक्षिण स्तेषां इनाः स्वामिनो वीनाः न वीनाः इति नवीनाः (सुप्सुपेतिसमासः) । अयमाशयः—गरुडः पक्षिराजोऽपि एकस्य हरेरधःस्थः, अश्वास्तु न वीनाः (न पक्षिस्वामिनः) तथापि हरीणाम् (वायूनाम्) उपरि तिष्ठन्ति । अर्कमर्कटमण्डूकविष्णुवायसवायवः । तुरंग सिंह शीतांशु यमाश्च हरयो दश इत्यभिधानरत्नमालायाम् । उपजातिश्छन्दः, अनुप्रासो व्यतिरेकालङ्कारश्च ।

अश्वानां वेगं निरूपयति—

मरुत्सेनावाहैस्तव विजितवेगो निजसुहृद्-
बृहद्भानुप्लुष्टं रचयति रुषारण्ययवसम् ।
नवेदैतन्मूढः प्रतिभटपुरीराजभवन-
प्ररूढः सौहित्यं जनयति यदेषां तृणभरः ॥७१॥

माधुरी—[हे राम !] तव सेनावाहैः सेनाया अश्वैः विजितवेगः द्रुतगमने पराजितः मरुत् वायुः रुषा क्रोधेन अरण्ययवसम् वनस्य घासं निजसुहृद्बृहद्भानुप्लुष्टम् स्वमित्रेणाग्निना दग्धं करोति । [सः] मूढः मूर्खः (वायुः) एतत् न वेद जानाति यत् प्रतिभटपुरीराजभवनप्ररूढः शत्रूणाम् राजप्रासादेषु सञ्जातः तृणभरः तृणाधिक्यम् एषाम् अश्वानां सौहित्यम् सुखम् जनयति करोति । (पलायितानां शत्रूणां नगरीणाम् प्रासादेषु तृणानि प्ररूढानीति रामप्रतापो व्यज्यते ।)

हिन्दी अनुवाद—[हे राम !] आपकी सेना के घोड़ों से वेग में पराजित वायु क्रोध से जङ्गल की घास को अपने मित्र अग्नि के द्वारा दग्ध बना देता है। वह मूर्ख (वायु) यह नहीं जानता कि शत्रुभूत राजाओं के महलों में उगी हुई घास की राशि उन्हें सुखी व सन्तुष्ट करती है। (भगे हुये राजाओं के महल में घास उग आई है, इससे श्रीराम का प्रताप ध्वनित होता है।)

टिप्पणी—बृहद्भानुप्लुष्टम्—वीतिहोत्रो बृहद्भानुराश्रयासो धनञ्जय इत्यभि-

धानरत्नमालायाम् । प्रुष्टप्लुष्टोषिता दग्धे इत्यमरः **सौहित्यम्**—सुहितस्य भाव इति सुहित + ष्यञ् । शिखरिणी छन्दः श्रीरामप्रतापरूपोवस्तुध्वनिः ।

पुनरश्वानां द्रुतगतिं विशेषयति—

भाण्डप्रभूतरुचयः सकलान् दिगन्ता-
नुल्लंघितुं सततमुत्सुकतां दधानाः ।
वाहास्तुलाकलनवारितगन्धवाहा
भूमिस्पृशस्तव न राघव चित्रमेतत् ॥७२॥

माधुरी—हे राघव ! **भाण्डप्रभूतरुचयः** भाण्डेन आभूषणेन प्रभूता रुचिः कान्तिर्येषां ते (बहु०) [भाण्डानां प्रभूते एकस्योपर्येककरणे रुचिर्येषां ते] **सकलान् दिगन्तान् उल्लंघितुम्** सर्वत्र गन्तुम् **सततम्** निरन्तरम् **उत्सुकतां दधानाः** उत्सुकाः **तुलाकलनवारितगन्धवाहाः** सादृश्ये वायोरधिकवेगवन्तः [माने (वस्त्रादिभिः) वायोर्निवृत्तिकारकाः] **तव वाहाः**—अश्वाः **भूमिस्पृशः** गमने भूमिं स्पृशन्त एव न तु तत्रगच्छन्तः [पोतवणिजः] **एतत् चित्रं** आश्चर्यकरं नेति भावः ।

हिन्दी अनुवाद—हे राघव ! भाण्ड (जीन या साज) से शोभाशाली सभी दिशाओं के अन्त तक जाने के लिये सदा उत्सुक, सदृशता में हवा को हरा देने वाले तुम्हारे घोड़े पृथ्वी का स्पर्श मात्र करने वाले [समुद्री जहाजों के व्यापारी] हैं यह आश्चर्य कर नहीं है ।

भूमिस्पृक् समुद्री जहाजों के व्यापारियों को भी कहते हैं उस पक्ष में यह अर्थ होगा—

हे राम ! बरतनों के सजाने में (एक के ऊपर एक रखने में) प्रबल इच्छा वाले, सर्वत्र जाने के सदा उत्सुक, तौलते समय (ठीक तौल के लिये कपड़े आदि के द्वारा) हवा को रोकने वाले (प्रायः समुद्रयान में रहने के कारण) भूमि का स्पर्श मात्र करने वाले व्यवसायी हैं ।

टिप्पणी—**भाण्डम्**—भाण्डं भूषणमात्रे स्यात्तुरंगाभरणेष्वपि मूले वणिग्धने भाण्डं भाण्डं भाजनमिष्यते इति धरणिः । **तुला**—तुलापलशते माने भाण्ड सादृश्यराशिष्विति धरणिः । **वाहाः**—वाहाः स्मृता भुजाया वाहो यानतुरंगयोरिति धरणिः । **भूमिस्पृशः**—ऊरव्या ऊरुजा अर्या वैश्या भूमिस्पृशो विशः इति अश्वाः भूमिस्पृशः पोतवणिजश्चेत्यमरः । **वसन्ततिलकाच्छन्दः समासोक्तिरलंकारः ।**

हेषां कुर्वतामश्वानां गतिवैचित्र्यमाह—

रेणुस्तोमैः सहन्ते स्थगनमपि निजस्वामिनो यत्पृथिव्याः
पद्भिर्नो विक्षतायास्तदिह रविरथे मन्थराः केऽपि रथ्याः ।
इत्यारब्धाट्टहासा इव तव हरयस्तारहेषामिषेण
प्रस्थाने तीव्रवेगस्वगतिविलसितैः कं न विस्मापयन्ति ॥७३॥

माधुरी—[हे राम !] **नः** अस्माकं **पद्भिः** खुरैरित्यर्थः **विक्षतायाः** दलितायाः (खातायाः) **पृथिव्याः रेणुस्तोमैः**धूलिपटलैः **निजस्वामिनः** (सूर्यस्य) **स्थगनम् अपि** आच्छादनम् अपि **यत्** यतः न **सहन्ते** मर्षयन्ति **तत्** तेन इह **रविरथे केऽपि रथ्याः** साधारणाः अश्वाः **मन्थराः** मन्दाः सन्ति **इति** एवम् **तारहेषामिषेण** उच्चैःस्वनव्याजेन **आरब्धाट्टहासाः** उच्चैः हसन्तः इव **प्रस्थाने** गमनकाले **तीव्रवेगस्वगतिविलसितैः** द्रुतगमनशोभाभिः **कं न विस्मापयन्ति**—सर्वस्यैव विस्मयकारकं तेषां द्रुतगमनमितिभावः ।

हिन्दी अनुवाद—[हे राम !] 'हमारे पैरों (खुरों) से खोदी गई पृथिवी के धूलिसमूह से अपने स्वामी (सूर्य) के आच्छादन को भी जो नहीं रोक सकते, अतः इस रवि के रथ में (जुते हुये) कोई (साधारण) घोड़े बड़े मन्द हैं । (उनमें स्वाभिमान का भाव नहीं है ।)' इस प्रकार ऊँचे स्वर (हिनहिनाना) के बहाने से मानों अट्टहास करते हुये प्रस्थान-काल में (अपनी) द्रुतगति की शोभा से किसे नहीं विस्मित करते । (तुम्हारे घोड़ों की द्रुतगति सर्वजनविस्मयकारिणी है ।)

टिप्पणी—**स्थगनम्**—स्थगनं स्तम्भनमाच्छादनञ्च **मन्थराः**—अलसः शीतको मन्दो जडो जाल्मश्च मन्थर इत्यभिधानरत्नमालायाम् **रथ्याः**—रथ्यो रथस्य वोढास्याद्रथ्या मार्गरथौघयोरिति धरणिः । **अट्टहासः**—अट्टोऽतिशयोहासः इत्यट्टहासः √ अट्ट् (अतिशये) + अच् अट्टः यद्वा टकारोध्वनिरुच्यते इत्येकाक्षरः अटन् अतिशयिततरो टो ध्वनिर्यस्यैवंभूतो हासो ऽ ट्टहासः यद्वा अटः शकटध्वनिः सोऽवरोध्वनिर्यस्येति सः यद्वाऽट्टेत्यनुकरणशब्दः । अट्टं शुष्के च भक्ते स्याच्चाट्टमत्यर्थगेहयोरिति विश्वः । **तारहेषा**—उच्चैस्तरो ध्वनिस्तार इत्यभिधानरत्नमालायाम् अश्वानां हेषा ह्रेषा च निःस्वन इत्यमरः । **स्रग्धरावृत्तम् अपह्नुत्युत्प्रेक्षयोः साङ्कर्यम्** ।

श्रीरामस्याश्वैः खुरैः पृथ्वीदारणमाकाशरन्ध्रपूरणञ्च वर्णयति—

शक्ता वाहास्तव वसुमतीमस्पृशंतोऽपिगन्तुं
सञ्चिन्त्येति स्वखुरमुशलैर्मेदिनीं दारयन्ति ।
हेषाभिर्नो विदलति बत ब्रह्मणोऽडंगताभि-
र्व्योम क्षिप्तं तदिह रजसा साधु नीरन्ध्रयामः ॥७४॥

माधुरी—[हे राघव !] तव **वाहाः** अश्वाः **वसुमतीम्** पृथ्वीम् **अस्पृशन्तोऽपि** स्पर्शं न कुर्वाणा अपि **गन्तुं शक्ताः** समर्थाः **इति सञ्चिन्त्य** विचार्य **स्वखुरमुशलैः** खुररूपिभिः कण्डनकैः **मेदिनीम् दारयन्ति** विदीर्णां कुर्वन्ति । (ते कथयन्ति यत्) **बत** आश्चर्यमस्ति **ब्रह्मणोऽण्डं भुवनान्तं गताभिः नो** ऽस्माकं **हेषाभिः उच्चस्वनैः व्योम** गगनं **विदलति** विदीर्णं भवति (वयम्) **इह क्षिप्रं** शीघ्रम् **तत्** (व्योम) **रजसा** परागेण **साधु** सम्यक् **नीरन्ध्रयामः**—छिद्ररहितं कुर्मः ।

हिन्दी अनुवाद—[हे राम !] तुम्हारे घोड़े पृथ्वी का स्पर्श न करते हुये भी चलने में समर्थ हैं यह विचार कर वे अपने खुर रूपी मूसलों से पृथ्वी को विदीर्ण करते हैं। (मानों उनका विचार है—) आश्चर्य है कि भुवनान्त तक गये हुये हमारे उच्चस्वन (हिनहिनाहट) से आकाश विदीर्ण हो रहा है अतः (हम) यहाँ शीघ्र ही धूलि से उस (आकाश) को भली भाँति छिद्र रहित कर रहे हैं।

(प्रायः देखा जाता है कि मनुष्य एक स्थान से मिट्टी को लेकर उसे कूट कर महीन बनाते हैं फिर उसे छिद्रों में भरते हैं। घोड़ों का पृथ्वी को खुरों से खोदना, मसलना तथा अपने शब्द के कारण फटे हुये आकाश को भरना यही व्यक्त करता है।)

टिप्पणी—**खुरमुशलैः**—शफं क्लीबे खुरः पुमानित्यमरः मुशलं स्यात्कण्डनके इति धरणिः । **नीरन्ध्रयामः**—निर्गतानि रन्ध्राणि यस्मात्तत् नीरन्ध्रम् तत् कुर्मः इति नामधातुप्रयोगः । **मन्दाक्रान्तावृत्तम् रूपकं हेतूत्प्रेक्षा काव्यलिङ्गं चालङ्काराः ।**

इत्यश्ववर्णना समाप्तिमगात् ।

अथहस्तिवर्णना

श्रीरामस्य गजानां स्वभावं कथयति—

राजन्नेते गजास्ते तनुतुलितनवाम्भोधराः संनदन्तः
सिन्दूरोद्भासिकुम्भाः कियदिह न भयं विद्विषामावहेयुः ।
हस्तेनैकेन कृष्टान् विपिनविटपिनस्त्रोटयन्तस्तटीर्ये
दन्ताघातैः समन्ताद् विदधति विलसत्खर्वताः पर्वतानाम् ।७५।।

माधुरी—हे राजन् ! **तनुतुलितनवाम्भोधराः** नवजलदसदृशशरीराः **संनदन्तः** शब्दायमानाः **सिन्दूरोद्भासिकुम्भाः** सिन्दूरेण विलसद्गण्डस्थलाः **ते एते गजाः इह** अत्र

विद्विषां शत्रूणां **कियद्भयम् न आवहेयुः** कुर्युः। ये **एकेन** केवलेन **हस्तेन** शुण्डया **विपिनविटपिनः** वन्यवृक्षान् **त्रोटयन्तः दन्ताघातैः** पर्वतानां **तटीः** तटप्रदेशान् **समन्तात्** सर्वतः **विलसत्खर्वताः** विलसन्ती खर्वता ह्रस्वता यासां ताः **विदधति** कुर्वन्ति।

हिन्दी अनुवाद—हे राजन्! जिनका आकार नवीन जलद के समान है ऐसे, शब्द करते हुये सिन्दूर से मण्डित कपोल प्रदेश वाले तुम्हारे ये हाथी यहाँ शत्रुओं को अधिक भयभीत क्यों न करें। जो केवल (अपनी) सूँड़ से जङ्गल के वृक्षों को तोड़ते हुये दाँतों के आघात से पर्वतों के तट प्रदेशों को सब ओर से छोटा कर देते हैं।

टिप्पणी—**तनुतुलितनवाम्भोधराः**—तन्वा तुलिताः नवा अम्भोधरा यैस्ते (बहु०) **सिन्दूरोद्भासिकुम्भाः**—सिन्दूरेणोद्भासिताः कुम्भाः येषान्ते (बहु०) **एकेन**—केवलेन एकोऽन्यार्थे प्रधाने च प्रथमे केवले तथा। साधारणे समानेऽल्पे संख्यायाञ्च प्रयुज्यते। **स्रग्धरावृत्तम्** उपमास्वभावोक्तिश्चालङ्कारौ।

श्रीरामस्य गजपङ्क्तेः क्रीडावैशिष्ट्यं वर्णयति—

कायैरेतैः स्वकीयैरभिनवविलसत्फुल्लतापिच्छतुल्यैः
क्रीडाभग्नाध्वजन्मोन्नतविटपिशतभ्रंशिभिः पत्रजालैः।
पङ्कैरश्रान्तगण्डद्वयमदसलिलासारसंवर्धितैश्च
श्यामीकुर्वन्ति वीर क्षितिवलयमिदं सिन्धुरश्रेणयस्ते ॥७६॥

माधुरी—हे वीर! ते **सिन्धुरश्रेणयः** गजराजयः **अभिनवविलसत्फुल्लतापिच्छतुल्यैः** नवपुष्पिततमालसदृशैः **स्वकीयैः एतैः कायैः** एभिः स्वशरीरैः **क्रीडाभग्नाध्वजन्मोन्नतविटपिशतभ्रंशिभिः** क्रीडायां भग्नाः येऽध्वजन्मानः मार्गोत्पन्नाः विटपिनः वृक्षा स्तेषां शताद्भ्रंशिभिः पतितैः **पत्रजालैः** पत्रसमूहैः **अश्रान्तगण्डद्वयमदसलिलासारसंवर्धितैः** निरन्तरो यः गण्डद्वयस्य मदसलिलस्यासारः धारासम्पातस्तेन संवर्धितैः वृद्धिगतैः **पङ्कैश्च इदं क्षितिवलयं** पृथ्वीमण्डलं **श्यामीकुर्वन्ति** श्यामवर्णं विदधति।

हिन्दी अनुवाद—हे वीर! (रामभद्र!) तुम्हारे हाथियों की पङ्क्तियाँ नवीन पुष्पित तमाल के सदृश अपने इन शरीरों से, क्रीडा में टूटे हुये मार्ग में उत्पन्न सैकड़ों वृक्षों से गिरे हुये पत्र समूहों से तथा दोनों कपोलों से निरन्तर बहती हुई मदजल की धारा से इस पृथ्वी मण्डल को श्यामवर्ण का (काला) बना रहे हैं।

टिप्पणी—**तापिच्छः**—कालस्कन्धस्तमालः स्यात्तापिच्छ इत्यमरः। **सलिलासारः**—धारासम्पात आसार इत्यमरः। **सिन्धुरश्रेणयः**—सिन्धुराणां श्रेणयः—पंक्तयः कुम्भी **कुञ्जरवारणेभरदिनः** सामोद्धताः सिन्धुरा इत्यभिधानरत्नमालायाम्। **स्रग्धरावृत्तम्** **उपमा स्वभावोक्तिश्चालङ्कारौ।**

गजैः श्रीरामगृहस्य शोभां वर्णयति—

तव गृहमतुलबलाका-
रचितश्रीकैः स्फुरत्करकवर्षैः ।
वृन्दै र्विभाति करिणां
शिखरमिवाद्रे र्नवाम्बुवाहानाम् ॥७७॥

माधुरी—अतुलबलाकारचितश्रीकैः [अनिर्वचनीयबकपंक्तिशोभायुतैः] अतुलबलेनाकारेण च कृत शोभा सहितैः स्फुरत्करकवर्षैः [उपलवर्षणशोभितैः] प्रकटित शुण्डाजलवर्षैः नवाम्बुवाहानाम् नवीनमेघानां वृन्दैः समूहैः अद्रेः पर्वतस्य शिखरमिव करिणां वृन्दैः तव गृहम् विभाति शोभते ।

हिन्दी अनुवाद—अति सुन्दर बक पंक्ति की शोभा से युक्त, ओलों की वर्षा से सुशोभित नवीन मेघों के समूहों से जैसे पर्वत शिखर शोभित होता है उस तरह अतुलनीय बल तथा आकृति की शोभा से सम्पन्न, जिनकी सूँड़ से जल की वर्षा हो रही है ऐसे हाथियों के झुण्ड से आपका सौध (महल) शोभित हो रहा है ।

टिप्पणी—अतुलबलाकारचितश्रीकैः—मेघ पक्षे अतुला—अतुलनीया या बलाका बक पंक्ति स्तया रचिता शोभा येषु ते तैः हस्तिपक्षे अतुलं यद् बलमाकारश्च ताभ्यां रचिता शोभा यैस्ते तैः (बहु०) स्फुरत्करकवर्षैः—मेघपक्षे स्फुरन् करकानां वर्षो येभ्यस्ते तैः हस्ति पक्षे स्फुरत् करात् कं—जलं तस्य वर्षो येषां ते तैः (बहु०) बलाका बक पंक्तिः स्यादित्यमरः । करकस्तु पुमान् पक्षिविशेषे दाडिमेऽपिच । द्वयोर्मेघोपले न स्त्री करकं च कमण्डलाविति मेदिनी । वर्षोपलस्तु करकेत्यमरः । अम्बुवाहः—वार्वारिकं पयोऽम्भोऽम्बु पाथोऽर्णसलिलं जलमित्यभिधानरत्नमालायाम् अभ्रं मेघो वारिवाहः इत्यमरः । गीतिश्छन्दः पूर्णोपमाऽलङ्कारः ।

गजसमूहस्य बलेवैशिष्ट्यं कथयति—

तव गजगणेन तुल्यो
न ख्यातो बलितयाऽपि दैतेयः ।
अस्य प्रवर्तते य-
न्निवृत्तमसितस्य तद्दानम् ॥७८॥

माधुरी—दैतेयः प्रह्लादपौत्रो बलि दैत्यः बलितया बलवत्तया [बलिनाम्ना] अपि तव भवतो गजगणेन हस्तिसमूहेन तुल्यः सदृशः न ख्यातः प्रसिद्धः [यतः] असितस्य

श्यामस्य अस्य गजसमूहस्य यत् दानम् मदजलं प्रवर्तते प्रकटीभवति, तत् असितस्य विष्णुना बद्धस्य तस्य बलेः निवृत्तम् समाप्तम् भवतीतिशेषः। (दानाकरणात् विष्णुना बद्धो बलिरिति कथा प्रसिद्धाऽस्ति ।)

हिन्दी अनुवाद—[हे राम !] राजा बलि (प्रह्लाद के पौत्र) बली होने से [बलिनाम से] भी तुम्हारे हाथियों के समूह के समान प्रसिद्ध नहीं हैं [क्योंकि] कालेरंग के इस गजसमूह के जो मदजल बहता है वह (मदजल) विष्णु के द्वारा बाँधे गये उन (बलि) का समाप्त हो जाता है। (प्रतिज्ञा करके दान न कर सकने के कारण बलि को विष्णु-भगवान् ने बाँधा था यह कथा प्रसिद्ध है।)

टिप्पणी **बलितया**—बलम् अस्यास्तीति बली बलिनामको दैत्यश्च तस्य भावस्तया **असितस्य**—श्यामवर्णस्य षष्ठिहायनो हस्ती श्यामो भवतीति हस्तिशास्त्रविशारदाः पक्षे, अः विष्णुस्तेन सितो बद्धः (षिञ् बन्धने + क्तः) अकारो वासुदेवः स्यादाकारस्तु पितामहः इत्येकाक्षरः आर्यावृत्तम् व्यतिरेकालङ्कारः।

रामद्विपानां रामसाम्यं दर्शयति—

शृङ्गारिणो रणसमापितवैरिदर्पाः
दानोद्धताः सततमादरिणः करेणौ ।
उद्यद्घनालिरुचयो नवचामरश्री-
संसेवितास्त्वमिव राम नृप द्विपास्ते ॥७९॥

माधुरी—हे राम नृप ! महाराज श्रीराम ! ते द्विपाः तव गजाः **त्वम् इव** त्वत्सदृशाः **शृङ्गारिणः** शृङ्गारयुक्ताः **रणसमापितवैरिदर्पाः** युद्धेषु शत्रुगर्वनाशकाः **दानोद्धताः** [रामपक्षे दानशीलस्य] प्रबलमदजलाः **करेणौ** [रामपक्षे गजे] हस्तिन्याम् **आदरिणः** प्रीतिमन्तः **उद्यद्घनालिरुचयः** [रामपक्षे सजलजलदनीलस्य सघनभ्रमरकान्तेर्वा] स्फुरन्मधुकरराजिकान्तयः **नवचामरश्रीसंसेविताः** नूतनचामरशोभा संयुक्ताः (सन्तीति शेषः)। (श्लोके गजविशेषणपदानां रामपक्षे प्रथमान्तत्वं षष्ठ्यन्तत्वं वा विभक्तिविपरिणामेन कर्त्तव्यम्।)

हिन्दी अनुवाद—हे महाराज श्रीराम ! आपके हाथी आपके समान हैं। आप शृङ्गारयुक्त, शत्रुगर्वनाशक, सदा दान करने से उन्नत, गज के प्रेमी, सघन भ्रमर की आभा वाले तथा नूतन चामरों की शोभा से सेवित हैं तथैव आपके हाथी भी सजे हुए, शत्रुओं के दर्प को नष्ट करने वाले, सदा मदजल से गर्वित, हथिनी के प्रति प्रीतिपूर्ण, [ऊपर] मँड़राते हुये भ्रमरों की कान्ति से युक्त तथा चामरों की सम्पत्ति से समृद्ध हैं।

टिप्पणी—शृङ्गारिणः—शृङ्गार+इनि गजो हरितालादिना रामस्तु भूषणादिभिः शृङ्गारी भवति। **करेणौ**—गजे च हस्तिन्याम् **उद्यद्घनालिरुचयः**—उद्यन्ती घना अलीनां रुचि र्येषु ते यद्वा उद्यन्ती सघना अलिभी रुचिर्येषांते उद्यन्ती घनानां मेघानाम् आलिस्तस्या रुचिरिव रुचि र्येषु ते वा (बहु०) अत्रार्थवशाद् विभक्तिविपरिणामः। न लिङ्गवचनेभिन्ने न हीनाधिकताऽपिवा। उपमादूषणायालं यत्रोद्वेगो न धीमतामिति दण्डी। बसन्ततिलका वृत्तं श्लेषः पूर्णोपमाचालङ्कारौ।

पुनरपि तथैव गजान् वर्णयति—

विलसदलिनिवहनीलाः
कलिता नक्षत्रमालयोज्ज्वलया।
स्फुरदुरुपेचकरुचय-
स्तवान्धकारानुकारिणः करिणः ॥८०॥

माधुरी—[हे राम!] तव भवतः **विलसदलिनिवहनीलाः** सुशोभितभ्रमरसमूहेन नीलवर्णाः **उज्ज्वलया नक्षत्रमालया कलिताः** एकावलीनामिकया शुभ्रमौक्तिकमालया शोभिताः **स्फुरदुरुपेचकरुचयः** विलसन्मञ्जुपुच्छमूलेन विराजिताः **करिणः** गजाः [सदृश विशेषणैः] अन्धकारानुकारिणः अन्धकारम् अनुकुर्वन्ति।

हिन्दी अनुवाद—[हे राम!] आपके विलसित भ्रमर समूह के कारण (अथवा उसके समान) नील वर्ण के, एकावली नामक शुभ्रमौक्तिकमाल से सुशोभित चमकीले श्रेष्ठ पुच्छमूल से विराजमान हाथी [समान विशेषण विशिष्ट] भ्रमर समूह के समान नीले, नक्षत्रमाला से शोभित उल्लुओं की चमक वाले अन्धकार का अनुकरण करते हैं।

टिप्पणी—नक्षत्रमालया—गजपक्षे मौक्तिकैः अन्धकारपक्षे आकाशवर्तिना नक्षत्रसमूहेन एकावल्येकयष्टिका सैवनक्षत्रमाला स्यात्सप्तविंशतिमौक्तिकैरित्यमरः **स्फुरदुरुपेचकरुचयः**—गजपक्षे पेचकरुचिः पुच्छमूलशोभा अन्धकारपक्षे उलूकशोभा सा स्फुरन्ती येषु विभक्तिविपरिणामेन यस्मिन् वा। उलूके करिणः पुच्छमूलोपान्ते च पेचकः इत्यमरः। गीतिश्छन्दः उपमालङ्कारः।

श्रीरामस्य हस्तिनामिन्द्रचापसादृश्यं वर्णयति—

बृंहितैरुपहसन्ति वारिदा-
नुल्लसदविमलदन्तदीप्तयः।
किङ्किणीमणिमयूखदानव-
द्वेषिचापरुचिरास्तव द्विपाः ॥८१॥

माधुरी—[हे राम !] उल्लसद्विमलदन्तदीप्तयः उल्लसन्ती विमलदन्तानां दीप्ति र्येषान्ते (बहु०) **किंकिणीमणिमयूखदानवद्वेषिचापरुचिराः** किंकिणीनां मणय एव मयूखास्तैः सह वर्तमानं यद् दानवद्वेषिणः इन्द्रस्य चापं तद्वत् रुचिराः सुन्दराः **तव द्विपाः** हस्तिनः **बृंहितैः** गर्जनैः **वारिदान्** मेघान् **उपहसन्ति** अवमानयन्ति ।

हिन्दी अनुवाद—[हे राम !] जिनके दाँतों की कान्ति फैल रही है ऐसे, घंटियों में लगी हुई मणिरूपी किरणों के सहित इन्द्रधनुष के समान सुन्दर आपके हाथी अपने गर्जनों (चिग्घाड़) से मेघों का उपहास कर रहे हैं ।

टिप्पणी— बृंहितैः—हस्तिनां तारस्वरो बृंहितं बृंहणं वा कथ्यते यथोक्तम् अन्यत्रापि 'अमरमहेभबृंहितानि' (किरात० ७।३९) तथा 'बृंहणैर्वारणानाम्' शिशुपाल० १९।३) किंकिणी—किंकिणी क्षुद्रघण्टिकेत्यमरः । **रथोद्धतावृत्तम् व्यतिरेकालङ्कारः ।**

श्रीरामस्य हस्तिरूपिणो जलदसमूहस्य वर्णनम्—

दिशि दिशि दधतीषु प्रोन्नतिं तावकीन-
द्विपजलदघटासु क्षोणिनाथ ! स्थितासु ।
प्रतिभटनृपतीनामस्तु नाम क्व तेजः-
सवितुरुदयवार्ता कीर्तिशीतद्युतेर्वा ॥८२॥

माधुरी—हे क्षोणिनाथ जगदीश्वर ! **तावकीनद्विपजलदघटासु** तव गजसमूहरूपिणीषु मेघमालासु **दिशिदिशि प्रोन्नतिं दधतीषु स्थितासु** परितो [युद्धरूप] गगनमधिष्ठितासु **नाम** यथार्थरूपेण **प्रतिभटनृपतीनाम्** शत्रुनृपाणाम् **तेजः सवितुः** प्रतापरूपिणो रवेः **कीर्तिशीतद्युतेः** यशश्चन्द्रमसः **उदयवार्ता** उदयचर्चा **क्व** कुत्र **अस्तु** (न भवितुं शक्नोतीतिभावः) ।

हिन्दी अनुवाद—हे जगदीश्वर ! तुम्हारे गजसमूहरूपघनघटाओं के सब ओर घुमड़कर [युद्धस्थल रूप] गगन में स्थित हो जाने पर यथार्थतः शत्रु राजाओं के तेज रूपी सूर्य तथा कीर्तिरूपी चन्द्रमा के उदय की चर्चा कहाँ हो सकती है ?

(**विशेष तात्पर्य**—जैसे घनघटा के आकाश में छा जाने पर (वर्षा के दिन व रातों में) सूर्य व चन्द्रमा के दर्शन नहीं होते तथैव युद्धस्थल में सब ओर आपकी गजघटा के जमजाने पर शत्रु का प्रताप व यश दोनो नहीं रहते अर्थात् पराजित होने पर शत्रु के प्रताप व कीर्ति का विनाश हो जाता है ।)

टिप्पणी—नाम—नाम प्राकाश्य—सम्भाव्य—क्रोधोपगमकुत्सने इत्यमरः यथा 'विनीतवेषेण प्रवेष्टव्यानि तपोवनानि नाम' (अभिज्ञान सर्ग० १) तेजः.......**शीतद्युतेर्वा**

वर्षाकाले मेघाच्छन्ने गगने न दिवा सूर्यस्य न च रात्रौ चन्द्रमसो दर्शनं भवतीति भावः। मालिनीच्छन्दो रूपकालङ्कारः।

भूयोऽपि श्रीरामस्य हस्तिनां कर्णशोभां वर्णयति—

करिणां तवाभिनवतोयदत्विषा-
मखिलेन्दुधामधवलैरपि प्रभो !
श्रुतिचामरैः करटभित्तिषुक्षरन्-
मदमज्जनात्क्व परभागसम्भवः ॥८३॥

माधुरी—हे प्रभो ! तव अभिनवतोयदत्विषाम् नवजलधरवर्णानां **करिणाम्** गजानाम् अखिलेन्दुधवलैः पूर्णचन्द्रमण्डलवद् विशदैः अपि **श्रुतिचामरैः** श्रुतयः एव चामराणि तैः **करटभित्तिषु** गण्डस्थलेषु **क्षरन्मदमज्जनात्** क्षरत् च्यवत् यत् मदजलं दानवारि तत्र मज्जनात् बुडनात् **परभागसम्भवः** गुणोत्कर्षः **क्व** (प्राप्यते इति शेषः)।

हिन्दी अनुवाद—हे प्रभो ! तुम्हारे नवजलधर के समान (नीले) रंग के हाथियों के पूर्णचन्द्र के समान गौर कर्णरूपी चामर, कपोल प्रदेश में बहते हुये मदजल में डूबे रहने के कारण (उस चन्द्रमा की) उत्तम शोभा को कहाँ प्राप्त कर सकते हैं।

टिप्पणी—**अभिनवतोयदत्विषाम्**—अभिनवो यस्तोयदस्तस्यत्विडिव त्विड्येषां ते तेषाम् (बहु०) 'चयस्त्विषामित्यवधारितं पुरा' (शिशु० १।३) **करटभित्तिषु**—करटो दर्दुरूढेस्यात्काकद्विरदगण्डयोरिति धरणिः। काष्ठेभगण्डौ करटावित्यमरः। **परभागसम्भवः**—परोभागः (कर्म०) गुणोत्कर्षस्तस्य सम्भवस्तस्मात् 'लब्धपरभागतयाऽधरोष्ठे' (रघु० ५।७०) 'तस्याः कपोले परभागलाभात्' (कुमार ७।१७) अत्र श्रुतिचामरैरिति पदे श्रुतिशब्देन वेदविषये स्थितैर्विद्वद्भिः मदमज्जनात् मदे सुरायां गर्वे वा मज्जनात् परभागो ब्रह्मणः परमंपदं क्व प्राप्यते इति श्लेषालङ्कार ध्वनिः मञ्जुभाषिणीवृत्तम्।

श्रीरामस्य गजानां महोच्चतामाह—

पताकास्त्वदीयद्विपानाममीषां
न युक्ता महाराज माहारजन्यः।
भवत्यासु रागं निराकर्तुमाशु
ध्वजाग्रक्षताम्भोदनिष्ठ्यूतमम्भः ॥८४॥

माधुरी—हे महाराज ! अमीषां त्वदीयद्विपानाम् माहारजन्यः कुसुम्भरागरञ्जिताः पताकाः ध्वजाः न युक्ता योग्याः (कृता इति शेषः) कुत इत्युत्प्रेक्षायामाह-ध्वजाग्रक्षतधम्भोद

निष्ठ्यूतम् ध्वजशिखराहतमेघवान्तम् **अम्भः** जलम् **आसु** पताकासु **रागम्** रक्तताम् **आशु** शीघ्रं **निराकर्तुम्** दूरीकरणाय भवति । (व्याजेन पताकानामुच्चतां प्रशंसतीति भावः ।)

हिन्दी अनुवाद—हे महाराज ! तुम्हारे इन हाथियों के ऊपर लगी हुईं कुसुम्भी रंग से रंगी हुई [ऊँची] पताकायें ठीक नहीं हैं [क्योंकि] पताकाओं की नोक से आहत मेघ से उगला जल इनके रंग को शीघ्र ही दूर कर देता है । (गगन स्पर्शी ध्वज हैं यह भाव है ।)

टिप्पणी—माहारजन्यः—महारजनेन कुशुम्भेन रञ्जिताः इति महारजन + अण् सूत्रम् 'तेन रक्तं रागात्' (अष्टा० ४।२।१) स्यात्कुशुम्भं वह्निशिखं महारजनमित्यपीत्यमरः **निष्ठ्यूतम्**—(नि √ ष्ठिव् + क्त) निष्ठ्यूताविद्धक्षिप्तेरिताः समाः इत्यमरः । 'निष्ठ्यूतश्चरणोपभोगसुलभः' (शाकुन्तल० ४ सर्ग) **भुजङ्गप्रयातंछन्दः व्याजस्तुतिरलङ्कारः** ।

द्विपकर्तृकं तरुभंगं हेतुपुरस्सरंदर्शयति—

पत्राधिकाः सकरटाः सपेचकाः के पुरोभवितुमेते ।
अस्माकमिति सकोपै र्भज्यन्ते तावकैर्द्विपैस्तरवः ॥८५॥

माधुरी—[हे राम] (वयम्) **पत्राधिकाः** पत्रेभ्यः चित्रेभ्योऽधिकाः श्रेष्ठाः [वृक्षा अपि पत्रेभ्यः पलाशेभ्योऽधिकाः स्थूलाः] **सकरटाः** कपोलस्थलयुक्ताः [वृक्षाः काकयुक्ताः] **सपेचकाः** पुच्छमूलोपान्तयुक्ताः [वृक्षास्तु उलूकयुक्ताः] **एते** वृक्षाः **अस्माकम् पुरः** समक्षम् **भवितुं के** (सन्तीतिशेषः) **इति** हेतोः **सकोपैः** कुपितैः **तावकैः** त्वदीयैः **द्विपैः तरवः** वृक्षाः **भज्यन्ते** त्रोट्यन्ते ।

हिन्दी अनुवाद—[हे राम !] (हम) पत्रभङ्गों से श्रेष्ठ कपोलस्थल तथा पुच्छमूल के सहित हैं । [वृक्ष भी पत्तों के कारण मोटे, कौवे तथा उल्लुओं से युक्त हैं, तथापि वे] हमारे सामने होने वाले कौन हैं इस कारण तुम्हारे कुपित हाथियों के द्वारा वृक्ष तोड़े जा रहे हैं ।

टिप्पणी—पत्राधिकाः—पत्रेभ्यः अधिकाः (सुप्०) पत्रं स्याद्वाहने वर्णे पत्ते च शरपक्षिणोरिति धरणिः । **सकरटाः** करटैः सह वर्तमानाः (बहु०) करटो दर्दुरूढे स्यात्काकद्विरदगण्डयोरिति धरणिः । **सपेचकाः** पेचकैः सह वर्तमानाः (बहु०) उलूके करिणः पुच्छमूलोपान्ते च पेचकः इत्यमरः । **गीतिश्छन्दः शब्दश्लेषः का व्यलिङ्गञ्चा लङ्कारः** ।

गजकर्णचामराणां सौन्दर्यमाह—

माञ्जिष्ठान्यपिदानै-
र्देव श्रुतिचामराणि तव करिणाम् ।
भण्टाकीकुसुमच्छवि-
लुण्टाकीभूय सपदि शोभन्ते ॥८६॥

माधुरी—हे देव ! तव करिणाम् माञ्जिष्ठानि मञ्जिष्ठया रक्तानि अपि श्रुतिचामराणि श्रुतय एव चामराणि दानैः मदजलैः सपदि तत्कालमेव भण्टाकीकुसुमच्छविलुण्टाकीभूय वार्ताकीपुष्पशोभाम् चोरयित्वा शोभन्ते विराजन्ते ।

हिन्दी अनुवाद—हे महाराज ! तुम्हारे हाथियों के मँजीठ से लाल भी कर्णरूपी चंवर मदजल के कारण तत्काल भाँटा के फूल की कान्ति (लाल व काले रंग का मिश्रण) के लुटेरे बनकर शोभित होते हैं । (मँजीठ से रंगे गये वे कर्णरूपी चामर मदजल की श्यामता से भाँटा के फूल के रंग के हो जाते हैं, यह तात्पर्य है ।)

टिप्पणी—**माञ्जिष्ठानि**—मंजिष्ठया रक्तानि मञ्जिष्ठा + अण् **भण्टाकी**—वार्ताकीहिंगुलीसिही भण्टाकी दुःप्रधर्षिणीत्ययरः । **लुण्टाकीभूय**—न लुण्टाको लुण्टाको भवतीत्यभूततद्भावे च्विप्रत्ययः भूत्वेत्यर्थे प्रस्तुतं पदम् सिद्ध्यति । गीतिश्छन्दः अनुप्रास उपमालङ्कारश्च ।

पुनरपि राघवेन्द्रस्य करीन्द्रान् वर्णयति—

मदजलभरभाजो मञ्जुलोन्निद्रपद्माः
स्फुरितमणिमयूखा धातुरागच्छलेन ।
नरपतिवर सृष्टा जङ्गमाः शिल्पिभिः कै-
स्तव समरजयश्रीकेलिशैलाः करीन्द्राः ॥८७॥

माधुरी—हे **नरपतिवर** ! जनेश्वर शिरोमणे ! **मदजलभाजः** मदजलयुक्ताः [गिरयोऽपिजलयुक्ताः] **मञ्जुलोन्निद्रपद्माः** (कर्णेषु) सुन्दरकमलचिह्नसहिताः [गिरयोऽपिजलाशयेषु प्रफुल्लपद्मयुक्ताः] **धातुरागच्छलेन** गैरिकादिरागव्याजेन **स्फुरितमणिमयूखाः** मणिकिरणच्छुरिताः [पर्वता अपि मणिकान्तिविलसिताः] **तव जङ्गमाः** चलाः **समरजयश्रीकेलिशैलाः** समरे जयलक्ष्मीक्रीडापर्वताः **करीन्द्राः** गजेन्द्राः **कैः शिल्पिभिः** कारुभिः **सृष्टाः** रचिताः ।

हिन्दी अनुवाद—वे नृपतिचक्रचूडामणे ! मदजल से युक्त, (कानों मे) सुन्दर कमल चिह्नों से सुशोभित गेरू हरिताल आदि सजावट के रंगों के बहाने मणियों की किरणों से विराजित युद्धों में विजयलक्ष्मी की क्रीड़ा के लिये निर्मित जङ्गम पर्वत रूपी तुम्हारे गजेन्द्र किन शिल्पियों के द्वारा बनाये गये हैं । [पर्वत भी जल, प्रफुल्ल कमल तथा मणियों की कान्ति से युक्त होते हैं ।]

टिप्पणी—**मञ्जुलोन्निद्रपद्मा**—मनोज्ञं मञ्जुलमित्यमरः, पद्मं सरोजस्मृतमितिधरणिः । हस्तिनां विशेषण साम्यात् पर्वतता, उच्चतया च तेषां समानता भवति । **नालिनीच्छन्दो रुपकालङ्कारः** ।

करेण विराजमानान् करिणो वर्णयति—

उल्लसन्नवनागसम्भवरेणुरञ्जितमौलयः

क्षुण्णकुङ्कुमपिञ्जरेण करेण नीलरुचस्तव ।

वारणा बहुरागकंबलसंवृता दधति प्रभो !

चन्द्रदीधितिचारुचामरसंयुतश्रुतयः श्रियम् ॥८८॥

माधुरी—हे प्रभो ! नीलरुचः श्यामलाभस्य तव उल्लशन्नवनागसम्भवरेणुरञ्जितमौलयः सिन्दूररञ्जितशिरसः बहुरागकंबलसंवृताः अनेकवर्णोर्ध्वाच्छादनप्रावृताः **चन्द्रदीधितिचारुचामरसंयुतश्रुतयः** श्वेतचामरसंयुतकर्णाः **क्षुण्णकुङ्कुमपिञ्जरेण** चूर्णीकृतकेसरपीतरक्तवर्णेन **करेण** शुण्डया **श्रियम्** शोभाम् **दधति** धारयन्ति । [श्रीरामोऽपि नागकेसरपुष्पपरागभूषितमौलिः सूक्ष्मोर्णावस्त्रसंवृतः श्वेतचामरालङ्कृतः सन् केसरचूर्णपिञ्जरेण करेण विराजते इत्युभयोः साम्यम् गम्यते ।]

हिन्दी अनुवाद—हे प्रभो ! साँवले शरीर वाले आपके हाथी, जिनका मस्तक सिन्दूर से लाल वर्ण का है, जिनके ऊपर अनेक रंगों का (बहुरंगी) ऊपरी आच्छादन वस्त्र (झूल) पड़ा है तथा जिनके कान श्वेतचामरों से जुड़े हैं; केसर के चूर्ण से रंगी हुयी (लाल पीले रंग की) सूँड़ से शोभित हो रहे हैं । [श्रीरामचन्द्र भी नागकेसर पुष्प के पराग को शिर (केशों) में लगाये हुये, सूक्ष्म ऊनीवस्त्र धारण किये हुये तथा श्वेतचामरों से युक्त होकर केसर के चूर्ण-लेप से पीतरक्त वर्ण के कर से विराजित हैं ।] इस प्रकार दोनों की समता ध्वनित होती है ।

टिप्पणी—**नागसम्भवः**—नागः सीसकं तत्र सम्भवः सम्भूतम् सिन्दूरम् नागसीसकयोगेष्टवप्राणीत्यमरः **मौलिः**—किरीटे मौलिरक्लीबे चूडासंयतकेशयोरिति रभसः मौलिः किरीटधम्मिले चूडायामनपुंसकमिति विश्वः **पिञ्जरः**—पिञ्जरः पीतरक्ते स्यात् **नीलरुचः**–नीला नीलवर्णा रुक् कान्ति र्यस्य स तस्येतिभगवतो विशेषणम् अथवा नीला रुक् येषां ते हस्तिनः **कंबलसंयतश्रुतयः**—कंबलो नागराजे स्यात्सास्ना प्रावारयोरपीति धरणिः संयुतमपृथगितिधरणिः श्रुतिर्वेदे च कर्णे च श्रोत्रकर्मणि च श्रुतिरिति धरणिः । **करेण**—इत्थम्भावलक्षणे तृतीया **चर्चरी (विबुधप्रिया)** छन्दः उपमालङ्कारध्वनिः वृत्त्यनुप्रासश्च ।

श्रीरामस्य हस्तिनां विन्ध्यसाम्यं सुमेरुसाम्यञ्च दर्शयति—

पद्माकरे विकशिते शयितास्तवैते

नागाः परागपरिपिञ्जरिताखिलाङ्गाः ।

विन्ध्यं विडम्ब्य तनुभि र्भृशमुन्नताभि-

र्भाभिः सुमेरुमपि वीर विडम्बयन्ति ॥८९॥

माधुरी—हे वीर ! विकशिते उत्फुल्ले पद्माकरे पङ्कजसमूहे **शयिताः** निद्राणाः **परागपरिपिञ्जरिताखिलाङ्गाः** पुष्परेणुभिः परितो रञ्जितगात्राः **तव एते नागाः** हस्तिनः भृशम् उन्नताभिस्तनुभिः अत्युच्चशरीरैः **विन्ध्यम्** विन्ध्याचलं **विडम्ब्य** अनुकृत्य उपहस्य वा, भाभिः दीप्तिभिः **सुमेरुम्** तन्नामकं सुवर्णपर्वतं **विडम्बयन्ति** अनुहरन्ति उपहसन्ति वा ।

हिन्दी अनुवाद—हे वीर ! फूले हुये कमलों के समूह में सोये हुये (लोटे हुये) पराग से पूर्णतया रञ्जितगात्रों वाले तुम्हारे ये हाथी अत्यन्त ऊँचे शरीरों से विन्ध्याचल का अनुकरण करके [अथवा चिढ़ाकर] प्रभाओं से सुमेरु का अनुकरण करते हैं [चिढ़ाते हैं]

टिप्पणी—पद्माकरे—पद्मानाम् आकरे समूहे (ष० तत्०) आकरौ श्रेष्ठनिकरावुत्पत्तिस्थानमाकरः इतिधरणिः । **शयिताः**—निद्राणशयितौ समावित्मरः **विडम्बयन्ति**—विडम्बनम् अनुकरणम् उपहसनं वा कुर्वन्ति । आद्ये **उपमा** द्वितीये **व्यतिरेको**ऽलंकारः **वसन्ततिलका** वृत्तम् ।

श्रीरामस्य वारणानां त्रिभुवनविजयं वर्णयति—

अङ्गैरञ्जनरागमग्नगवलच्छायै स्तवैताः प्रभो
कल्पन्तां त्रिजगज्जयाय न कुतः सूर्पश्रुतिश्रेणयः ।
याः सम्प्रेक्ष्य रणे कृतान्तनगर स्फूर्जन्मसारोपल-
प्रासादाग्रततिभ्रमात्प्रतिभटैरुत्सृज्यते जीवितम् ॥६०॥

माधुरी—हे प्रभो ! तव **अञ्जनरागमग्नगवलच्छायैः** मसिमज्जितमहिषशृङ्गवच्छ्यामैः **अङ्गैः** गात्रैः (उपालक्षिताः) **एताः सूर्पश्रुतिश्रेणयः** हस्तिनां पङ्क्तयः **त्रिजगज्जयाय** त्रिभुवनविजयाय **कुतः न कल्पन्ताम्** कथं न समर्थाः भवन्तु । **रणे याः** श्रेणीः **सम्प्रेक्ष्य** अवलोक्य **प्रतिभटैः** शत्रुभिः **कृतान्तनगरस्फूर्जन्मसारोपलप्रासादाग्रततिभ्रमात्** यमनगरस्य स्फूर्जतां भास्वतां मसारोपलप्रसादाग्राणाम् इन्द्रनीलमणिरञ्जितानाम् सौधशिखराणां द्वारदेशेऽट्टालिकाश्रेणीनाम् **भ्रमात् जीवितम्** उत्सृज्यते भीताः सन्तस्ते म्रियन्ते इति भावः ।

हिन्दी अनुवाद—हे प्रभो ! अंजन के रंग में डूबे हुये भैंसे की सींग के समान काले अङ्गों से युक्त ये सूप के समान कान वाले तुम्हारे हाथियों की कतारें त्रिभुवनविजय करने में क्यों न समर्थ हों । युद्धस्थल में जिन्हें देखकर शत्रु यमराज के नगर के चमकदार इन्द्रनीलमणिनिर्मित राजभवनों के द्वार देश की अट्टालिकाओं की श्रेणियों के भ्रम से प्राण त्याग देते हैं । (यहाँ पंक्ति का अर्थ एक अंटारी के ऊपर दूसरी अंटारी की श्रेणी है ।)

टिप्पणी—गवलम—गवलं माहिषं शृङ्गमित्यमरः 'गवलासितकान्ति' (शिशुपाल० २०।१२) सूर्पश्रुतिश्रेणयः—सूर्पा इव श्रेणयो येषां ते सूर्पश्रुतयो हस्तिनः (बहु०) तेषां श्रेणयः मसारोपलः—मसारः मसं परिमाणम् ऋच्छति मस√ऋ+अण् स चासावुपल इति मसारोपलः इन्द्रनीलमणिः प्रासादाभ्रततिभ्रमात् प्रासादानाम् अभ्रे द्वारदेशे यास्ततयः अट्टालस्योपर्यट्टालश्रेणयस्तासां भ्रमात् एतेन महोच्चता व्यक्ता भवति। शार्दूलविक्रीडितं छन्दः भ्रान्तिमानलङ्कारः।

श्रीरामस्य नागानां कलिन्दनगौपम्यमाह—

गण्डगलन्मदभानुसुताम्भः
सन्निहितश्रुतिचामरहंसैः।
भूमितले बहुतामिव नीता
देव कलिन्दनगास्तव नागैः ॥६१॥

माधुरी—हे देव! गण्डगलन्मदभानुसुताम्भः सन्निहितश्रुतिचामरहंसैः गण्डात् कपोलप्रदेशाद् गलन् मद एव यद् भानुसुतायाः यमुनायाः अम्भः जलम् तस्य सन्निहिताः निकटवर्तिनः श्रुतिचामरा एव हंसाः येषां ते (बहु०) तव नागैः करिभिः भूमितले कलिन्दनगाः कलिन्दनामकाः पर्वताः बहुताम् बहुत्वम् इव यथा नीताः कृता इत्यर्थः। (सर्वे नागाश्चलन्तः कलिन्दपर्वता एवेत्याशयः।)

हिन्दी अनुवाद—हे देव! जिनके कपोलप्रदेश से चूते हुये मदरूपी यमुनाजल के सन्निहित कर्णचामर रूपी हंस हैं ऐसे तुम्हारे हाथियों के द्वारा पृथ्वी में कलिन्द पर्वत मानों बहुत से कर दिये गये हैं। (सभी हाथी चल कलिन्द पर्वत ही हैं यह भाव है।)

टिप्पणी—बहुतामिव नीताः कलिन्दनगाः—प्रसिद्धकलिन्दगिरितः एकैव यमुना प्रभूता अत्र गजानां प्रतिगण्डं यमुनाः निःसृताः इति हेतोर्नागानां बहुत्वेन कलिन्दबहुत्वं द्योतितम्। दोधकवृत्तम् रूपकोत्प्रेक्षयोः साङ्कर्यम्।

भगवतो हस्तिनां नैकसादृश्यं वर्णयति—

शत्रुप्रतापदहनप्रशमाम्बुवाहाः
स्फूर्जद्यशोविसरसिंहविहारशैलाः।
दन्तावलाः प्रविलसन्ति समिज्जयश्री-
विश्रामवेश्मशिखरास्तव भूपमौले ॥६२॥

माधुरी—हे भूपमौले ! भूपतिवर ! तव दन्तावलाः गजाः शत्रुप्रतापदहनप्रशमाम्बुवाहाः शत्रूणां प्रताप एव दहनस्तस्य प्रशमाय शान्तये अम्बुवाहः मेघः स्फूर्जद्यशोविसरसिंहविहारशैलाः स्फूर्जद् स्फुटद् यद्यशस्तस्य विसरः समूहः स एव सिंहस्तस्य विहारार्थम् शैलाः पर्वताः समिज्जयश्रीविश्रामवेश्मशिखराः समित्सु सङ्ग्रामेषु या जयश्रीस्तस्या विश्रामवेश्मनां गृहाणां शिखराः (सन्तः) प्रविलसन्ति प्रकर्षेण शोभन्ते।

हिन्दी अनुवाद—हे राजशिरोमणि ! तुम्हारे हाथी शत्रुओं के प्रतापरूपी अग्नि के शमनार्थ मेघ, गर्जन करते हुये यशःसमूह रूपी सिंह के विहार के लिये पर्वत तथा सङ्ग्रामों में विजयलक्ष्मी के विश्राम गृहों के शिखर (के रूप में) विराजमान हैं।

टिप्पणी —दन्तावलाः—प्रशस्ताः दन्ता एषामिति दन्त + वलच् तकाराकारस्य दीर्घः समित्—समिच्च समरं संख्यं समीकं रण इत्यभिधानरत्नमालायाम् शिखरम्—शिखरं किञ्चदुन्नम्रेऽप्यग्रे पर्वतवृक्षयोरिति धरणिः। वसन्ततिलकावृत्तम् रूपकालङ्कारः।

इतिहस्तिवर्णना समाप्तिमगात्।

अथ श्रीरामस्य पत्तिवर्णना

कविः श्रीरामस्य वीरपदातिभिः पर्वतातिक्रमणं वर्णयति—

हर्यक्षोदारशौर्याः सहरिपुहृदयैः कम्पयन्तः कृपाणान्
बाहुस्तम्भावनद्धं यश इव दधतश्चामरं चन्द्रगौरम्।
क्रामन्त्यद्रीनपिद्रागनवरतरणत्किङ्किणीबद्धमध्या
राजन्नुग्राहवान्तःसततकृतनिजासत्तयः पत्तयस्ते ॥९३॥

माधुरी—हे राजन् ! हर्यक्षोदारशौर्याः सिंहसममहावीराः रिपुहृदयैः शत्रूणां (भयाकुलैः) मनोभिः साकम् कृपाणान् कम्पयन्तः असिचालनं कुर्वन्तः बाहुस्तम्भावनद्धम् भुजस्तम्भसंयुतं यशः इव चन्द्रगौरम् चन्द्रवद्धवलं चामरं दधतः धारयन्तः अनवरतरणत्किङ्किणीबद्धमध्या कटिदेशे निरन्तरशब्दायमानक्षुद्रघण्टिकासहिताः उग्राहवान्तःसततकृतनिजासत्तयः उत्कटसङ्ग्रामेषु सदासन्निहिताः ते पत्तयः पदातिसैनिकाः अद्रीन् पर्वतान् द्राक् शीघ्रम् क्रामन्ति आरोहन्ति उल्लङ्घयन्ति वा।

हिन्दी अनुवाद—हे महाराज ! सिंह के समान महाशूर, शत्रुओं के (भयभीत)

हृदयों के साथ कृपाणों को कँपाते (चमचमाते) हुये, भुजस्तम्भों में लगे हुये यश के समान चन्द्रवत् श्वेत चामरों को लिये हुये, कमर में निरन्तर शब्दायमान किंकिणी से युक्त तथा उत्कृष्ट युद्धों में सदा सन्निहित (लगाव रखे हुये) तुम्हारे पैदल सैनिक पर्वतों का शीघ्र ही उल्लंघन करते हैं ।

टिप्पणी—**हर्यक्षः**—हर्यक्षः केसरी हरिरित्यमरः **चन्द्रगौरम्**—चन्द्रो विधुस्तद्वद् गौरम् श्वेतवर्णम् (कर्म०) चन्द्रं हेम्नि कर्पूरे चन्द्रः सोमे तथौषधे इति धरणिः **उग्राहवान्तः**—उग्रो य आहवस्तस्यान्तः सङ्ग्राममध्ये सङ्ग्रामाभ्यागमाहवा इत्यमरः । स्रग्धरावृत्तम् अनुप्रासः सहोक्तिरतिशयोक्तिरुपमारूपकञ्चैतेषां संसृष्टिः ।

पदातीनां कृपाणान् वर्णयति—

विद्वेषिरोषारुणिताखिलाङ्ग-
त्वत्पत्तिदोष्कैतवतक्षकाणाम् ।
नीलोत्पलश्यामरुचः कृपाणाः
निःश्वासधूमश्रियमुद्वहन्ति ॥६४॥

माधुरी—[हे राम !] **नीलोत्पलश्यामरुचः** इन्दीवरवन्नीलदीप्तयः **कृपाणाः** करवालाः **विद्वेषिरोषारुणिताखिलाङ्गत्वत्पत्तिदोष्कैतवतक्षकाणाम्** विद्वेषिणां शत्रूणामुपरि रोषेणारुणितानि रक्तवर्णान्यखिलान्यङ्गानि येषां ते (बहु०) त्वत्पत्तयः तव पदातिसैनिकास्तेषां दोष्णां कैतवेन ये तक्षकास्तेषाम् **निःश्वासधूमश्रियम्** निःश्वासा एव धूमस्तस्य श्रियम् शोभाम् **उद्वहन्ति** धारयन्ति ।

हिन्दी अनुवाद—[हे रामभद्र !] नीले कमल के समान श्यामल कृपाण, शत्रुओं के ऊपर क्रोध करने से लाल अंगों वाले तुम्हारे पैदल सैनिकों के भुजदण्डों के बहाने से [समागत] तक्षक नागों के निःश्वास रूपी धूम की शोभा को धारण करते हैं ।

टिप्पणी—**नीलोत्पलम्**—इन्दीवरं च नीलेऽस्मिन्नित्यमरः **कृपाणाः**—कौक्षेयको मण्डलाग्रः करवालः कृपाणवदित्यमरः इन्द्रवज्राछन्दः अपह्नुतिरूपकालङ्कारौ ।

श्रीरामस्य पदातीनां गजसदृशाचरणमाह—

दन्तावलन्ति भूपाल बलेन तव पत्तयः ।
दन्ता वलन्ति नैतेषां केवलं करिणामिव ॥६५॥

माधुरी—हे भूपाल ! तव पत्तयः बलेन दन्तावलन्ति गज इवाचरन्ति । एतेषां

केवलं करिणाम् इव दन्ता न वलन्ति जीवन्ति (स्थूला: बलिष्ठाश्चनभवन्तीत्यर्थः) घ्नन्ति वा (शत्रून्) ।

हिन्दी अनुवाद—हे महाराज ! तुम्हारे पैदल सैनिक बल में हाथी की तरह (मारने व दौड़ने आदि में) आचरण करते हैं इनके केवल हाथियों की तरह दाँत नहीं निकले होते हैं अथवा (शत्रुओं को) नहीं मारते हैं ।

टिप्पणी—दन्तावलन्ति—दन्तावलो गजः इव आचरन्ति दन्तावल + क्विप् वार्तिकम् 'सर्वप्रातिपदिकेभ्य: क्विब्वा वक्तव्य:' (४४७) **बलन्ति**—√बल् (प्राणने वधे वा) + लट् (प्र० पु० ब० व०) । **अनुष्टुप्छन्दो यमक व्यतिरेकालङ्कारौ** ।

पदातीनां गजविलोमतां दर्शयति—

वीतमदो बलवानपि नित्यमपङ्करुचिः
केशरिणः क्षपणे निपुणस्तव पत्तिगणः ।
अर्थविदो यदि पृच्छसि नाथ तदाकरिण-
स्तस्य पुरो विपरीततयाऽनुचितादरणाः ॥६६॥

माधुरी—हे नाथ ! स्वामिन् **तव पत्तिगणः** पदातिसैनिकसमूहः **नित्यं** सदा **बलवान् अपि वीतमदः** गर्वरहितः, **अपङ्करुचिः** पापाभिलाषरहितः **केशरिणः** सिंहस्य **क्षपणे** मारणे **निपुणः** दक्षः [गजस्तु बलवान् सन् मदजलरहितः न भवति, तस्य कर्दमे रुचिर्भवति तथा न स सिंहस्य मारणे समर्थो भवति] (अतः) **यदि त्वम् अर्थविदः** पृच्छसि तदा **करिणः** गजाः **तस्य** पत्तिगणस्य **पुरः** अग्रे **विपरीततया** प्रतिलोमतया **अनुचितादरणाः** आदरं प्राप्तुं न योग्याः (सन्तीतिशेषः) ।

हिन्दी अनुवाद—हे स्वामिन् ! तुम्हारे पदाति सैनिकों का समूह सदा बलशाली होते हुए भी गर्व रहित, पाप की इच्छा से रहित तथा सिंह के मारने में दक्ष है । [हाथी बलवान् होते हुये मदजल से रहित नहीं रहता, (बलवान् हाथी के ही मद बहता है निर्बल के नहीं ।), उसकी इच्छा कीचड़ में लोटने की होती है तथा वह सिंह को मारने में समर्थ नहीं होता है ।] (अतः) यदि [आप] विद्वज्जन (शब्दार्थवेत्ता पुरुष वर्ग) से पूछते हैं तो हाथी उस (पदाति समूह) के आगे प्रतिलोम होने के कारण आदर पाने योग्य नहीं हैं ।

टिप्पणी—वीतमदः—वीतो मदो गर्वो मदजलं वा यस्मात् सः (बहु०) **अपङ्करुचिः**—पङ्के पापे रुचिर्यस्य सः पङ्करुचिः न पङ्करुचिरिति अपङ्करुचिः **गजस्तु** पङ्के कर्दमे रुचिर्यस्य स एवम्भूतोऽस्ति पङ्कः कर्दमपापयोरिति धरणिः । **विपरीततया**—विरुद्धार्थकत्वेन प्रतिलोमतया **अनुचितादरणाः**—न उचितम् आदरणं सम्मानो येषान्ते (बहु०) **अश्वगतिश्छन्दः अनुप्रासो विशेषोक्ति व्यतिरेकश्चालङ्काराः** ।

पदातीनां शत्रुभयकरं धावनमाह—

शूलशरासनतोमरशक्तिकृपाणकरे
पत्तिगणे तव धावति वीर पुरः समरे ।
तुङ्गतुरङ्गशताङ्गमतङ्गजराजघटां
वैरिभटाः परिहृत्य विशन्ति झटित्यटवीम् ॥६७॥

माधुरी—हे वीर ! तव शूलशरासनतोमरशक्तिकृपाणकरे शूलम् शरासनं धनुः तोमरम् शक्तिः कृपाणश्चैते आयुधविशेषाः करे यस्य स तस्मिन् (बहु०) **पत्तिगणे** पदातिसैनिकवृन्दे पुरः अग्रे **समरे** युद्धे **धावति** (सति) **वैरिभटाः** शत्रुयोधाः **तुंगतुरंगशतांगमतंगजराजघटाम्** तुंगाः तुरंगाः अश्वाः शतांगाः रथाः मतंगजाश्च तेषां घटा दलं तत् **परिहृत्य** परित्यज्य **झटिति** अतिशीघ्रम् **अटवीं** वनम् **विशन्ति** ।

हिन्दी अनुवाद—हे वीर ! त्रिशूल धनुष् तोमर शक्ति तथा कृपाण (आयुधों) को हाथ में लिये हुये आपके सैनिकों के, समर में आगे बढ़ने पर; शत्रुवीर ऊँचे घोड़े रथ तथा गजराज के दल को छोड़कर अतिशीघ्र जंगल में घुस जाते हैं ।

टिप्पणी—**तोमरम्**—शर्वला तोमरोऽस्त्रियामित्यमरः **शक्तिः**—शक्तिरायुधभेदे स्यादित्यमरः **शताङ्गः**—शतांगः स्यन्दनो रथ इत्यमरः **मतङ्गजः**—मतंगजो गजो नागः इत्यमरः (मतंगः मेघः इव जायते) **घटा**—घटा स्याद्घटनावृन्दे हस्तिश्रेण्यां च कीर्तितेति धरणिः । अश्वगतिश्छन्दः वृत्यनुप्रासालङ्कारः ।

गजराजसादृश्येन पदातीनां कार्याणि वर्णयति—

कृन्तति केलिवनं सुदृशः स्ववशाः कुरुते
वप्रविदारणमाचरति द्विरदाधिपवत् ।
लुण्टति रत्नशतं ज्वलयत्यनिलेन गृहान्
नित्यमरातिपुरे तव पत्तिगणः ॥६८॥

माधुरी—[हे रामभद्र !] अरातिपुरे शत्रुनगरे **तव** कुपितः क्रुद्धः **पत्तिगणः** पदातिसैनिकसमूहः **द्विरदाधिपवत्** गजराजसमः **केलिवनम्** प्रमोदवनम् **कृन्तति** छिनत्ति **सुदृशः** (शत्रुणाम्) सुन्दरीः **स्ववशाः** स्ववशवर्तिनीः **कुरुते** । **वप्रविदारणम्** प्राकाराणाम् विघटनम् **आचरति** करोति **रत्नशतम्** **लुण्टति** अपहरति **नित्यम्** **अनिलेन** अग्निना (तृणपूलकं संयोज्य) **गृहान्** **ज्वलयति** [गजोऽपि प्रमोदवनम् विच्छिन्नं करोति, **स्ववशाः**

करिणीः सुदृशः कामपूर्णनेत्राः विदधाति परिखाः विघटयति, शुण्डायाम् अग्निं संस्थाप्य गृहेषु निक्षिपति]।

हिन्दी अनुवाद—[हे रामचन्द्र] शत्रुओं के नगर में तुम्हारे क्रुद्ध पदाति सैनिकगण गजराज के समान क्रीडावन को छिन्न-भिन्न करते हैं, शत्रु-सुन्दरियों को अपने अधीन बनाते हैं, मिट्टी की खाँईं (शहरपनाह) को खोद डालते हैं। सैकड़ों रत्नों को लूट लेते हैं तथा सदा अग्नि से (घास के पूरे में रखकर) घरों को जला देते हैं ? [गजराज भी वाटिकाओं को तोड़ देते हैं, हथिनियों को (देखकर) कामयुक्त नेत्र वाली बना देते हैं, खाईं तोड़ डालते हैं, रत्नों को लूटते हैं तथा (सूँड़ में रखकर) अग्नि से घर जला देते हैं।]

टिप्पणी—स्ववशाः—स्ववशेस्थिताः स्वहस्तिनीर्वा करिणी धेनुका वशेत्यमरः वप्रविदारणम्—वप्रस्य मृत्प्राकारस्य विदारणम् (ष० तत्०) स्याच्चयो वप्रमस्त्रिया-मित्यमरः। अश्वगतिश्छन्दः उपमालङ्कारः।

श्रीरामस्य पदातीनामजेयतां वर्णयति—

मुखाम्भोजभृङ्गायितव्याघ्रलोमा
भुजद्राघिमव्रीडितव्यालराजः।
दृषद्बद्धकक्षोरुवक्षःकपाटः
पदातिप्रवीरस्तवैकोऽप्यजेयः ॥६६॥

माधुरी—[हे राम !] तव **मुखाम्भोजभृङ्गायितव्याललोमा** मुखकमलभृङ्ग-भावोपगतव्याघ्रलोमवल्लोम (श्मश्रु) युक्तः **भुजद्राघिमव्रीडितव्यालराजः** भुजयो-र्दीर्घतया सर्पराजस्यापिलज्जाकरः **दृषद्बद्धकक्षोरुवक्षःकपाटः** पाषाणेन स्पर्धाशीलश्रेष्ठ-वक्षःस्थलकपाटः **एकः अपि पदातिप्रवीरः** वीरपदातिसैनिकः **अजेयः** जेतुम् अशक्यः (अस्तीतिशेषः)।

हिन्दी अनुवाद—[हे राम !] तुम्हारा, मुख कमल का भौंरा बने हुये बाघ के (मूँछ की) तरह मूँछ वाला (गलमुच्छ रखे हुये), भुजाओं की लम्बाई से वासुकि नाग को भी लज्जित किये हुये, पत्थर से स्पर्धा करने वाले विस्तृत वक्षः-स्थल रूपी कपाट वाला अकेला भी वीर पैदल सैनिक (युद्ध में) जीता नहीं जा सकता है।

टिप्पणी—मुखाम्भोजभृङ्गायितव्याघ्रलोमा—मुखम् अम्भोजमिवेति मुखाम्भो-जम् (कर्म०) तस्मिन् भृङ्गायितम् भृङ्गस्यभावमुपगतम् व्याघ्रस्य लोमेव व्याघ्रश्मश्रुवत् श्मश्रुयस्यसः (बहु०) भुजद्राघिमव्रीडितव्यालराजः—भुजयोर्द्राघिमा (दीर्घ+इमनिच्)

तेन व्रीडितो व्यालानां राजा वासुकिर्येन सः (बहु०) दृषद्बद्धकक्षोरुवक्षःकपाटः—दृषदा बद्धा कक्षा येन तत्तादृशम् उरुवक्षः एव कपाटं यस्य सः (बहु०) भुजङ्गप्रयातं छन्दः उपमारूपकव्यतिरेकाणां संकरः।

इतिपदातिवर्णना समाप्तिमगात्।

अथ श्रीरामस्य प्रयाणवर्णना

श्रीरामस्य प्रयाणे मरालानां मेघसन्देहं वर्णयति—

उच्चैरुल्लास्य कोणं धरणिधव मुहुस्ताडितेवादयित्रा
यात्रारम्भेषु घोषैर्मुखरयति भवद्दुन्दुभौ दिङ्मुखानि।
धूलीधारान्धकारे नभसि जलधरध्वानमाशङ्कमानाः
सद्यो मुञ्चन्ति पद्माकरमधिगगनं बद्धजाला मरालाः॥१००॥

माधुरी—हे **धरणिधव** ! भूपते ! **यात्रारम्भेषु** विजययात्रायाः प्रारम्भकाले **वादयित्रा** वादकेन **कोणम्** लगुडम् **उच्चैः उल्लास्य** ऊर्ध्वीकृत्य **मुहुः** वारं वारं ताडिते आहते **भवद्दुन्दुभौ** भवदीये दुन्दुभिनामके वाद्यविशेषे **घोषैः** अव्यक्तस्वनैः **दिङ्मुखानि मुखरयति** शब्दायमानं कुर्वति (सति) **धूलीधारान्धकारे** रजःसमूहाच्छादिते **नभसि** गगने **जलधरध्वानम्** मेघरसितम् **आशङ्कमानाः अधिगगनं** गगने **बद्धजालाः** समवेताः **मरालाः** हंसाः **सद्यः** शीघ्रमेव **पद्माकरम्** सरोवरम् **मुञ्चन्ति** त्यजन्ति।

हिन्दी अनुवाद—हे भूपते ! विजययात्रा के प्रारम्भ में वादक के द्वारा [बजाने के] डंडे को ऊपर उठाकर बार बार बजाये गये आपके नगाड़े की अव्यक्त ध्वनियों से दिशाओं के मुखरित किये जाने पर, धूलि के समूह से आच्छादित आकाश में मेघ के गर्जन की आशङ्का करते हुये; आकाश में समूहबद्ध हंस (वर्षा के भय से) तुरन्त तालाब को त्याग देते हैं।

टिप्पणी—कोणम्—कोणो वाद्यप्रभेदे स्याद्वीणादीनां च वादने। एकदेशे गृहादीनामस्त्रे च लगुडेऽपि चेति मेदिनी। **वादयित्रा—**वादयतीति वादयिता (√वद्+णिच्+तृच्) तेन **मुखरयति—**मुखरं कुर्वन्निति मुखरयन् तस्मिन् **दुन्दुभौ—**दुन्दु इत्यव्यक्तशब्देन भाति (दुन्दु√भा+कि) इति दुन्दुभिस्तस्मिन् **बद्धजालाः** बद्धं जालं यैस्ते (बहु०) जालं गवाक्ष आनाये क्षने वृन्दे च कोरके इति धरणिः। स्रग्धराच्छन्दः अनुप्रासः सन्देहश्चालङ्कारौ।

प्रयाणपटहध्वनिमाकर्ण्य देवासुराणामब्धिमथनशङ्कां वर्णयति—

आकर्ण्य त्वत्प्रयाणे नृपतिवर ! बृहद्दुन्दुभिध्वानमारा-
दन्तर्भ्राम्यन्तमब्धेः पुनरवनिधराधीशमाशङ्कमानाः ।
धिग्युष्मानारभध्वे वत किमिह विनाऽस्माभिराभाष्य दूतै-
रित्यन्योन्यं निलिम्पत्रिदशरिपुगणाः संगरायोत्सहन्ते ।।१०१।

माधुरी—हे नृपतिवर ! त्वत्प्रयाणे तव युद्धयात्रायाम् आरात् दूरे बृहद्दुन्दुभिध्वानम् महादुन्दुभीनां ध्वनिम् आकर्ण्य श्रुत्वा पुनः अब्धेः समुद्रस्य अन्तः अवनिधराधीशम् मन्दराचलम् आशङ्कमानाः सन्देहं कुर्वाणाः निलिम्पत्रिदशरिपुगणाः देवासुराः दूतैः सन्देशहरैः वत खेदोऽस्ति, अस्माभिर्विना [यूयम्] किम् आरभध्वे आरम्भं कुरुथ युष्मान् धिक् इति एवम् अन्योन्यम् दूतैः आभाष्य कथयित्वा सङ्गराय सङ्ग्रामाय उत्सहन्ते प्रयतन्ते ।

हिन्दी अनुवाद—हे भूपतिवर्य ! तुम्हारी युद्धयात्रा में दूर से बड़े-बड़े नगाड़ों की ध्वनि को सुनकर, फिर से समुद्र के अन्दर मन्दराचल की आशंका करते हुये देवों व असुरों के समूह, दूतों के द्वारा 'खेद है कि हमारे बिना तुम लोगों ने क्यों [समुद्र-मन्थन] प्रारम्भ कर दिया है ।' इस बात को एक दूसरे से कहलाकर सङ्ग्राम के लिये प्रयत्न करने लगते हैं ।

टिप्पणी—अवनिधराधीशम्—अवनिधराः पर्वतास्तेषाम् अधीशस्तम् वत—खेदानुकम्पासन्तोषविस्मयामन्त्रणे वत इत्ययरः धिग्युष्मान्—धिग्योगे द्वितीया किम्—किं शब्द इष्यते क्षेपे प्रश्ने कुत्सावितर्कयोरिति धरणिः । स्रग्धराच्छन्दः अनुप्रासः सन्देहश्चालंकारौ ।

श्रीरामस्य प्रयाणे रजोभिराकाशगङ्गायाः शोषणं सूर्यस्य चादृश्यत्वं वर्णयति—

त्वत्प्रयाणे रजोभिर्बलोल्लासितै-
र्व्योमगङ्गा नरेश ध्रुवं शोषिता ।
तद्वियोगार्तिमात्यन्तिकीमुद्वहं-
स्तत्क्षणादेव हंसोऽपि यातः क्वचित् ।।१०२।।

माधुरी— हे नरेश ! ध्रुवम् निश्चयेन त्वत्प्रयाणे तव युद्धयात्रायां बलोल्लासितैः सैनिकोत्थापितैः रजोभिः व्योमगंगा आकाशगंगा शोषिता शुष्का कृता ।

आत्यन्तिकीम् अत्यधिकाम् **तद्वियोगार्तिम्** तस्याः वियोगजनितां पीडाम् **उद्वहन्** धारयन्द **हंसोऽपि** सूर्योऽपि **क्वचित्** कुत्रचित् प्रदेशे **यातः** गत इत्यर्थः।

हिन्दी अनुवाद—हे महाराज ! तुम्हारे प्रयाण में सैनिकों के द्वारा उठाई गई धूल से निश्चय ही आकाशगंगा सुखा दी गई है। उसके वियोग की अत्यधिक पीड़ा को धारण करते हुये [उसका] हंस [सूर्य] भी कहीं चला गया है।

टिप्पणी—**तद्वियोगार्तिम्**—तस्याः वियोगस्तज्जनिताम् आर्तिम् (उत्तर पदलोपी तत्०) **हंसः**—सूर्यः भानुर्हंसः सहस्रांशुरित्यमरः। **स्रग्विणीवृत्तम् उत्प्रेक्षाऽलङ्कारः।**

पुना रजोभी रविपिधानं वर्णयति—

पिधीयते वरूथिनीसमुत्थितेन रेणुना
रणक्षितिक्षताहितप्रवीरभिन्नमण्डलः।
विधीयते रविस्त्वया निजौजसाऽवजीयते
तथापि राघवाद्भुतं गुरावनुद्धतो भवान् ॥१०३॥

माधुरी—हे राघव ! [तव] **वरूथिनीसमुत्थितेन** सेनयोत्थापितेन **रेणुना रविः पिधीयते** आच्छाद्यते, **रणक्षितिक्षताहितप्रवीरभिन्नमण्डलः** रणक्षितौ युद्धभूमौ क्षताः मृताः ये अहिताः शत्रवः प्रवीरास्तैः भिन्नं मण्डलं यस्य सः (बहु०) **विधीयते** क्रियते, त्वया [च] **निजौजसा अवजीयते** पराजितः क्रियते तथापि भवान् **गुरौ** स्वपूर्वजे सूर्ये **अनुद्धतः** सौम्यः [इति] **अद्भुतम्**। (अतिहीनमपि सूर्यं त्वं गुरुं मत्वा संमानयसीत्याश्चर्यम्।)

हिन्दी अनुवाद—हे राघव ! [आपकी] सेना के द्वारा उठाई गई धूलि से सूर्य ढक दिया जाता है, युद्धभूमि में मरे हुये शत्रुवीरों के द्वारा उसका मण्डल भेद दिया जाता है, [तथा] तुम्हारे द्वारा स्वप्रताप से वह पराजित किया जाता है तो भी आप अपने पूर्वज सूर्य के प्रति विनम्र हैं यह आश्चर्य है। (अतिलघु सूर्य को आप गुरु मानकर सम्मानित करते हो, यह आश्चर्य है।)

टिप्पणी—**वरूथिनी**—वरूथिनी बलं सैन्यमित्यमरः। **निजौजसा** निज + ओजसा (वृद्धि सन्धि) **अनुद्धताः**—नम्रो विनीतश्च 'अनुद्धताः सत्पुरुषाः समृद्धिभिः' (नीतिशतकम्) **पञ्चचामरच्छन्दः अनुप्रासो विशेषोक्तिश्चालङ्कारौ।**

सेनया परागपटलेन सूर्यस्याच्छादनं वर्णयति—

ख्याता रामक्ष्मापतेः साहचर्यात्
सेनैकाहं काऽत्र सेना द्वितीया ।
ईर्ष्यन्त्येति त्वद्ध्वजिन्या रजोभिः
कौशल्येयच्छाद्यते द्यौः सभानुः ॥१०४॥

माधुरी—हे कौशल्येय ! कौशल्यानन्दन ! अहं **रामक्ष्मापतेः** भूपतेः रामस्य **साहचर्यात्** सहस्थित्या **एका** एकाकिनी **सेना** स्वामिसहिता **ख्याता** प्रसिद्धा । **अत्र** अस्मिन् जगति **द्वितीया सेना** सूर्येणसह वर्तमाना [ममाग्रे] **का** इति अनेन हेतुना **ईर्ष्यन्त्या** जातेर्ष्यया **त्वद्ध्वजिन्या** तव सेनया **रजोभिः** परागैः **सभानुः** सूर्यसहिता **द्यौः** आकाशः **छाद्यते** छन्ना क्रियते ।

हिन्दी अनुवाद—हे कौशल्यानन्दन ! 'मैं पृथ्वी के पति राम के साथ रहने के कारण एकमात्र सेना (इन-स्वामी के साथ रहने वाली) प्रसिद्ध हूँ । इस विश्व में दूसरी सेना (इन-सूर्य के साथ रहने वाली द्यौः) मेरे सामने कौन सी है ।' इस कारण ईर्ष्या करती हुई तुम्हारी सेना के द्वारा धूलि से सूर्य के सहित आकाश को आच्छादित कर दिया जाता है ।

टिप्पणी—सेना—इनेन स्वामिना सूर्येण वा सह वर्तते इति (बहु०) सहस्य स आदेशः) इनः सूर्ये प्रभौ राज्ञीति धरणिः । ख्याता—प्रसिद्धा प्रतीते प्रथितख्यातवित्तविज्ञातविश्रुता इत्यमरः ध्वजिन्या—ध्वजिनी वाहिनी सेनेत्यमरः । **शालिनीवृत्तम् हेतूत्प्रेक्षाकाव्यलिङ्गञ्चालंकारौ ।**

श्री रामस्य विजययात्रायां सेनायाः भारेणावनताया अपि पृथिव्याः प्रसन्नतां व्यनक्ति—

तादृग्वाजिखुराहतैरपि दिशो जेतुं त्वयि प्रस्थिते
कौशल्यातनय प्रयाति विलयं नेयं धरित्री यतः ।
दृप्यद्दस्युसहस्रभारविपदं हन्तुं ममाभ्युद्यतः
स्वामीति प्रमदेन पीवरतमं तत्तन्यते तद्वपुः ॥१०५॥

माधुरी—हे **कौशल्यातनय** ! **त्वयि दिशोजेतुम्** दिग्विजयं कर्तुम् **प्रस्थिते यतः** येन हेतुना **तादृग्वाजिखुराहतैः** गुरुभिरश्वखुरताडनैः **अपि इयं धरित्री** पृथ्वी **विलयं** नाशं **न प्रयाति** अक्रान्ता न भवति । 'मम **स्वामी दृप्यद्दस्युसहस्रभारविपदम्** गर्वितरिपु-

सहस्रभाररूपिणीं विपत्तिम् हन्तुम् नाशयितुम् अभ्युद्यतः प्रस्थितः (अस्ति) इति प्रमदेन हर्षेण तद्वपुः तस्याः शरीरं पीवरतमं तन्यते उत्तरोत्तरं पीवरं विशालं च भवतीत्यर्थः।

हिन्दी अनुवाद—हे कौशल्यानन्दन ! दिग्विजयार्थ तुम्हारे प्रस्थित होने पर जिस कारण ऐसे घोड़ों के खुरों के आघातों (टापों) से भी यह पृथ्वी विनाश को नहीं प्राप्त होती (क्योंकि) 'मेरे स्वामी गर्वित हजारों शत्रुओं के भार रूपी विपत्ति के विनाशार्थ प्रयत्नपरायण हैं।' इस हर्ष के द्वारा उसका शरीर अधिक मोटा होकर विस्तृत हो रहा है।

टिप्पणी—तादृग्—अनिर्वचनीयः खुरस्य विशेषणमेतत् दृप्यद्दस्युसहस्रभार-विपदम्—दृप्यन्तो ये दस्यवः तेषाम् सहस्रम् तस्य भारस्तेन या विपत् ताम् दस्युश्चौरे रिपौ पुंसीति हेमचन्द्रः। शार्दूलविक्रीडितं छन्दः काव्यलिङ्गमलङ्कारः।

श्रीरामस्य प्रस्थितया सेनया रवेराच्छादनं वर्णयति—

घनबलरेणुना पिहितमाह जनस्तरणिम्
समरमहोत्सवाय चलति त्वयि दाशरथे।
क्वचिदपयातमेव तमवेहि भवन्निहत-
प्रतिनृपतिप्रणीतनिजमण्डलभेदभयात् ॥१०६॥

माधुरी—हे दाशरथे ! दशरथसुत ! त्वयि समरमहोत्सवाय विजययात्रायै चलति गच्छति जनः लोकः तरणिम् सूर्यम् घनबलरेणुना सेनायाः घनैः रजःकणैः पिहितम् आच्छादितम् आह कथयति। भवन्निहतप्रतिनृपतिप्रणीतनिजमण्डलभेदभयात् भवता निहताः मारिताः ये प्रतिनृपतयः शत्रवः तैः प्रणीतः कृतो यो निजमण्डलस्य भेदस्तस्माद्भयं तस्मात् तम् सूर्यम् क्वचित् कुत्रचित्प्रदेशे अपयातम् गतम् एव अवेहि जानीहि।

हिन्दी अनुवाद—हे दशरथनन्दन ! विजयमहोत्सव (युद्ध यात्रा) के लिये आपके चलने पर मनुष्य सूर्य को सेना की घनी धूलि से ढका हुआ बताते हैं। आपके द्वारा मारे गये शत्रुओं से किये गये अपने मण्डल के भेद के भय से उस (सूर्य) को किसी स्थान में गया हुआ ही समझो।

टिप्पणी—तरणिम् तिग्मांशुस्तरणिस्तथा दिनमणिर्भास्वान्विवस्वान्हरिरित्य-भिधानरत्नमालायाम्। प्रतिनृपतिप्रणीतनिजमण्डलभेदभयात्—प्रतिरत्र विरुद्धार्थकः प्रति-नृपतिः विरुद्धो राजा तैः प्रणीतः प्रणीतम् उपसम्पन्ने कृते क्षिप्ते प्रवेशिते इतिरभसः। युद्धेहताः शूराः सूर्यमण्डलं भित्वा सूर्यलोकं यान्ति इति सूर्यस्य स्वमण्डलभेदभयं स्पष्ट-मेव। कोकिलकं छन्दो हेतूत्प्रेक्षाऽलङ्कारः।

श्रीरामस्य प्रयाणे सर्वतोऽन्धकारप्रसारमाह –

क्ष्मापाल त्वत्प्रयाणे निजखुरमुसलैर्दारयद्भिर्धरित्री-
मश्वीयैः पांशुधारापिहितरविरुचि व्योम्नि तेनेऽन्धकारः ।
पाताले शैलतुल्यस्वतनुभरनमद्भूधृतिश्रान्तशेष-
प्रेंखन्निःश्वासधूमस्थगितफणिमणिद्योतया दन्तिपंक्त्या ।।१०७।।

माधुरी—हे क्ष्मापाल ! भूपते ! त्वत्प्रयाणे तव युद्धयात्रायां **निजखुरमुसलैः** निजाः खुरा एव मुसलास्तैः **धरित्रीम्** पृथ्वीम् **दारयद्भिः** विदारणं कुर्वद्भिः **अश्वीयैः** अश्वसमूहैः **पांशुधारापिहितरविरुचि व्योम्नि** पांशूनां धूलीनां धाराभिः पिहिता रवेः रुक् कान्तिर्यस्मिन्नेवम्भूते व्योम्निआकाशे **शैलतुल्यस्वतनुभरनमद्भूधृतिश्रान्तशेषप्रेङ्खन्निःश्वासधूमस्थगितफणिमणिद्योतया** पर्वतसमनिजशरीरभारेण नमन्ती नीचैर्गच्छन्ती या भूः तस्यां धृत्या श्रान्तस्य शेषस्य प्रेङ्खन् इतस्ततो बहलीभवन् यो निःश्वासधूमस्तेन स्थगितः आच्छादितः फणिमणीनां द्योतः कान्तिर्यया सा तया (बहु०) **दन्तिपंक्त्या** हस्तिसमूहेन पाताले **अन्धकारः तेने** प्रसारितः ।

हिन्दी अनुवाद—हे भूपाल ! आपके प्रयाण में, अपने खुररूपी मूसलों से पृथ्वी को विदीर्ण करते हुये अश्वसमूहों के द्वारा धूलि की धारा से आच्छादित कर दी गई है सूर्य की कान्ति जिसमें ऐसे आकाश में तथा पर्वत के समान अपने शरीर के भार से नीचे जाती हुई पृथ्वी के भार से परिश्रान्त शेषनाग की प्रबल साँसों के चारों ओर मँडराते हुये धुयें से सर्पों की मणियों की कान्ति को आच्छादित करने वाले गज समूह से पाताल में अन्धकार का प्रसार कर दिया गया । (घोड़ों ने इतनी धूलि उड़ाई कि सूर्य ढक गया तथा हाथियों ने अपने पर्वततुल्य शरीरों का इतना भार पृथ्वी पर डाला कि शेषनाग की साँसों से धूम निकलकर सब ओर फैल गया जिससे सर्पों की मणियाँ ढक गईं अतः आकाश पाताल सर्वत्र अन्धकार हो गया, यह भाव है ।)

टिप्पणी—**अश्वीयैः**—अश्वानां समूहः इति अश्वीयम् (अश्व + छ तस्य ईयादेशः) तैः **पिहितम्**—अपि √ धा + क्त अकारलोपः । स्रग्धरावृत्तम् रूपकोपमालङ्कारौ ।

श्रीरामस्य सेनायाः रेणौ अन्धकारादीनां सन्देहं करोति कविः—

नैतन्नैशमुदीर्णमन्धतमसं तारास्तदुद्भासये-
ज्जातु स्यादपि धूमधोरणिरियं साऽपि क्व बर्हिं विना ।
नीहारो यदि सान्द्र एष न कुतो मुञ्चत्यपां विप्रुषः
सेनारेणुरलं समुल्लसति तल्लङ्काधिपध्वंसिनः ।।१०८।।

माधुरी—एतत् **उदीर्णम्**-उद्गच्छत् **नैशम्** निशायाः **अन्धतमसम्** गाढान्धकारः न, तत् **तमः तारा**: **उद्भासयेत्** प्रकटीकुर्यात् । **जातु** कदाचित् **इयं धूमधोरणिः** धूमपंक्तिः **स्यात्** साऽपि **वह्निं विना क्व** (नैव भवतीत्यर्थः) । **यदि एषः सान्द्रो नीहारः** [अस्ति] तदा **अपां विप्रुषः** जलकणान् **कुतो न मुञ्चति** (तस्मान्नीहारोऽपि न) । **तत् लङ्काधिपध्वंसिनः** रावणोच्छेदकस्य **सेनारेणुः अलम्** पर्याप्तं **समुल्लसति** सुशोभते ।

हिन्दी अनुवाद—श्रीराम की सेना की धूलि देखकर कवि संशय कर रहा है-यह फैला हुआ निशा का गाढ़ अन्धकार नहीं है [क्योंकि] वह तारों को प्रकट करता। कदाचित् यह धूमलेखा हो सकती है [परन्तु] वह भी अग्नि के विना कहाँ ? यदि यह घना कुहरा है तो जलकणों को क्यों नहीं छोड़ता है ? अतः रावण के विनाशक [भगवान् राम] की सेना की धूलि ही सम्यक् रूप से सुशोभित हो रही है।

टिप्पणी—**नैशम्**—निशाया इदम् इति निशा+अण् **धूमधोरणिः**—धूमस्य धोरणिः परम्परा (ष० तत्०) **अंधतमसम्**—गाढान्धकारः ध्वान्ते गाढेऽन्धतमसम् इत्यमरः शार्दूलविक्रीडितं छन्दः निश्चयान्तः सन्देहालंकारः ।

श्रीरामस्य सेनाया द्रुमाणां शत्रुनृपतीनाञ्च सहनिपातनमाह—

समुन्नतिजिताचलाः सुचिरमाजिमेत्य स्थिराः
शिलीमुखशताश्रयाः स्फुरदनल्पसारोदयाः ।
द्रुमाः पथि निपातिताः प्रचुरपात्रलक्ष्मीभृतः
समं रिपुनराधिपैश्चलितया ध्वजिन्या तव ॥१०९॥

माधुरी—[हे राम ! रणाभिमुखम्] **चलितया** प्रस्थितया **तव ध्वजिन्या** सेनया **पथि** मार्गे **रिपुनराधिपैः** शत्रुनृपैः **समम्** सह **समुन्नतिजिताचलाः** समुन्नत्या उच्चतया जिताः अचलाः पर्वताः यैस्ते (बहु०) **सुचिरम् आजिम्** भूमिम् **एत्य** प्राप्य **स्थिराः** स्थावरतया गन्तुमशक्ताः **शिलीमुखशताश्रयाः** बहुभ्रमरयुक्ताः **स्फुरदनल्पसारोदयाः** स्पष्टबहुस्थैर्यवन्तः **प्रचुरपत्रलक्ष्मीभृतः** बहुपत्रशोभाशालिनः **द्रुमाः** वृक्षाः **निपातिताः** निर्मूलीकृताः । विभक्तिविपरिणामेन शत्रुनृपाः अपि समुन्नतया गौरवेण **जिताचलाः** युद्धभूमि प्राप्य बहुकालं स्थिराः **शिलीमुखशतानाम्** प्रचुरबाणानाम् आश्रयाः सुस्पष्टं सैनिकोत्कर्षवन्तः सन्तीति तेषां वधेन सह वृक्षाणां निपातनं युक्तमेव ।

हिन्दी अनुवाद—[हे राम ! युद्ध भूमि की ओर] प्रस्थित आपकी सेना के द्वारा मार्ग में शत्रुराजाओं के साथ, ऊँचाई में पर्वत को पराजित करने वाले, चिरकालपर्यन्त पृथ्वी में स्थिर खड़े हुये, सैकड़ों भ्रमरों से युक्त, स्पष्ट स्थिरतासमन्वित तथा प्रचुर पत्तों की शोभा को धारण करते हुये वृक्ष निर्मूल कर दिये गये ।

वृक्ष के विशेषणों को तृतीयाबहुवचनान्त करने पर शत्रुनृप भी समुन्नति (गौरव) के द्वारा पर्वत के विजेता, युद्ध भूमि में पहुँचकर बहुकाल पर्यन्त स्थिर रहने वाले शिलीमुख (बाण) समूह से युक्त तथा सैनिकों के उत्कर्ष से समन्वित हैं अतः उनके वध के साथ वृक्षों का निर्मूल करना उचित है।

टिप्पणी—समुन्नतिः-उन्नतिरुदये वृद्धाविति धरणिः आजिः—आजिः समोऽवनौ युद्धे इति धरणिः। **शिलीमुखाः**—अलिबाणौ शिलीमुखावित्यमरः **सारः**—सारो बले स्थिरांशे च न्याय्ये क्लीबे वरे त्रिष्वित्यमरः **पत्त्रम्**—पत्त्रं वाहनपक्षयोरित्यमरः। पृथ्वीछन्दः सहोक्तिरलङ्कारः।

वृक्षाणां भूमौ पतनं सहेतुकमुत्प्रेक्षते कविः—

हन्तानन्तचमूभरेण गुरुणा सीतापतौ प्रस्थिते,
यस्याः प्रादुरभूम सा वसुमती पातालमेति द्रुतम्।
इत्युद्यत्करुणाः कुलायविरुवद्भूयो विहंगच्छलात्
क्रन्दन्तस्तरवो निपत्य पृथिवीं शिलष्यन्ति शाखाभुजैः॥११०॥

माधुरी—सीतापतौ श्रीरामचन्द्रे (रणाय) प्रस्थिते हन्त खेदोऽस्ति (यत्) गुरुणा महता अनन्तचमूभरेण असंख्यसेनाभारेण 'यस्याः वयं प्रादुरभूम जायामहे सा वसुमती पृथ्वी द्रुतम् अतिशीघ्रम् पातालम् एति गच्छति' इति हेतोः उद्यत्करुणाः जातदयाः कुलायविरुवद्भूयोविहंगच्छलात् कुलायेषु नीडेषु विरुवतां शब्दं कुर्वतां भूयसां बहूनां विहंगानाम् खगानां छलात् व्याजात् क्रन्दन्तः रोदनं कुर्वन्तः तरवः वृक्षाः निपत्य शाखाभुजैः स्वशाखारूपिभिः भुजैः पृथिवीं शिलष्यन्ति आलिङ्गन्ति। (जननीं प्रति भक्तिर्व्यज्यते।)

हिन्दी अनुवाद—भगवान् श्रीराम के (युद्धार्थ) प्रयाण करने पर खेद है कि महान् असंख्य सेना के भार से 'जिससे हम पैदा हुये हैं वह पृथ्वी अति शीघ्र पाताल को जा रही है' इस कारण जिनके दया उत्पन्न हो गई है ऐसे, नीडों में शब्द करते हुये बहुसंख्यक पक्षियों के व्याज से रोते हुये वृक्ष गिरकर (अपनी) शाखा रूपी भुजाओं से पृथ्वी का आलिङ्गन करते हैं। (माता के प्रति भक्ति व्यक्त होती है।)

टिप्पणी—हन्त—अव्ययपद खेदे **यस्याः**—जायामानस्य प्रकृतौ पञ्चमी **कुलायः**-कुलायो नीडमस्त्रियामित्यमरः **क्रन्दन्तः**—क्रन्दने रोदनाह्वाने इति धरणिः। शार्दूलविक्रीडितं छन्दः हेतूत्प्रेक्षाऽपह्नुत्योः साङ्कर्यम्, भक्तिरूपभावध्वनिः।

इतिप्रयाणवर्णना समाप्तिमगात्।

अथ श्रीरामस्यारिविजयवर्णना

अपह्नुत्या कविः श्रीरामचन्द्रस्य प्रकर्षातिशयं वर्णयति—

हर्षं हंसकुले दधत्समधिकश्रीमद्द्विजेशाञ्चित-
स्तन्वानो भुवने प्रसादमतुलं संरुद्धसिन्धूद्धतिः।
कादम्बस्थगिताम्बरः शरदृतुर्मूर्तोऽवतीर्णः क्षितौ
रक्षोवीरबलाहकान्दलयितुं श्रीरामभद्रच्छलात् ॥१११॥

माधुरी—श्रीरामभद्रच्छलात् श्रीमतो रामचन्द्रस्य व्याजात् **रक्षोवीरवलाहकान्** वीरराक्षसमेघान् **दलयितुम्** नाशयितुं **हंसकुले** हंसपक्षिसमूहे **हर्षं दधत्** धारयन् **समधिकश्रीमद्द्विजेशाञ्चितः** श्रीयुक्तचन्द्रयुक्तः **भुवने** जले **अतुलं प्रसादं** निर्मलतां **तन्वानः** विस्तारयन् **संरुद्धसिन्धूद्धतिः** संरुद्धनदीप्रवाहः **कादम्बस्थगिताम्बरः** कादम्बपक्षिभिराच्छादितगगनः **मूर्तः** शरीरवान् **शरदृतुः क्षितौ** पृथिव्याम् **अवतीर्णः** प्रादुर्भूतः।

भगवान् श्रीरामोऽपि **हंसकुले** सूर्यवंशे हर्षं दधाति, **श्रीमद्द्विजेशाञ्चितः** तेजस्विभिर्ब्राह्मणैः पूजितोऽस्ति, **भुवने** लोके **प्रसादम्** अनुग्रहं तनुते, **संरुद्धसिन्धूद्धतिः** सेतुबन्धनेन प्रशमितसमुद्रवेगः प्रसिद्धस्तथा **कादम्बस्थगिताम्बरः** सुवर्णभूषणैराच्छादितवस्त्रोऽस्तीति विशेषणसाम्याच्छरदृतोश्छलता तस्य युज्यते।

हिन्दी अनुवाद—भगवान् श्रीरामचन्द्र के बहाने से वीरराक्षस रूपी मेघों को नष्ट करने के लिये हंसों के समूह में प्रसन्नता फैलाता हुआ, अतिशयशोभाशाली चन्द्रमा से युक्त, जल में अत्यधिक निर्मलता को लाता हुआ, नदियों के प्रवाह को सूक्ष्म करने वाला तथा कलहंसों से आकाश को आच्छादित किये हुये शरीरधारी शरदृतु ही पृथिवी में अवतीर्ण हो गया है।

भगवान् श्रीराम भी हंसकुल (सूर्यवंश) में प्रसन्नता लाते हैं, श्रीमद्द्विजेश (तेजस्वी ब्राह्मणों के द्वारा) अञ्चित (पूजित) हैं, संसार में प्रसाद (अनुग्रह) का विस्तार करते हैं। उन्होंने सिन्धु (समुद्र) की उद्धति (गर्व) को (सेतु बाँधकर) रोक दिया है तथा (तरकस में रखे हुये) सुनहले बाणों से उनके (पीठ के) वस्त्र, आच्छादित हैं (अथवा सुवर्ण के अलंकारों से जिसके वस्त्र आच्छादित हैं)। इन विशेषणों की समता से शरद् ऋतु में उनका कैतव (बहाना) उपयुक्त है।

टिप्पणी—श्रीमद्द्विजेशाञ्चितः श्रीमद्भिर्द्विजेशैरञ्चितः युक्तः पूजितो वा (√अञ्चु गतिपूजनयोः) द्विजेशो ब्राह्मणश्रेष्ठे चन्द्रे तार्क्ष्ये च कीर्तितः इति विश्वः। **भुवने प्रसादं तन्वानः**—भुवनं गगने प्रोक्तं सलिले विष्टपे जने इति धरणिः। प्रसादस्तु

प्रकाशः स्यात्प्रसादः स्यादनुग्रहः इति धरणिः कादम्बः—कादम्बः पक्षिविशेषःस्याच्चित्र-पुङ्खे च कीर्तित इति वैजयन्ती। शार्दूलविक्रीडितं छन्दः अनुप्रासोऽपन्हनुतिश्चालंकारौ।

भगवतः श्रीरामचन्द्रस्याप्रतिमत्वं कथयति कविः—

जय प्रलयपावकप्रतिभटप्रतापोल्लसद्-
दशास्यबिसिनीवनद्विरदयूथनाथ प्रभो।
जहि प्रहितयैकया विशिखलेखया शात्रवान्
भवानिव विभाव्यते न गुणवानवन्याः पतिः ॥११२॥

माधुरी—हे प्रलयपावकप्रतिभटप्रताप ! प्रलयाग्नितुल्यप्रतापिन् ! उल्लसद्दशास्य-बिसिनीवनद्विरदयूथनाथ प्रफुल्लदशमुखकमलिनीवनविनाशकगजयूथप ! प्रभो ! जय सर्वोत्कर्षेण वर्तस्व। प्रहितया प्रक्षिप्तया एकया विशिखलेखया बाणरेखया शात्रवान् शत्रून् जहि प्राणहीनान् कुरु। भवान् इव गुणवान् (अन्यः) अवन्याः पतिः भूपतिः न विभाव्यते दृश्यते।

हिन्दी अनुवाद—हे प्रलयाग्नि के समान प्रतापिन् ! विकसित दशमुख रूपी कमलिनीवन के विनाशक गजराज ! प्रभुवर ! आपकी जय हो। फेंके गये एक बाण की रेखा से शत्रुओं को मार दो। आपके समान गुणवान् दूसरा राजा नहीं दिखाई पड़ता है।

टिप्पणी—प्रतिभटः—प्रतियोद्धा तुल्यबलशालीत्यर्थः बिसिनीवनम्—नलिन्यां बिसिनी पद्मिनीत्यमरः शात्रवान्—दस्युशात्रवशत्रवः इत्यमरः। पृथ्वीछन्दः वृत्त्यनुप्रासः उपमारूपकयोः संसृष्टिश्च।

वैरिवीराणामपि कृते श्रीरामचरणसरोजाश्रयस्य श्रेयस्करत्वं कथयति—

भ्रान्तिभ्रान्ताः श्रयध्वं चरणसरसिजं वैरिवीरद्विरेफाः
कौशलेयस्य न स्यादपरसुमनसामाश्रयः श्रेयसे वः।
रक्षोराजश्रियामागमजनिततिरोधानया सेवितं तत्।
तेजस्तिग्मांशुना यत्पुनरपि जनकक्ष्माधिपापत्यलक्ष्म्या ॥११३॥

माधुरी—हे भ्रान्तिभ्रान्ताः भयभीतचित्तभ्रमेण व्याकुलाः वैरिवीरद्विरेफाः वीरशत्रुभ्रमराः ! [यूयम्] कौशलेयस्य कौशल्यासूनोः चरणसरसिजम् पादपद्मम् श्रयध्वम् सेवध्वम् अपरसुमनसाम् अन्यदेवानाम् आश्रयः सेवा वः युष्माकं श्रेयसे

कल्याणाय न स्यात् (विष्णोर्देवश्रेष्ठत्वादितिभावः) **यत्** (चरणकमलम्) **रक्षोराजत्रियामागमजनिततिरोधानया** रावणरात्रेरागमनेन [चरणकमलवियोगात्] तिरोहितया **जनकक्ष्माधिपापत्यलक्ष्म्या** जानकीरूपलक्ष्म्या **तत्तेजस्तिग्मांशुना** श्रीरामतेजःसूर्येण हेतुना **पुनः अपि सेवितम्** प्राप्तमित्यर्थः (अतो हेतोः सेवध्वमित्याशयः।)

भ्रमणेन श्रान्तान् मधुकरान् प्रत्येवं व्याख्यानं कार्यम्—

हे मधुकराः ! यूयम् सरसिजम् श्रयध्वम् **अपरेषां सुमनसां** पुष्पाणाम् आश्रयो नैव श्रेयस्करो भविष्यति। रात्रौ तस्य शोभा तिरोहिता भवति, पुनः सूर्येण सह सम्पर्कात् तत्कमलं विराजते। अतोऽन्यानि पुष्पाणि संत्यज्य तदाश्रयणं वरम्।

हिन्दी अनुवाद—हे [भयभीत चित्त के] श्रम से व्याकुल शत्रुवीररूपी मधुकरो ! [तुम लोग] कौशल्यानन्दन के चरणकमलों का आश्रय लो, दूसरे देवों का आश्रय तुम्हारे लिये कल्याणकारी नहीं हो सकता (क्योंकि विष्णु सर्वश्रेष्ठ देवता हैं।) जो चरणकमल रावणरूप रात्रि के आगमन से [वियुक्त होने के कारण] तिरोहित जानकीरूप लक्ष्मी के द्वारा श्रीराम के तेज रूपी सूर्य के सम्पर्क से पुनः सेवित होते हैं। (जैसे रात्रि में कमल शोभाहीन हो जाता है तथा सूर्य के सम्पर्क से पुनः उस शोभा को धारण करता है तथैव रावण के आगमन से भगवान् के चरण सीता से वियुक्त हो गये थे एवं पुनः राम के तेज से रावण का विनाश होने पर वे पुनः भगवती जनकनन्दिनी से सेवित हुये, यह भाव है।)

भ्रमण से श्रान्त मधुकरों के प्रति इस श्लोक की व्याख्या इस प्रकार होगी—हे भ्रमरो ! तुम लोग कमल का आश्रय लो, दूसरे पुष्पों का आश्रय तुम्हारे लिये हितकर न होगा। रात्रि में भले वह शोभाहीन हो जाता हो परन्तु प्रातः सूर्य के साथ सम्पर्क से वह विलसित होता है है।

टिप्पणी—**द्विरेफाः**—द्विरेफ पुष्पलिड्भृङ्गषट्पदभ्रमरालयः इत्मरः। **सुमनसः**—देवाःपुष्पाणि च सुमनसस्त्रिदिवौकसः, सुमनसः पुष्पं प्रसूनं कुसुमं सुममिति चामरः। स्रग्धराछन्दो रूपकालंकारः।

श्रीरामचन्द्रस्य शत्रुनृपान् दूरे प्रवासं कारागारान्तर्वासं—वोपदर्शति—

पाराद्वारांनिधेरप्यधिवसत नृपाः क्वचिदुद्देशमारात्
कारागारान्तरं वा कलयत यदि वो रामचन्द्रे विरोधः।
क्षिप्ताद्रित्रासमज्जत्तिमिमकरकुलाकीर्णपातालमूलः
सिन्धुस्तेनैव बद्धः क्षयमपि निखिला निर्ययिरे नैकषेयाः॥११४॥

माधुरी—हे नृपाः ! यदि वः युष्माकं **रामचन्द्रे विरोधः** [तर्हियूयम्] **वारांनिधेः** समुद्रस्य अपि **पारात् आरात्** दूरे **कञ्चित् उद्देशम्** स्थानम् **अधिवसत, कारागारान्तरं** बन्दीगृहमध्यं **वा कलयत** अङ्गीकुरुत । **तेन एव क्षिप्ताद्रित्रासमज्जत्तिमिमकरकुलाकीर्णपातालमूलः** क्षिप्तानाम् अद्रीणाम् पर्वतानाम् त्रासात् भयात् मज्जत् यत्तिमीनां मकराणाञ्च कुलम् तेनाकीर्णम् पातालमूलं यस्य सः (बहु०) **सिन्धुः** समुद्रः **बद्धः निखिलाः नैकषेयाः** राक्षसाः अपि **क्षयं निन्यिरे** हताः इत्यर्थः । (अतः युष्माकमपि मरणं ध्रुवमिति व्यज्यते)

हिन्दी अनुवाद—हे राजाओ ! यदि तुम लोगों का श्रीरामचन्द्र से विरोध है तो तुम लोग या तो समुद्र के पार से भी दूर किसी स्थान में जाकर निवास करो अथवा बन्दीगृह में रहना स्वीकार करो। भगवान् राम के द्वारा ही, फेंके गये पर्वतों के भय से डूबते हुये मत्स्यों तथा मगरों के समूह से जिसका नीचे का भाग भर गया है, ऐसा समुद्र बाँधा गया तथा सम्पूर्ण राक्षस मारे गये हैं। (अतः तुम्हारा भी मरण निश्चित है यह गूढभाव व्यक्त होता है।)

टिप्पणी—पारात्—आरात्पदयोगे पञ्चमी **उद्देशम्**—अधिपूर्वकवस्धातोराधारे द्वितीया **रामचन्द्रे**—वैषयिकी सप्तमी **नैकषेयाः**—निकषायाः अपत्यानि (निकषा + ढक्) राक्षसः कौण......निकषात्मजः इत्यमरः । स्रग्धरावृत्तम् अनुप्रासालंकारः ।

श्रीरामेण पराजितानां पलायितानां शत्रूणां प्रासादेषु नीलीवर्णनं करोति—

सङ्ग्रामे भङ्गभाजस्त्वमिदमधिपते ब्रूहि का नाम साऽहम्
यामेष स्वीचकारेत्यमलतरसुधाकीर्तिमाराद्विधूय ।
न प्रासादं तवारेर्विरहयति महामेदिनीपालमौले !
भ्रान्त्वा लोकानकीर्तिश्चिरतरपतितोद्गाढनीलीच्छलेन ।११५।।

माधुरी—उद्वासितारिप्रासादेषु नीलीं दृष्ट्वा कश्चित् पृच्छति—

सङ्ग्रामे भङ्गभाजः पराजितस्य **अधिपतेः** राज्ञः **त्वं का इदं ब्रूहि नाम** सत्यं वद। नीली कथयति—**अहं सा याम् एषः** श्रीरामशत्रुः **अमलतरसुधाकीर्तिम्** विशदसुधावद् धवलां कीर्तिम् **आरात्** दूरे **विधूय** त्यक्त्वा **स्वीचकार** अङ्गीकृतवान् (सैवाहमकीर्तिरिति शेषः)। ततः स रामम् प्रति कथयति—

हे **महामेदिनीपालमौले** ! हे राजचूडामणे ! [सैव] **अकीर्तिः लोकान् भ्रान्त्वा** सर्वत्र परिभ्रम्य **चिरतरपतितोद्गाढनीलीच्छलेन** बहुकालेन घनीभूतनीलीव्याजेन **तव अरेः प्रासादं न विरहयति** मुञ्चति (प्रतापातिशयो व्यज्यते ।)

हिन्दी अनुवाद—श्रीराम के भय से पलायित शत्रु के महलों में जमी हुई नीली (काई) को देखकर कोई पूछता है—

संग्राम में पराजित राजा की तुम कौन हो, इसे यथार्थ रूप में बताओ। (नीली उत्तर देती है—) मैं वह हूँ जिसे इस प्रासाद के स्वामी ने (श्रीराम का शत्रु बनकर) अपनी सुधा के समान धवल कीर्ति को दूर छोड़कर स्वीकार किया था (मैं वही अकीर्ति हूँ) तब वह (पृच्छक) श्रीराम के प्रति कहता है—

हे चक्रवर्तिशिरोमणे ! वही अकीर्ति सभी लोकों में घूमकर (सर्वत्र फैल कर) चिरकाल से जम जाने के कारण घनीभूत नीली (काई) के बहाने से तुम्हारे शत्रु के प्रासाद (महल) को नहीं त्याग रही है। (इससे भगवान् का प्रचण्ड प्रताप व्यक्त होता है।)

टिप्पणी—स्रग्धरावृत्तम्, उपमापह्नुत्योः संसृष्टिः, प्रतापातिशयो व्यङ्ग्यः।

शत्रून् प्रति राममेवानन्यं शरण्यमुपदिशति—

उल्लसच्चित्रवाजिस्वनस्यन्दनः
स्वाश्रितैः श्लाघ्यलक्ष्मीरशोकैर्धवैः।
विद्विषोऽन्यं शरण्यं भियाऽन्विष्यथ
शैलमीदृङ् न किं कोशलाखण्डलः ॥११६॥

माधुरी—हे **विद्विषः** शत्रवः ! **भिया अन्यं शैलम्** पर्वतं **शरण्यम्** शरणागत—रक्षकम् शरणस्थलं का **अन्विष्यथ** मृगयथ। **किम् उल्लसच्चित्रवाजिस्वनस्यन्दनः** उल्लसन्तः चित्राश्चित्रवर्णाः वाजिनस्तेषां स्वनो यस्य तादृशः स्यन्दनो यस्य सः (बहु०) **स्वाश्रितैः अशोकैः** शोकरहितैः **धवैः** पुरुषैः **श्लाघ्यलक्ष्मीः** श्लाघ्या स्तुत्या लक्ष्मीः कान्तिर्यस्यसः **कोशलाखण्डलः** कोशलेन्द्रः **ईदृङ्** पर्वततुल्यो न (अस्तीतिशेषः)]पर्वतोऽपि **उल्लसच्चित्रवाजिस्वनस्यन्दनः** उल्लसन्तो ये चित्रवाजिनः अनेकवर्णाः पक्षिणस्तेषां स्वनयुक्ताः स्यन्दनाः वृक्षविशेषा यस्मिन् सः तथा **अशोकैः धवैः** तन्नामकैः वृक्षैः **श्लाघ्यलक्ष्मीः** श्लाघ्यशोभो भवतीत्युभयोः साम्यम्।]

हिन्दी अनुवाद—हे शत्रुओ ! डर से दूसरे पर्वत को शरणस्थल खोज रहे हो। क्या उल्लसित चितकबरे घोड़ों के शब्द से युक्त रथवाले तथा अपने आश्रित शोक रहित पुरुषों से स्तुत्य शोभाशाली कोशलाधीश ऐसे (पर्वत तुल्य) नहीं हैं [पर्वत भी उल्लसित बहुरंगी पक्षियों से युक्त स्यन्दन नामक वृक्ष तथा अपने ऊपर स्थित अशोक एवं धव वृक्षों से महनीय शोभावाला है अतः दोनों की समता सिद्ध है।]

टिप्पणी—**स्यन्दनः**—स्यन्दनौ रथपादपाविति धरणिः **शरण्यः**—शरणे साधुः (शरण + यः) स्रग्विणीछन्दः उपमालङ्कारः ।

श्रीरामेण वशीकृतानां शत्रूणां द्विपानाञ्च श्लेषेण समतामाह—

गलन्मदास्तादृगुदग्रविग्रहाः
पुरःस्फुरद्भूरिकरश्रिया युताः ।
स्मरन्त्यरण्यानि वशीकृतास्त्वया
सह द्विपैः शृङ्खलिता विरोधिनः ॥११७॥

माधुरी—[हे राम !] त्वया **वशीकृता** बन्दीकृताः **गलन्मदाः** गलन् मदो येषान्ते (बहु०) गतदर्पाः **तादृगुदग्रविग्रहाः** तादृक् अनिर्वचनीयः उदग्रः उत्कटः विग्रहः कलहो येषान्ते (बहु०) **पुरःस्फुरद्भूरिकरश्रिया युताः** समक्षं सुशोभितबहुकरसम्पदा संयुताः **शृङ्खलिताः** शृङ्खलया बद्धाः **विरोधिनः** शत्रवः तुल्यविशेषणैः मदजलरहितैः, उत्कट-शरीरैः शुण्डायाः शोभाशालिभिः शृङ्खलितैः **द्विपैः** सह **अरण्यानि स्मरन्ति** ।

हिन्दी अनुवाद—[हे राम !] तुम्हारे द्वारा वश में किये गये मद से रहित, उस प्रकार के उत्कट युद्ध करने वाले, समक्ष रखी हुई कर में रूप के प्रदेय प्रचुर सम्पत्ति से युक्त बेड़ी पहिने हुये शत्रु; मदजल से रहित, उत्कट शरीर वाले, सामने ही सुशोभित सूँड़ की अत्यधिक शोभा से युक्त हाथियों के साथ (अपने विचरण के स्थान) जंगलों का स्मरण करते हैं ।

टिप्पणी—**भूरिकरश्रिया**—भूरि ब्रह्माच्युतेशेषु भूरिः प्राज्यसुवर्णयोरिति विश्वः । करो राजप्रदेये स्याद्रश्मौ हस्ते घनोपले इति धरणिः । **शृङ्खलिताः**—शृङ्खला सञ्जाता एषामिति शृङ्खला + इतच् शृङ्खला पुंश्चली कांच्यां लोहरज्जौ च बन्धने इति विश्व । **वंशस्थच्छन्दः श्लेषसहोक्त्योः सांकर्यम्** ।

भगवतः शत्रुस्त्रीणां भाद्रपदरात्रीणां समतामाह—

क्षितीश्वरालक्षितचन्द्रतारकाः
पयोधरासंमगिलीमसाम्बराः ।
तमो वहन्ति प्रचुरं भवद्द्विषन्-
नतभ्रुवो भाद्रपदक्षपा इव ॥११८॥

माधुरी—हे **क्षितीश्वर** ! जगदीश ! **अलक्षितचन्द्रतारकाः** न लक्षिताः चन्द्र-स्तारकाश्च यासु ताः **पयोधरासंगिमलीमसाम्बराः** पयोधराणाम् आ समन्तात् संगि

युक्तं मलीमसं मलिनम् अम्बरं यासु ताः **भाद्रपदक्षपाः** भाद्रपदमासस्य रात्रयः **तमः** अन्धकारम् **इव** न लक्षिते चन्द्रतारके सुवर्णरूप्ये यासु ताः तथा **पयोधराणाम्** स्तनानाम् असगि स्थातुम् अशक्तं मलीमसम् अम्बरं वस्त्रं यासु ताः **भवद्द्विषन्नतभ्रुवः** भवदीय-शत्रूणां नार्यः **तमः** शोकं **वहन्ति** धारयन्ति ।

हिन्दी अनुवाद—हे जगदीश्वर ! जिनमें चन्द्रमा तथा तारा नहीं दिखाई पड़ते तथा जिनमें मेघों के पूर्ण संग से आकाश मैला हो गया है ऐसी भादों की रातें जैसे अन्धकार को धारण करती हैं तथैव सोने व चाँदी (के आभूषणों) से रहित स्तनों में न रुकने वाले गन्दे वस्त्र पहिने हुईं, आपके शत्रुओं की स्त्रियाँ शोक को धारण करती हैं ।

टिप्पणी—**चन्द्रतारकाः**—चन्द्रं हेमनि कर्पूरे चन्द्रः सोमे तथौषधेइति तारो ऽत्युच्चध्वनितरणयोः रत्नमुक्ताविशुद्धौ तारं रुप्ये स्फुरितकरणे निर्मले तारमाहुरिति च धरणिः (तार एव तारकः) । **अम्बरम्**—अंबरं वाससि व्योम्नि कर्पासे च सुगन्ध-के इति विश्वः । **तमः**—तमोध्वान्तं तमो राहुस्तमः शोकस्तमो गुणः इति धरणिः । **वंशस्थच्छन्दः पूर्णोपमालङ्कारः ।**

पर्वतमाश्रितानां श्रीरामारिनारीणां बालशिक्षणं वर्णयति कविः—

दुर्गं मा गाः समं तैर्मधु मधुपगणक्षुण्णमादित्सवो ये
वात्सल्याद्व्यालपोतं श्रुतकरुणरुतं माग्रहीर्मातृहीनम् ।
मास्यं नैषीः फलं तत्सरसमपि तरोः स्याद्यदन्यैरभुक्तम्
बालांशास्तीतिसूनुं शिखरिणि गृहिणी भंगभाजस्तवारेः ।११६॥

माधुरी—[हे राम !] **भंगभाजः** पराजितस्य तव **अरेः** **गृहिणी** भार्या **शिख-रिणि** पर्वते **बालं** **सूनुम्** पुत्रम् **इति** एवं **शास्ति** उपदिशति—

ये वन्यबालकाः **मधुपगणक्षुण्णं** मक्षिकाभिरनुगतं **मधु** क्षौद्रम् **आदित्सवः** जिघृक्षवः **तैः** **समं** सह **दुर्गम्** गहनं वनं **मा** **गाः** गच्छ (तत्र क्षुद्राभिशर्दंभयमस्ति) । **वात्सल्यात्** स्नेहात् **श्रुतकरुणरुतम्** श्रुतं करुणं रुतं ध्वनिर्यस्य स तम् (बहु०) **मातृहीनम्** **व्यालपोतम्** कलभं **मा** **ग्रहीः** (तत्र गजनिपातसम्भवः) । [तथा] यत् **अन्यैः** परिचितजनैः **अभुक्तम्** अनास्वादितं **स्यात्** **तत्** **तरोः** **सरसम्** **अपि** **फलम्** **आस्यम्** मुखं **मा** **नैषीः** नय (तस्यविषफलभावसन्देहः) [सकुटुम्बस्य शत्रोः पर्वतवासो व्यज्यते ।]

हिन्दी अनुवाद—हे राम ! आपके पराजित शत्रु की भार्या (किसी) पर्वत में [अपने] बाल पुत्र को इस प्रकार सिखा रही है—

जो (ंगली बालक) मधुमक्खियों से भरे हुये शहद को लेने वाले हैं उनके साथ जंगली स्थान को न जाओ (नहीं तो मक्खियाँ काट लेंगी)। स्नेह के कारण करुणापूर्ण बोली सुनकर, माता (हथिनी) से विहीन कलभ (हाथी के बच्चे) को मत पकड़ो (अन्यथा हथिनी तुम्हें मार सकती है)। तथा जिस फल को दूसरों (परिचित जनों) ने नहीं खाया है, ऐसे वृक्ष के रसीले फल को भी मुख के पास न ले जाओ (जंगल में विषैले फल भी होते हैं।) [सकुटुम्ब शत्रु का पवत में निवास ध्वनित होता है।]

टिप्पणी—तैः—समं योगे तृतीया वात्सल्यात्—वत्सलस्य भावो वात्सल्यम् (वत्सल + ष्यञ्) स्निग्धस्तु वत्सल इत्यमरः व्यालपोतम्—व्यालो दुष्टगजे सर्पे खले श्वापदहिंस्रयोरिति विश्वः। स्रग्धरावृत्तम् तुल्ययोगितालंकारः परिवारसहितशत्रुप्रवास-रूपो वस्तुध्वनिः।

पुनरप्यरीणां पर्वतेषु प्रवासं वर्णयति—

विहरत्सुरसिद्धसुन्दरीणाम्
क्वचिदुर्वीभृति सन्निधौ दरीणाम्।
वहतां विपदं चिरादरीणाम्
स्थितिरासीद्भवतो भयादरीणाम् ॥१२०॥

माधुरी—[हे राम !] भवतो भयात् चिरात् अरीणां भूयसीम् विपदं विपत्तिम् वहताम् सहमानानाम् अरीणाम् शत्रुणाम् क्वचित् कस्मिंश्चित् उर्वीभृति पर्वते विहरत्सुरसिद्धसुन्दरीणाम् विहरन्त्यः क्रीडन्त्यः सुराणाँ सिद्धानाञ्च सुन्दर्यः यासु ताः तासाम् (बहु०) दरीणां कन्दराणां सन्निधौ स्थितिः आसीत् (अवसन्नित्यर्थः)।

हिन्दी अनुवाद—[हे राम] आपके भय से चिरकालपर्यन्त अत्यधिक विपत्ति को सहते हुये शत्रुओं का, किसी पर्वत में क्रीड़ा करती हुई सुराङ्गनाओं तथा सिद्धों की सुन्दरियों से युक्त कन्दराओं के समीप निवास स्थान था।

टिप्पणी—चिरादरीणाम्—चिरात् अरीणाम् न रीणा (√री + क्त) तुच्छा इत्यरीणा महती दृढा भूयसी वा ताम्। मालभारिणी छन्दः, अनुप्रासयमकावलंकारौ।

भूयोऽपि श्रीरामस्य शत्रूणाम् वने प्रवासं द्रढयति—

यास्यत्येव विशीर्णतां कतिपयैरेतद्दुकूलं दिनै-
र्दानादस्य चिरात्किरातगृहिणी काचित्त्वया तोष्यताम्।
शाखित्वक्परिधानकौशलमलं या लम्भयेत्त्वामिति
ब्रूते वीर तवाहितः क्षितिपतिः कान्तामरण्यं गतः ॥१२१॥

माधुरी—हे वीर ! अरण्यं गतः तव अहितः शत्रुः क्षितिपतिः राजा कान्ताम् (स्वप्रियां) स्त्रियं ब्रूते कथयति—

कतिपयैः एव दिनैः एतद् दुकूलम् विशीर्णतां यास्यति एव विशीर्णं भविष्यतीत्यर्थः । अस्य दानात् काचित् किरातगृहिणी त्वया चिरात् चिरकालपर्यन्तं तोष्यताम् प्रसादय तामित्यर्थः । या त्वाम् शारिवत्वक्परिधानकौशलम् बल्कलधारणम् अलं लम्भयेत् शिक्षयेत् [चिरवनवासविचारेण भयं व्यज्यते] ।

हिन्दी अनुवाद—हे वीर ! जंगल में गया हुआ तुम्हारा शत्रु राजा अपनी स्त्री से कहता है—[हे प्रिये] कुछ ही दिनों में यह रेशमी वस्त्र फट जायगा ही [अतः] इसे देकर तुम किसी भीलनी को बहुत दिनों के लिये प्रसन्न कर लो जो तुम्हें बल्कल धारण करने की कला पूर्ण रूप से सिखा दे । (इससे भय की अधिकता व्यक्त होती है ।)

टिप्पणी—शार्दूल विक्रीडितम् छन्दः अनुप्रासालङ्कारः भयरूपभावस्याभिव्यक्तेर्भावध्वनिरत्र ।

शत्रुदम्पत्योः संवादेन तयोर्भयं दर्शयति—

प्रिये ! प्रयाहि सत्वरं किमत्रशात्रवीचमू-
र्वनद्विपं न पश्यसि त्वदेष किं बलाधिकः ।
स्मराम्यमुष्य शुण्डया भुजौ दशाननद्विषो
निवारणेऽस्य बालिशे ! बलोदयः कुतो मम ॥१२२॥

माधुरी—शत्रुनृपः—प्रिये ! सत्वरं प्रयाहि शीघ्रं चल ।

राज्ञी—अत्र वने शात्रवी शत्रोः चमूः सेना किम् ? (अस्तीति शेषः) ।

राजा—वनद्विपं वन्यं गजं न पश्यसि ।

राज्ञी—एषः किं त्वद् बलाधिकः बलेनाधिकोऽस्ति ।

राजा—अमुष्य तस्य शुण्डया दशाननद्विषः श्रीरामस्य भुजौ स्मरामि । हे बालिशे ! मुग्धे ! अस्य निवारणे दूरीकरणे मम बलोदयः सामर्थ्यं कुतः (नास्तीत्यर्थः) ।

हिन्दी अनुवाद—श्रीराम का प्रवासी शत्रु राजा अपनी रानी से कहता है—
प्रिये ! जल्दी चलो (भागो) ।
रानी—यहां जंगल में शत्रु की सेना है क्या ?

राजा—जंगली हाथी को नहीं देखती हो।

रानी—यह क्या आपसे बल में अधिक है ?

राजा—इसकी सूँड़ के द्वारा [मैं] श्रीराम के भुजदण्डों का स्मरण कर रहा हूँ। हे मूर्खे ! इस (संकट) को दूर करने में मुझमें शक्ति कहाँ है।

टिप्पणी—शात्रवी—शत्रोरियम् (शत्रु + अण् + ङीप्) शुण्डा—शुण्डाऽपि जलहस्तिन्यां मदिराकरिहस्तयोरिति विश्वः। बालिशे—शिशावज्ञे च बालिश इत्यमरः। पञ्चचामरच्छन्दः अनुप्राससस्मरणालंकारौ।

श्रीरामस्य भयात् पलायितस्य शत्रोर्गिरिकन्दराश्रयणं वर्णयति—

भीत्या वीर ! पलायितेन भवतो हित्वा रणक्ष्मातलम्
नीते मन्दिरतामरिक्षितिभुजा भूमीभृतः कन्दरे।
निर्मोकः सितवेष्टनीयति मणिच्छायाऽस्य पट्टांशुक-
प्रावारीयति पन्नगस्यमहतः कायः कृपाणीयति ॥१२३॥

माधुरी—हे वीर ! भवतः भीत्या भयेन रणक्ष्मातलम् युद्धस्थलं हित्वा त्यक्त्वा पलायितेन अरिक्षितिभुजा शत्रुनृपतिना भूमीभृतः पर्वतस्य कन्दरे गुहायाम् मन्दिरतां नीते स्वप्रासादे कृते [सति] महतः पन्नगस्य (कन्दराधिष्ठितस्य) महासर्पस्य निर्मोकः कञ्चुकः सितवेष्टनीयति सितवेष्टनम् उष्णीषमिवाचरति अस्य सर्पस्य मणिच्छाया मणिकान्तिः पट्टांशुकप्रावारीयति पट्टवस्त्रस्योत्तरीयं भवति कायः शरीरम् कृपाणीयति कृपाण इवाचरति। (पलायमानस्य तस्योष्णीषादयः संग्रामभूमावेव पतिता इति कथनेन भयातिशयो व्यज्यते।)

हिन्दी अनुवाद—हे वीर ! आपके भय से युद्धभूमि को छोड़ कर भगे हुये शत्रु राजा के द्वारा पर्वत की कन्दरा को (अपना) महल बना लेने पर (उस कन्दरा में स्थित) महासर्प की केंचुल [उस राजा की] पगड़ी जैसी बन जाती है, उसके मणि की कान्ति रेशमी दुपट्टे की तरह हो जाती है तथा उसका शरीर तलवार के समान बन जाता है। (भागते हुये उसकी पगड़ी आदि रणस्थल में ही छूट गये हैं इस कथन से भय की अधिकता व्यक्त होती है।)

टिप्पणी—सितवेष्टनीयति—सितवेष्टनमिवाचरति एवं पट्टांशुकप्रावारीयति कृपाणीयतीति त्रयोऽपि क्विबन्ता नामधातुप्रयोगाः। वेष्टनं कर्णशष्कुल्यामुष्णीषे परिवारणे इति धरणिः, द्वौ प्रावारोत्तरासंगावित्यमरः। शार्दूलविक्रीडितं छन्दः। वीररसोऽत्रव्यङ्ग्यः, अनुप्रासालंकारः।

प्रकारान्तरेण श्रीरामस्य शत्रोः पर्वताश्रयणमाह—

निरस्य सुलभं यशोरजतराशिमाजिस्थली-
मुपेत्य शयनादपि त्वदरिमेदिनीन्द्रोऽबुधः ।
कुतः कलयितुं भ्रमत्यलमकीर्तिकालायसं
महाद्रिशिखरस्थलीरलमनीदृगभ्रंकषाः ॥१२४॥

माधुरी—[हे राम !] अबुधः मूढः त्वदरिमेदिनीन्द्रः तव शत्रुनृपतिः **आजिस्थलीम्** युद्धस्थलम् **उपेत्य** प्राप्य **शयनात्** मरणात् अपि **सुलभम् यशोरजतराशिम्** यशोरूपं रजतराशिम् **निरस्य** सन्त्यज्य **अलम्** पर्याप्तम् **अकीर्तिकालायसम्** अयशोरूपं श्यामलोहं **कलयितुम्** सञ्चितुम् **अनीदृगभ्रंकषाः** [कालायसापेक्षया] नोन्नताः **महाद्रिशिखरस्थलीः** नगेशशिखरभूमीः **अलम्** एव **कुतः भ्रमति** । (अयशःशिखरापेक्षयोन्नतत्वात्तस्य गोपनमशक्यमिति भावः ।

हिन्दी अनुवाद—हे राम ! तुम्हारा मूर्ख शत्रु राजा युद्धस्थल में जाकर, मरण के द्वारा भी सुलभ यश रूप रजत के ढेर को त्याग कर, पर्याप्त रूप से अयश रूप काले लोह को संचित करने के लिये [उसकी अपेक्षा] न ऊँची, (नीची) महा पर्वत की चोटियों पर ही क्यों घूमता है (रणस्थल से भागने का अयश पर्वत शिखरों की अपेक्षा अधिक ऊँचा है, अतः उसको छिपाना सम्भव नहीं है ।)

टिप्पणी—**अकीर्तिकालायसम्**—कालञ्च तदयः इति कालायस्+टच् समासान्तः अकीर्तिरेव कालायसम् (कर्म०) **अनीदृगभ्रंकषाः** न ईदृक् अभ्रंकषः (अभ्र √कष+खच् मुमागमः) अनीदृशः अभ्रंकषाः इति (कर्म०) यादृशमकीर्तिकालायसमुन्नतंतद्वन्महाद्रिशिखरस्थल्यो नोन्नता अतस्तस्य गोपनं सर्वेषां दृष्टिपथमायास्यतीति भावः । पृथ्वीछन्दः रूपकालङ्कारः ।

रावणवधानन्तरं श्रीरामस्य क्रोधः कदाचिदेव भवतीत्याह—

सीतासहचरहरिणा दशकन्धरगन्धसिन्धुरे शमिते ।
रक्षोबलशैलवने क्वचिदुल्लालसतीति मदगन्धः ॥१२५॥

माधुरी—**सीतासहचरहरिणा** सीतापतिरूपिणा विष्णुना **दशकन्धरगन्धसिन्धुरे** रावणरूपिणि गन्धगजे **शमिते** हते (तस्य) **मदगन्धः** गर्वलेशः **क्वचित् रक्षोबलशैलवने** रक्षसां बलं सेना सैव शैलस्य वनं तत्र उल्लालसतीति अधिकमुल्लसति । सिंह पक्षे त्वेवं व्याख्यानं कार्यम्—आरण्यकेन सिंहेन गन्धगजे हते (गजानां) दानजलवासः कुत्रचित् शैलवने शोभते । (प्रायः सर्वे गजास्तस्मात्प्रदेशाद्दूरं गच्छन्तीति भावः ।)

हिन्दी अनुवाद—सीतापतिरूपी विष्णु के द्वारा रावणरूपी गन्धगज के मारे जाने पर उनका साधारण गर्व राक्षसों की सेना रूपी किसी पर्वतीय वन में अधिक उल्लसित होता है। सिंह के पक्ष में यह अर्थ होगा—

(सीता—हल की पद्धति के साथी) जंगली सिंह के द्वारा गन्धगज (सर्वश्रेष्ठ हाथी) के मारे जाने पर (हाथियों के) मदजल की गन्ध किसी पर्वतीयवन में प्रकट होती है।

टिप्पणी—**सीतासहचरहरिणा**—सीतायाः जनकसुतायाः सहचरो हरिः विष्णुस्तेन सीतायाः हलपद्धत्यास्तस्याः ग्रामाद् बहिर्वने स्थितया लक्षणया वनस्य सहचरो हरिः सिंहस्तेन **मदगन्धः**—मदस्य गन्धो लेशः दानजलस्य वासश्च **गन्धसिन्धुरः**—गन्धगजः सर्वोत्तमो हस्तीत्यर्थः। शमयति गजानन्यान् गन्धद्विपः कलभोऽपि सन् (विक्रम० ५/ ८)। **गीतिश्छन्दः रूपकालंकारः।**

दिङ्मण्डलसदृशस्य रावणस्योपरि श्रीरामस्य विजयं वर्णयति—

अतुलायतिं दशमुखम्
त्रिदशैर्विनिषेवितं शतमखप्रमुखैः।
जयति स्म दिग्वलयमन्य-
मिव क्षणदाचरं रघुकुलाब्धिविधुः॥१२९॥

माधुरी—**रघुकुलाब्धिविधुः** रघुकुलरूपिणि अब्धौ समुद्रे जातो विधुश्चन्द्रः अन्यम् द्वितीयम् **दिग्वलयम्** दिङ्मण्डलमिव **अतुलायतिम्** अतुला आयतिः उत्तरकालवृद्धिर्यस्य स तम् (बहु०) **शतमखप्रमुखैः**—इन्द्रप्रभृतिभिः **त्रिदशैः** देवैर्**विनिषेवितम्** विशेषेण पूजितम् **क्षणदाचरम्** राक्षसम् **दशमुखम्** रावणम् जयति स्म [दिग्वलयम् अपि अतुलायति अतिदीर्घम् इन्द्रादिभिः दिक्पालैर्निषेवितम् भवति]

हिन्दी अनुवाद—रघुकुलरूपी समुद्र में प्रादुर्भूत चन्द्रमा [श्रीराम] ने दूसरे दिङ्मण्डल के समान अतुलनीय वृद्धिवाले इन्द्र आदि देवों से सेवित राक्षस रावण को जीत लिया [दिशाओं का मण्डल भी अत्यन्त लम्बा चौड़ा तथा इन्द्र आदि दश दिक्पालों द्वारा सेवित एवं दश द्वारों वाला होता है अतः दोनों का साम्य युक्त है।]

टिप्पणी—**आयतिः**—आयतिः संयमे दैर्घ्ये प्रभावागामिकालयोरितिधरणिः। **दिग्वलयम्** दशमुखम् दशद्वारयुतम् भवति तस्य पतयः क्रमशः इन्द्रोवह्निः पितृपति नैऋतो वरुणो मरुत्। कुबेर ईशः पतयः पूर्वादीनां दिशां क्रमात्। ब्रह्मानन्तावाकाशपातालयोरीशौभवतः। **आर्यागीतिश्छन्दः उपमालङ्कारः।**

विशेषणसाम्येन शिवेन रावणवर्धनं रामेण च रावणवधमाह—

अवधीरिताम्बुधिविषः
क्षितिभृत्सुतयाऽनुरञ्जितः प्रियया ।
चित्रं न राजमौलि-
र्दशकन्धरवर्द्धनाय यदि रामः ॥१२७॥

माधुरी—**अवधीरिताम्बुधिविषः** अवधीरितम् बन्धनेन तिरस्कृतम् अम्बुधेः विषं जलं येन सः (बहु०) **क्षितिभृत्सुतया** क्षितिभृतो राज्ञो जनकस्य सुतया सीतया **प्रियया अनुरञ्जितः** प्रसादितः **राजमौलिः** राज्ञां मौलिः राजश्रेष्ठः **रामः** यदि **दशकन्धरवर्धनाय** दशकन्धरस्य रावणस्य वर्धनाय छेदनाय [समर्थोऽभूत् अत्र] चित्रम् आश्चर्यं न । शिवपक्षे पद्यस्यास्यैवं व्याख्या कार्या—

अवधीरिताम्बुधिविषः तिरस्कृतसमुद्रविषः **क्षितिभृत्सुतया** पर्वतपुत्र्या पार्वत्या अनुरञ्जितः राजमौलिः राजा चन्द्रः मौलौ यस्य चन्द्रशेखरः शिवो यदि [वरेण] दशकन्धरस्य **वर्धनाय** वृद्धये समर्थोऽभूदत्र चित्रं न ।

हिन्दी अनुवाद—[सेतु बन्धन कर] समुद्र के जल को तिरस्कृत करने वाले जनकपुत्री प्रिया के द्वारा प्रसन्न किये गये राजाओं में श्रेष्ठ श्रीराम यदि रावण के मारने में समर्थ हुये तो इसमें आश्चय क्या है ! **अथवा** [पान करके] समुद्र में उत्पन्न विष को तिरस्कृत करने वाले पार्वती के द्वारा प्रसन्न किये गये चन्द्रमा को मस्तक में धारण किये हुये शिवजी यदि [वर के द्वारा] रावण की वृद्धि करने में समर्थ हुये तो इसमें आश्चर्य क्या है ?

टिप्पणी—**विषम्**—विषं तु गरले तोये इति विश्वः । **वर्धनाय**—√ वृध् वृद्धौ √ वृधू (छेदने) + ल्युट् वर्धनं छेदने वृद्धाविति धरणिः । गीतिश्छन्दः शब्दश्लेषालङ्कारः ।

सूर्यसादृश्येन श्रीरामेण रावणवधपूर्वकं सीतोद्धरणमाह –

कीर्णं धाम चिराय चक्रघटने नालस्यमालंबितम्
जातं सत्वरपूरणाय मिलतः क्षीणस्य राज्ञः स्वयम् ।
हत्वा यद्दशकन्धरान्धतमसं देव त्वयोल्लासिता
सीताम्भोरुहिणी तदर्यमकुलोद्भूतस्य ते नाद्भुतम् ॥१२८॥

माधुरी—हे **देव** ! यत् त्वया **चिराय** चिरकालपर्यन्तम् **धाम** प्रतापः **कीर्णम्** प्रसारितः (यत्) **चक्रघटने** सेनायाः स्वीकारे **आलस्यं न आलम्बितम्** कृतम् (यत्)

स्वयं मिलत: आगतस्य क्षीणस्य भ्रात्रा तिरस्कृतस्य राज्यान्निष्काशितस्य **राज्ञः** सुग्रीवस्य विभीषणस्य च **सत्वरपूरणाय** शीघ्रमेव राज्याभिषेकाय **जातम्** भूतम् (यत्) **दशकन्धरान्धतमसम्** रावणरूपिणं गाढान्धकारं **हत्वा सीताम्भोरुहिणी** सीतारूपिणी कमलिनी **उल्लासिता** समानन्दिता **तत्** पूर्वोक्तं कार्यजातम् **अर्यमकुलोद्भूतस्य** सूर्यवंशे समुत्पन्नस्य **ते अद्भुतम्** आश्चर्यंकरं **न** (अस्तीतिशेषः) सूर्यपक्षेऽस्य पद्यस्य व्याख्या—

हे देव ! यत् त्वया चिराय **धाम** तेजः विकीर्णम् **चक्रघटने** चक्रवाकपक्षिणोः मेलने आलस्यं न कृतम् **स्वयं मिलितस्य** अमावास्यायां स्वमण्डले स्वयमागतस्य **क्षीणस्य राज्ञः** कलाहीनस्य चन्द्रस्य **सत्वरपूरणाय** शीघ्रमेव कलावर्धनाय उत्साहो विहितः तथा **अन्धतमसं** गाढान्धकारं हत्वा **अम्भोरुहिणी** कमलिनी **उल्लासिता** विकसितपद्मा कृता तत् ते अद्भुतं न (उभयोरपि भवतोरेतद्व्यसनमिति ध्वनितम्)

हिन्दी अनुवाद—भो राम ! जो तुमने चिरकालपर्यन्त (अपना) प्रताप फैलाया, सेना की व्यूहरचना में आलस्य नहीं किया, स्वयम् आये हुये राज्य से निष्काशित राजा सुग्रीव तथा बिभीषण की शीघ्र पूर्ति के लिये समर्थ हुये तथा जो रावण रूपी गाढ़ अन्धकार को मारकर सीतारूपिणी कमलिनी को आनन्दित किया यह सब सूर्यवंश में उत्पन्न आपके लिये आश्चर्यंकर नहीं है । (सूर्य पक्ष में इसका अर्थ इस प्रकार है—)

हे सूर्य देव ! जो आपने देर तक अपना तेज प्रकाशित किया चक्रवाक युग्म के मिलाने में आलस्य नहीं किया, अमावस्या में स्वयम् अपने मण्डल में आये हुये कलाहीन चन्द्रमा की (कलाओं की) शीघ्र पूर्ति की तथा गाढ़ान्धकार को दूर कर कमलिनी को विकसित कमलों से युक्त बनाया यह आपके लिये अद्भुत नहीं है (आप दोनों का यह स्वभाव ही है यह व्यङ्ग्य है ।)

टिप्पणी—चक्रघटने—चक्रं सैन्ये व्यूहे राष्ट्रे पक्षिणि कुम्भकारोपकरणे जलावर्तेऽपीति हैमः तस्य घटने द्रव्यादिना कौशलेन वा रचनायां स्वीकारे एकीकरणे वा **आलम्बितम्**—आलम्बितम् लब्धं प्राप्तं वित्तं भावितमासादितं च भूतं चेत्यमरः **पूरणाय**—पूरणः पूर्वके प्रोक्तः पृष्ठभेदे चेति धरणिः शार्दूलविक्रीडितं छन्दः रूपकालंकारः परोपकारव्यसनरूपो वस्तुध्वनिः ।

वने प्रवसतोः दम्पत्योः मुखेन श्रीरामस्तुतिमाह—

मृदूनि स्वादूनि प्रकृतिसुरभीणि प्रियतमे !
न शक्यन्ते स्तोतुं तरुवरफलान्यत्र विपिने ।
स्तुहि स्वामिन्नेकं रघुपतिविरोधद्रुमफलम्
यतः प्राप्यन्तेऽमूः फलशतसमास्वादनमुदः ॥१२६॥

माधुरी—वने श्रीरामस्य विरोधी प्रवासी नृपः स्वाभार्यां वदति—

हे प्रियतमे ! **अत्र विपिने मृदूनि स्वादूनि प्रकृतिसुरभीणि** प्रकृत्या सुगन्धीनि मनोज्ञानि वा **तरुवरफलानि स्तोतुं** न शक्यन्ते (मधुरतमस्तेषां रस इति भावः)

तदा तस्य भार्या प्रत्युत्तरं ददाति—

हे **स्वामिन् ! एकं रघुपतिविरोधद्रुमफलं** श्रीरामेण विरोधरूपिणो वृक्षस्य फलं स्तुहि प्रशंस **यतः** यस्मात् कारणात् अमूः इमाः **फलशतसमास्वादनमुदः** विविधफलास्वादाः **प्राप्यन्ते** लभ्यन्ते ।

हिन्दी अनुवाद—वन में प्रवास करने वाला, श्रीराम का विरोधी राजा अपनी भार्या से कहता है—

हे प्रियतमे ! इस वन में वृक्षों के कोमल, स्वादिष्ट तथा स्वभाव से सुगन्धित फलों की प्रशंसा नहीं की जा सकती है । (तब उसकी पत्नी उत्तर देती है—)

हे स्वामिन् ! केवल श्रीराम के विरोध रूपी वृक्ष के फल की स्तुति करो, जिसके कारण इन सैकड़ों फलों के आस्वादन का आनन्द मिलता है ।

टिप्पणी—प्रकृतिसुरभीणि—प्रकृत्या सुगन्धीनि मनोज्ञानि वा सुरभि गदित-मेतत्सुन्दरे साधुगन्धे सुरभिरलमिहोक्ता गौर्मुराशल्लकी चेतिधरणिः । **शिखरिणीछन्दः** रूपकालङ्कारः ।

श्रीरामस्य भयादरीणां पलायनं रणे स्थितानां च मरणं वक्ति—

राम ! त्वां समरे वीक्ष्य वैरिवीराः पलायिताः ।
ये स्थितास्तेऽपि गोमायुगृध्रग्रासपलायिताः ॥१३०॥

माधुरी—हे राम ! **समरे त्वां** वीक्ष्य दृष्ट्वा वैरिवीराः पलायिताः । ये (अत्र) **स्थिताः ते अपि गोमायुगृध्रग्रासपलायिताः** गोमायूनां शृगालानां गृध्राणां च ग्रासाः कवलानि तदर्थं यत् पलं तस्य भावं गताः । (गोमायुगृध्रैर्भक्षिता इत्यर्थः) ।

हिन्दी अनुवाद—हे राम ! युद्धस्थल में तुम्हें देखकर बड़े-बड़े वीर शत्रु भाग गये । जो वहाँ रुके रहे वे भी शृगाल तथा गीधों के ग्रास (खाने के लिये) के माँस बने (आपके द्वारा मारे जाने पर उनके शवों को सियारों व गीधों ने खा लिया ।)

टिप्पणी—पलायिताः—(परा अय् + क्त) दूरं गताः अथवा पलम् मांसम् तत् अयिताः इति पलायिताः मांसभावं गताः । पलं मांसं पलं मानं पलो मूर्खः पला तुलेत्यनेकार्थध्वनिमञ्जरी । **अनुष्टुप्छन्दः अनुप्रासयमकालङ्कारौ ।**

शत्रुनृपाणां वने वसतां कष्टानि वर्णयति—

ब्रह्मक्षत्रोरुजन्मांघ्रिजनिवहवृताः संसदि प्रागहृष्यन्
शृण्वन्तो ये चिराय श्रवणपुटसुधास्यन्दिनीर्वन्दिवाचः ।
शैले सत्रा किरातैः स्वपनसुखमुषः श्वापदानां निनादान्
कृच्छ्रेणाकर्णयन्तो भवदुदितभयास्ते निशीथान्नयन्ति ॥१३१॥

माधुरी—[हे राम !] **प्राक्** **संसदि** **ब्रह्मक्षत्रोरुजन्मांघ्रिजनिवहवृताः** ब्राह्मणक्षत्रियवैश्यशूद्राख्यचतुर्वर्णानां निवहेन समूहेन वृताः **ये** राजानः **चिराय** चिरकालपर्यन्तं **श्रवणपुटसुधास्यन्दिनीः** श्रवणपुटेऽमृतवर्षिणीः **वन्दिवाचः** सूतगीतीः **शृण्वन्तः** अहृष्यन् प्रसन्नाः अभवन् । **भवदुदितभयाः** भवतः प्राप्तभयाः **ते** (नृपाः) **शैले** कुत्रचित् पर्वते **किरातैः** **सत्रा** साकम् **स्वपनसुखमुषः** शयनसुखहरान् **श्वापदानां** मांसाहाराणां जन्तूनाम् **निनादान्** ध्वनिम् आकर्णयन्तः शृण्वन्तः **कृच्छ्रेण** कष्टेन **निशीथान्** रात्रीः नयन्ति गमयन्ति ।

हिन्दी अनुवाद—[हे राम] पहिले सभा में ब्राह्मण क्षत्रिय वैश्य तथा शूद्रों के समूह से घिरे हुये जो राजा चिरकालपर्यन्त वन्दिजन के कानों में अमृत बरसाने वाले वचनों को सुनते हुये प्रसन्न होते थे, वे पर्वत में किरातों के साथ निद्रा के सुख को हरने वाली, मांसाहारी जन्तुओं की ध्वनि को सुनते हुये; बड़े कष्ट से रातें बिताते हैं ।

टिप्पणी—**सत्रा**—साकं सत्रा समं सहेत्यमरः **श्वापदाः**—शुनः इवापदो येभ्यस्ते (बहु० अच् समासान्तः) हिंसकाः जीवाः **निशीथः**—निशीथस्त्वर्धरात्रे स्याद्रात्रिमात्रेऽपि दृश्यते इति धरणिः । अयं श्लोकः 'पुराधिरूढः शयनं महाधनम्' (किरात १।३८) श्लोकेन साम्यं करोति । स्रग्धराछन्दः अनुप्रासालंकारः ।

श्रीरामस्य विरोधे शत्रूणां मरणं तोषे च तेषां रक्षणं वदति—

सत्रायते समस्तं रुष्टे यस्मिन्नरातिनृपनगरम् ।
स त्रायते समस्तं यो वदति तवास्मि रामभद्रेति ॥१३२॥

माधुरी—**यस्मिन्** [श्रीरामे] **रुष्टे** कुपिते **समस्तं** सकलम् **अरातिनृपनगरम्** शत्रुराजपुरम् **सत्रायते** यज्ञाहुतिर्भवति (ज्वलतीत्यर्थः) । **'रामभद्र** हे रामचन्द्र ! **तव अस्मि'** इति **यः** **वदति**, **समः** निष्पक्षपातः **स** तं जनं **त्रायते** रक्षति ।

हिन्दी अनुवाद—जिन [श्री राम] के रुष्ट होने पर शत्रु नृपति का सम्पूर्ण नगर यज्ञ की आहुति बनता है । (जलकर राख बन जाता है ।) । 'हे राम !

(मैं) तुम्हारा हूं' ऐसा जो कहता है, पक्षपात रहित वे राम उस (भक्त) की रक्षा करते हैं ।

टिप्पणी—सत्रायते—सत्रम् इव भवति इति सत्र + क्यङ् सत्रं यज्ञे सदादाने छादनारण्यकैतवे इति विश्वः । गीतिश्छन्दः संदेशनामकं यमकम् ।

श्रीरामखड्गस्य लंकया नगर्या सह साम्यं वर्णयति—

कीलालपाकलितमूर्तिरमित्रवीर-
त्रासावहा बहलहेमरुचिः सुकोशा ।
हस्तं गता रघुपतेर्यदि खड्गमुष्टिः
स्यान्नैकषेयनगरी न कथं तथैषा ॥१३३॥

माधुरी—यदि यदा रघुपतेः श्रीरामस्य हस्तंगता हस्ते **कीलालपाकलितमूर्तिः** कीलालपेन खड्गफलेन आकलिता युक्ता मूर्तिः शरीरं यस्याः सा (बहु०) **अमित्रवीर-त्रासावहा** शत्रुवीरभयकारिणी **बहलहेमरुचिः** मुष्टिदेशे प्रचुरसुवर्णकान्तिः **सुकोशा** शोभनावरणयन्त्रा **खड्गयष्टिः** असिलता स्यात् (तदा) **एषा नैकषेयनगरी** राक्षसपुरी [लंका] **तथा** तादृशी कथं न (स्यात्) । लङ्कानगरी अपि **कीलालपाकलितमूर्तिः** कीलालपैः राक्षसैराकलिता गृहरूपामूर्तिर्यस्याः सा शत्रुभयकारिणी, (सुवर्णमयत्वात्) प्रचुरसुवर्णकान्तिः **सुकोशा** शोभनभण्डारयुता चास्तीति द्वयोरपि साम्यं भवति ।

हिन्दी अनुवाद—यदि श्रीराम के हाथ में रक्तपायी फल (धार) के सहित [मूठी में] प्रचुर सुवर्ण की कान्ति वाली शत्रुभयकारिणी, सुन्दर कोश (म्यान) से युक्त तलवार हो तब यह राक्षसपुरी लंका जैसी क्यों न हो । लंकापुरी भी कीलालपों (राक्षसों) से युक्त (भवन रूप) शरीर वाली, शत्रुओं की भयकारिणी सुवर्णमयी होने से प्रचुर स्वर्णकान्तिमती तथा सुन्दर भांडारों से युक्त है अतः दोनों की समता उचित है ।

टिप्पणी—कीलालपः—कीलालं रुधिरे जले इति धरणिः तत् पिबति इति राक्षसः खड्गफलं वा । कोशः—कोशोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोः । भांडा-गारमावरणयन्त्रश्चेति धरणिः । वसन्ततिलकावृत्तम् अतिशयोक्तिरलंकारः ।

इत्यरिविजयवर्णना समाप्तिमगात् ।

अथ श्रीरामस्य शत्रोरकीर्तिवर्णना

श्रीरामस्य शत्रोर्भुवनव्यापिनीमकीर्तिं वर्णयति—

सौवर्णं पाणिमूले हरति न वलयं लौहमित्येव जानन्
मुञ्चत्यालोक्य मुक्तावलिमपि कुचयोः काचभूषाभ्रमेण ।
भिल्लस्त्वद्वैरिनारीं वनभुवि शबरीशंकयोपेक्षते यत्
तत्तस्यानीलयद्भिर्भुवनमुपकृतं वल्लभस्यायशोभिः ॥१३४॥

माधुरी—भिल्लः शबरः **वनभुवि** वनस्थल्यां **शबरीशंकया** शबरीभ्रमेण **त्वद्वैरिनारीम्** तव शत्रोः भार्याम् **यत् उपेक्षते** (ताम् प्रत्युदासीनो भवतीत्यर्थः) **तत् तस्याः वल्लभस्य** पत्युः (प्रवासिनो राज्ञः) **भुवनम् नीलयद्भिः** श्यामं कुर्वाणैः **अयशोभिः** अकीर्तिभिः **उपकृतम्** उपकृत्य साधितम् । [अतएव सः] **लौहम्** लोहनिर्मितम् **इत्येव जानन् पाणिमूले** मणिबन्धप्रदेशे **सौवर्णम्** सुवर्णस्य **वलयम्** कंकणम् **न हरति** [तथा] **कुचयोः** स्तनयोः **मुक्तावलीम्** मौक्तिकसरम् **आलोक्य** दृष्ट्वा **अपि काचभूषाभ्रमेण** काचनिर्मितालंकारभ्रान्त्या **मुञ्चति** त्यजति ।

हिन्दी अनुवाद—भील जंगली प्रदेश में शबरी के भ्रम से तुम्हारे शत्रु की भार्या (रानी) की जो उपेक्षा करता है (उसका उपभोग नहीं करता) वह उसके पति (प्रवासी राजा) की विश्व को काला बनाने वाली अकीर्तियों का उपकार है। (अर्थात् रानी के काली हो जाने से वह भील उसे भीलिनी समझ बैठता है।) [इसीलिये वह] लोह निर्मित समझता हुआ [रानी के] हाथ के सोने के कंकण का हरण नहीं करता [तथा] स्तनों की मोती की माला को देख कर भी काचनिर्मित आभूषण के भ्रम से त्याग देता है।

टिप्पणी—नीलयद्भिः नीलं कुर्वद्भिः नील + णिच् । स्रग्धरावृत्तम् भ्रान्तिमान् अलंकारः ।

पुनरपि श्रीरामस्य शत्रोरयशसः कल्पितमुपमानं कथयति—

पुलिनमवदारयत्यविरलांजनोज्जृम्भितम्
मरकतमहीतले वहति चेद्विवस्वत्सुता ।
तदुदरसमुत्थितैः श्रयतु शैवलैस्तुल्यतां
जनकतनयापतिप्रतिभटक्षितीशायशः ॥१३५॥

माधुरी—**चेद्** यदि **विवस्वत्सुता** यमुना **अविरलाञ्जनोज्जृम्भितम्** अविरलं सघनं यत् अञ्जनम् तेन उज्जृम्भितम् वृद्धम् **पुलिनम्** तटम् **अवदारयति, मरकतमहीतले** नीलमणिभूमितले वहति । **तदुदरसमुत्थितैः** तस्याः उदरे समुत्पन्नैः **शैवलैः** नीलवर्णैः जलतृणैः **जनकतनयापतिप्रतिभटक्षितीशायशः** श्रीरामस्य शत्रुनृपस्याकीर्तिः **तुल्यतां श्रयतु** तुल्या भवतु ।

हिन्दी अनुवाद—यदि यमुना सघन अञ्जन से प्रवृद्ध तट का विदारण करती हैं तथा नीलम की भूमि में बहती हैं (तो) उनके अन्दर उत्पन्न शैवल (सेवार घास) से श्रीराम के शत्रु का अयश समता कर सकता ।

टिप्पणी—**मरकतमहीतले**—अश्मगर्भो मरकतं हिरण्मणिरित्यभिधानरत्नमालायाम् **शैवलैः**—जलनीली तु शैवालम् इत्यमरः । **मालाधरच्छन्दः अतिशयोक्तिरलंकारः** । अयं श्लोकः **शिशुपालवधकाव्यस्य**—'**उभौ यदि व्योम्नि पृथक्प्रवाहावाकाशगंगापयसः पतेताम्** । **तेनोपमीयेत तमालनीलमानीलमुक्तालतमस्य वक्षः** ॥ **इतिश्लोकेन वर्णनसाम्यमुपेतो दृश्यते** ।

इतिशत्रोरकीर्तिवर्णना समाप्तिमगात् ।

अथ श्रीरामस्य दानवर्णना

श्रीरामस्य दानेन भूमिदेवानां स्वर्गापेक्षया समृद्धतरतामाह—

दिनेशकुलकैरवामृतमयूखविश्राणितैस्
त्वया कनकराशिभिर्मणिमयूखकिर्मीरितैः ।
विहर्तुमबलासखैर्विरचिताः सुरस्पर्धया
सहस्रमवनीसुरैःप्रतिगृहं महामेरवः ॥१३६॥

माधुरी—हे **दिनेशकुलकैरवामृतमयूख** सूर्यवंशकुमुदचन्द्र ! **त्वया विश्राणितैः** प्रदत्तैः **मणिमयूखकिर्मीरितैः** अनेकमणिकिरणचित्रितैः **कनकराशिभिः अबलासखैः** भार्यासहचरैः **अवनीसुरैः** ब्राह्मणैः **विहर्तुम्** विहाराय **सुरस्पर्धया**—देवानां स्पर्धया **प्रतिगृहम्** गेहे गेहे (अव्य०) **सहस्रम् महामेरवः** सुमेरुपर्वताः **विरचिताः** निर्मिताः । (**स्वर्गदेवानां** विहाराय एक एव मेरुः पृथ्वीदेवानाम् अस्माकं तु सहस्रं मेरवः सन्तु इति स्पर्धा तेषाम् ।)

हिन्दी अनुवाद—हे सूर्यवंशकुमुदकलाधर ! आपके द्वारा प्रदत्त मणियों की किरणों से चित्रित स्वर्ण के ढेरों से अपनी स्त्रियों के साथ ब्राह्मणों के द्वारा बिहार करने के लिये देवताओं की स्पर्धा से घर घर में एक हजार सुमेरु पर्वत निर्मित किये गये हैं। (स्वर्ग के देवों के पास विहारार्थ एक ही सुमेरु है, हम भूदेवों के पास तो घर घर में एक हजार महामेरु पर्वत हैं।)

टिप्पणी—दिनेशकुलकैरवामृतमयूख—दिनेशस्य सूर्यस्य कुलमेव कैरवम् तस्य विकाशकः अमृतमयूखः अमृताः मयूखाः यस्य स तत्सबोधने (उत्तर पदलोपी समास०) पृथ्वीछन्दः रूपकम् उत्प्रेक्षोदात्तश्चालंकाराः।

श्रीरामस्य दानेन निर्धनगृहेष्वपि मणिमयप्रकाशं वर्णयति—

जितक्षीरा हीराः सहजविमलेन स्वमहसा
सुनासीराश्मानः प्रहसितकरीराधिकरुचः।
त्वया दत्ताः कीराननरुचिररागा मणिगणाः।
विराजन्ते वीराधनजनकुटीरान्तरगता ॥१३७॥

माधुरी—हे वीर ! त्वया दत्ताः **जितक्षीरा** दुग्धापेक्षया धवलाः **हीराः** हीरकमणयः **प्रहसितकरीराधिकरुचः** विकसितकरीरपुष्पाधिककान्तयः **सुनासीराश्मानः** इन्द्रनीलमणयः **कीराननरुचिररागाः** शुकाननवद्रक्तवर्णाः **मणिगणाः अधनजनकुटीरान्तरगताः** निर्धनजनकुटीराणाम् मध्ये **सहजविमलेन** निसर्गतो निर्मलेन **स्वमहसा** स्वप्रकाशेन **विराजन्ते**—विलसन्ति।

हिन्दी अनुवाद—हे वीर ! आपके द्वारा दिये गये दूध से अधिक धवल हीरे, विकसित करील (के फूल) से अधिक कान्तिमान् इन्द्रनीलमणि तथा तोता के मुख के समान लालवर्ण के माणिक्यमणि (मानिक) निर्धनों की छोटी कुटिया में पहुँचकर स्वभाव से विमल अपने (ही) प्रकाश से सुशोभित हो रहे हैं।

टिप्पणी—कुटीरः—ईषत्कुटी कुटीरः (कुटी + रः) सूत्र 'कुटी शमीशुण्डाभ्यो रः ह्रस्वत्वे' **सुनासीरः**—इन्द्रः तन्नाम्ना प्रसिद्धः अश्मा प्रस्तरः इन्द्रनीलमणिरित्यर्थः **करीरः**—वंशाकुरे करीरोऽस्त्री तरुभेदे घटे च नेत्यमरः पत्ररहितस्तरुविशेषः यथोक्तं पत्रं नैव यदा करीरविटपे दोषो वसन्तस्य किम्। शिखरिणीछन्दः अनुप्रासः, **व्यतिरेकः उपमोदात्तश्चैतेषामलंकाराणां संसृष्टिः।**

पुनरपि भगवतो दानवैशिष्ट्यं वर्णयति कविः—

कल्पद्‌माऽरुहकीर्तिकैरववनीमार्त्तण्ड कः पण्डितस्
तादृग्यो विसदण्डपाण्डिमजयोद्दामान् गदेत्त्वद्‌गुणान् ।
रत्नानामयमाकरः किल यदा बद्धस्त्वया वारिधि-
र्दीनेभ्योऽपि तदैव तन्मणितुलाकोटिर्वितीर्णा स्फुटम् ॥१३८॥

माधुरी—हे कल्पक्ष्मारुहकीर्तिकैरववनीमार्त्तण्ड ! कल्पवृक्षस्य कीर्तिरेव कुमुदाटवी तन्नाशकसूर्य ! (उत्तर पद०) **तादृक् कः पण्डितः यः विसदण्डपाण्डिमजयोद्दामान्** विसदण्डो मृणालस्तस्य पाण्डिमा श्वेतता तस्य जयेनोद्दामाः उत्कृष्टास्तान् **त्वद्‌गुणान् गदेत्।** यदा किल वस्तुतो **रत्नानाम्** आकरः खनिः **अयं वारिधिः** समुद्रः **त्वया बद्धः तदैव तन्मणितुलाकोटिः** तस्य कोटिसंख्याकाः मणयः **अपि दीनेभ्यः स्फुटम्** प्रत्यक्षम् **वितीर्णा।** (राजा बद्धस्य धनिनः धननिचयं दीनेभ्यो वितरत्येवेति भावः ।)

हिन्दी अनुवाद—कल्पवृक्ष की कीर्तिरूपी कुमुदवन के विनाशक सूर्य ! हे राम ! वैसा कौन पण्डित है जो मृणाल की धवलिमा को जीतने से गर्वित (अत्युत्कृष्ट) तुम्हारे गुणों को कह सकता है । जब वस्तुतः रत्नों का आकर यह समुद्र तुम्हारे द्वारा बाँध लिया गया तभी उसकी करोड़ों मणियाँ दीनों को सर्वसमक्ष वितीर्ण कर दी गईं ।

टिप्पणी—कल्पक्ष्मारुहकीर्तिकैरववनीमार्त्तण्ड—कल्पक्ष्मारुहाः कल्पवृक्षास्तेषां कीर्तिरेव कैरववनी तस्याः (विनाशकः) सूर्यस्तत्सम्बोधने यथा सूर्योदये कैरवशोभा नष्टा भवति तथैव त्वद्दानोदये कल्पवृक्षाणां कीर्तिर्नष्टा त्वं कल्पवृक्षेभ्योऽप्यधिकतरः इतिभावः **पाण्डिमा**—पाण्डोर्भावः पाण्डु + इमनिच् **शार्दूलविक्रीडितं छन्दः रूपकं व्यतिरेकश्चालंकारौ ।**

दानवर्णनमेव प्रकारान्तरेण कुरुते—

अग्रे पूगकृतानुदञ्चितगुरुच्छायान् प्रयच्छार्थिने
राजन् वज्रवरेन्द्रनीलदिनकृत्कान्तेन्दुकान्तोपलान् ।
एताः किन्न परःशताः करटिनां कोटी र्ददानेन तत्-
कुम्भस्था भवतार्पिता वितरितुं मुक्ताः किमुत्कण्ठसे ॥१३९॥

माधुरी—हे **राजन् ! अग्रे** समक्षम् **पूगकृतान्** राशीकृतान् **उदञ्चितगुरुच्छायान्** उद्गतबहुकान्तीन् **वज्रवरेन्द्रनीलदिनकृत्कान्तेन्दुकान्तोपलान्** हीरकनीलमणिसूर्यकान्त-चन्द्रकान्तमणीन् **अर्थिने** याचकाय **प्रयच्छ। मुक्ताः वितरितुम्** दातुं **किम्** किमर्थम्

उत्कण्ठसे चिन्तयसि। करटिनाम् गजानाम् परःशताः शतशः कोटीः शतकोटिसंख्याकाः इत्यर्थः ददानेन प्रयच्छता भवता तत्कुम्भस्थाः तेषां कुम्भेषु स्थिताः एताः मुक्ताः किम् न अर्पिताः दत्ता एवेतिभावः।

हिन्दी अनुवाद—हे महाराज ! सामने ढेर के रूप में रखी हुई, ऊपर उठती हुई महाकान्ति से युक्त हीरा नीलम सूर्यकान्त एवं चन्द्रकान्त मणियों को याचक को प्रदान करो। मोतियों को देने में क्यों चिन्ता कर रहे हो। सैंकड़ों करोड़ हाथियों को देते हुये आपने उनके मस्तकों में स्थित मोतियों को क्या नहीं दे दिया था। (जब आपने ऐसे मोतियों के सहित अरबों गजों का दान कर दिया तो केवल मोती देने में क्यों सोच करते हो।)

टिप्पणी—पूगकृतान्—पूगः क्रमुमवृन्दयोरितिधरणिः उदञ्चितगुरुच्छायान्—उदञ्चिता गुर्वी छाया सच्छोभा येभ्यस्ते तान् (बहु०) छाया स्यादातपाभावे सच्छोभा प्रतिबिम्बयोः। भासि सूर्यप्रियायां च पालनोत्कोचयोरपीति धरणिः। परःशताः शतेभ्यः पराः श्रीभोजराजस्तु परःशब्दं निपातितं मन्यते शतशः कोटीरित्यर्थः। शार्दूलविक्रीडितं छन्दः उदात्तालंकारः, दानवीररसध्वनिः।

भगवतो दानेन निर्धनानां समृद्धिमाह—

यैःपत्रावचयात्पलाशतरवः शाखावशेषीकृताः
दुर्गत्या स्पृहयाम्बभूवुरिह ये मृद्भाण्डसिद्धान्धसे।
तेषां त्वत्करुणोदयादनुदिनं सम्मार्जनस्फूर्जित-
ज्योतिर्भिर्नवभाजनैरजिरभूराकीर्यते काञ्चनैः ॥१४०॥

माधुरी—यैः पत्रावचयात् पात्राणां त्रोटनात् पलाशतरवः शाखावशेषीकृताः शाखामात्रावशिष्टाः विहिताः। ये इह संसारे दुर्गत्या निर्धनतया मृद्भाण्डसिद्धान्धसे मृदः मृत्तिकायाः भाण्डम् भाजनं तस्मिन् सिद्धं पक्वं यत् अन्धः ओदनस्तस्मै स्पृहयाम्बभूवुः अभिलाषवन्तोऽभूवन्। त्वत्करुणोदयात् तव करुणायाः भावात् तेषाम् निष्किञ्चनानाम् अजिरभूः प्राङ्गणम् अनुदिनम् स्फूर्जितज्योतिर्भिः प्रकटप्रकाशैः काञ्चनैः स्वर्णमयैः नवभाजनैः आकीर्यते संकुलमस्ति। (निर्धनानां गृहेषु त्वया दत्तानि सुवर्णपात्राणि विलसन्तीतिभावः।)

हिन्दी अनुवाद—जिन (निर्धनों) के द्वारा पत्ते तोड़ने से पलाश के वृक्ष शाखामात्रावशिष्ट बना दिये गये थे, जो इस संसार में निर्धनता के कारण मिट्टी के बर्तनों में पके हुये भात के लिये तरसते थे। तुम्हारी करुणा के होने से उन निष्किञ्चनों के आँगन में चमचमाते हुये सोने के बरतन बिखरे पड़े हैं।

टिप्पणी—**दुर्गत्या**—दुर्गतिर्नरके नैःस्वे इति धरणिः **सिद्धान्धसे**—सिद्धं पक्वं यत् अन्धः (कर्म०) भिस्सा स्त्री भक्तमन्धोऽन्नमोदनोऽन्नं संदीदिविरित्यमरः यथा 'द्विजातिशेषेण यदेतदन्धसा' (किरात० प्रथम सर्गे) **अजिरभूः**—अङ्गनं चत्वराजिरे इत्यमरः **शार्दूलविक्रीडितं छन्दः दानवीररसध्वनिः उदात्तालङ्कारः** ।

भगवतो दानोत्साहपूर्वकं दयाभावं व्यनक्ति—

प्रत्यग्रस्थूलमुक्तामणिमुकुलगणः पद्मरागोपलौघ-
ज्योतिःप्रेंखत्प्रवालः स्फुरदमलमहानीलभृङ्गाहितश्रीः ।
दानोत्साहद्रुमस्ते सुखयति करुणावारिणा वर्धितोऽसौ
राजन्नानादिगन्तभ्रमणसमुदयत्खेदभाजोऽर्थिसार्थान् ॥१४१॥

माधुरी—हे राजन् ! ते **प्रत्यग्रस्थूलमुक्तामणिमुकुलगणः** प्रत्यग्राः नवाः स्थूला पुष्टा मुक्तामणयः एव मुकुलानां कलिकानां गणः यस्यसः (बहु०) **पद्मरागोपलौघज्योतिः-प्रेङ्खत्प्रवालः**—पद्मरागोपलानाम् रक्तमणीनाम् ओघः एव ज्योतिः प्रकाशो येषांते तादृशाः प्रेङ्खन्तः चञ्चलाः प्रवालाः किसलयानि यस्य सः (बहु०) **स्फुरदमलमहानीलभृङ्गाहित श्रीः** स्फुरन्तो येऽमलाः महानीलाः नीलमणयः त एव भृङ्गास्तैराहिता आरोपिता श्रीर्यस्मिन् सः (बहु०) **दानोत्साहद्रुमः** दानस्योत्साहः स एव द्रुमो वृक्षः **करुणावारिणा वर्धितः** पोषितः **असौ नानादिगन्तभ्रमणसमुदयत्खेदभाजः** नानादिगन्तेषु परितः भ्रमणेन समुदयन् जायमानो यो खेदस्तं भजन्ते इति (भज् + क्विप्) **अर्थिसार्थान्** याचकवृन्दान् **सुखयति** सुखिनः करोति । कलिकाभिः किसलयैः भृङ्गैश्च युक्तो वृक्षोऽपि पथिकान् सुखयति ।

हिन्दी अनुवाद—हे महाराज ! आपके दान का उत्साह रूप वृक्ष (आपकी ही) करुणा के जल से पोषित हुआ है। नवीन स्थूल मुक्तामणि ही उसकी कलियों का समूह है, लालमणियों (माणिक्यों) के समूह रूप प्रकाश वाले चञ्चल पल्लव उसमें लगे हैं तथा चमकीले निर्मल नीलमणि रूप भ्रमरों के द्वारा उसकी शोभा वृद्धि की गई है। ऐसा वह वृक्ष सभी दिशाओं में भ्रमण से खिन्न याचकों के समूहों को सुखी करता है। (जैसे पुष्पों, पत्तों, फलों तथा भ्रमरों से सुशोभित वृक्ष थके यात्रियों के श्रम को दूर कर उन्हें सुखी करता है तथैव आप भी मुक्ता, माणिक्य तथा नीलम का दान कर अन्यत्र भटके हुये याचकों को सुखी करते हैं यह स्पष्ट भाव है।)

टिप्पणी—**प्रवालः**—वीणादण्डःप्रवालः स्यात्प्रवालः पल्लवोमतः प्रवालो विद्रुमः प्रोक्तः प्रवालो बालकः स्मृतः इति विश्वः **महानीलः**—सिंहलस्याकरोद्भूता महानीलास्तु ते स्मृताः । महानीलो भृंगराजे मणिरागविशेषयोरिति धरणिः । **आहितश्रीः**—आहितं

निहितं न्यस्तमारोपितमिति हलायुधः। अर्थिसार्थान्—अर्थिनां सार्थास्तान् वृन्दभेदे तु सार्थः स्यादित्यमरः। स्रग्धरावृत्तम् रूपकालंकारः दानपुष्टो दयावीरो रसः।

श्रीरामेण सहेतुकम् गजदानमाह—

अविश्रान्तदानैः किमस्माकमेभि-
र्धरित्रीभुजामप्रतिग्राहकाणाम्।
वहत्वर्थिवर्गः परीतोषमेतै-
रितीव त्वमस्मै गजेन्द्रान् ददासि ॥१४२॥

माधुरी—अविश्रान्तदानैः अविश्रान्तम् अखण्डितं दानं मदजलस्रवणं द्रव्यवितरणं वा येषां ते तैः एभिः गजैः अप्रतिग्राहकाणां प्रतिग्रहीतुम् अयोग्यानाम् अस्माकं धरित्री-भुजां क्षत्रियाणाम् किम् किं प्रयोजनम् इत्यर्थः। एतैः गजैः अर्थिवर्गः याचकसमूहः परीतोषम् सन्तोषम् वहतु प्राप्नोतु इतीव इति सम्भावितहेतुना त्वम् अस्मै याचकवृन्दाय गजेन्द्रान् ददासि।

हिन्दी अनुवाद—निरन्तर मद जल गिराने वाले (सदा दान करने वाले) इन हाथियों से दान लेने के अयोग्य हम क्षत्रियों का क्या प्रयोजन है। इन गजों के द्वारा याचक वर्ग सन्तोष प्राप्त करे, मानों इस कारण से आप उनको महागजों को प्रदान करते हो।

टिप्पणी—दानम्—दानं द्रव्यवितरणं मदजलस्रवणं च। क्षत्रियाणां प्रतिग्रह-निषेधोऽस्ति, दातुः भिक्षुकस्य च सम्बन्धः समीचीनः तस्मात्, गजाः अखण्डितदानाः याचकाश्च प्रतिगृहीतारः तेषां यथायोग्यसम्बन्धः इति भावः। भुजङ्गप्रयातं छन्दः हेतूत्प्रेक्षाऽलंकारः।

क्षुद्रायापि विप्राय रामस्य दानं वर्णयति—

येनच्छेदे तरूणामुरुपरशुरुचाऽदीपि दिक्चक्रवालम्
कौशल्येय त्वयोद्यद्बहलदयतया दानपात्रीकृतस्य।
तस्यापि ब्रह्मबन्धोर्विकिरति तरलः पुण्यकर्मण्यजस्रम्
पाणिर्माणिक्यमुक्ताशितिमणिशबलः स्वर्णभूषामयूखान्॥१४३

माधुरी—हे कौशल्येय! कौशल्यानन्दन! येन ब्राह्मणमात्रेण (नाम्ना ब्राह्मणेने-त्यर्थः) तरूणां छेदे कर्तने उरुपरशुरुचा बृहत्कुठारकान्त्या दिक्चक्रवालम्—दिङ्मण्डलम्

अद्यापि प्रदीप्तम्, त्वया भवता उद्यद्बहलदयतया उद्भूतदयाभावेन दानपात्रीकृतस्य तस्य ब्रह्मबन्धोः अपि अजस्रम् निरन्तरम् पुण्यकर्मणि देवार्चनादिषु सत्कार्येषु तरलः चञ्चलः पाणिः माणिक्यमुक्ताशितिमणिशबलः रक्तधवलेन्द्रनीलमणिचित्रितः सन् स्वर्णभूषामयूखान् स्वर्णभूषणकिरणान् विकिरति विक्षिपति । (भवांस्तस्मै क्षुद्रब्राह्मणायापि मणिमाणिक्य-स्वर्णाभरणानि दत्त्वा त सत्कर्मकर्त्तारं विदधातीत्यर्थः ।)

हिन्दी अनुवाद—हे कौशल्यानन्दन राम ! जिस लकड़ी काटने वाले (मूर्ख ब्राह्मण) ने वृक्षों को काटने में बड़े कुठार की कान्ति से सम्पूर्ण दिङ्मण्डल को प्रदीप्त किया था, आपके द्वारा प्रबल दयाभाव से दान का पात्र बनाये गये उस क्षुद्र ब्राह्मण का भी निरन्तर देवपूजन आदि सत्कर्मों में चञ्चल हाथ मानिक मोती तथा नीलमणि से चित्रित होकर सोने के आभूषणों की किरणों को बिखेरता है । (आप उस क्षुद्र काष्ठोप-जीवी ब्राह्मण को भी मणि माणिक्य तथा स्वर्णाभूषण तेकर उसे सत्कर्मो का कर्त्ता बना देते हैं ।)

टिप्पणी—परशुः—परश्वधः कुठारः स्यात्परशुः स्वधितिः समावित्यभिधान-रत्नमालायाम् । **उद्यद्बहलदयतया**—उद्यन्ती या बहला दया (कर्म०) तस्याः भावः 'त्वतलोर्गुणवचनस्य' इतिह्रस्वः । **ब्रह्मबन्धोः**—ब्रह्मबन्धुरधिक्षेपे निदर्शने द्विजाधमे इति धरणिः । **माणिक्यम्**—पक्वदाडिमबीजाभं माणिक्यं शकलेऽपि चेतिधरणिः **शितिमणिः**—इन्द्रनीलमणिः । स्रग्धराछन्दः उदात्तालङ्कारः ।

दानाधिक्यवर्णनं कुरुते—

> **विश्राणनच्युतजलैधितसिन्धुपूरे**
> **मज्जत्यसाविति मतिस्तव वीर मा भूत् ।**
> **त्वद्दत्तशैलसदृशद्विपबद्धसेतु-**
> **र्द्रागस्य पारमुपयात्यखिलार्थिसार्थः ॥१४४॥**

माधुरी—हे वीर ! असौ (याचकसमूहः) विश्राणनच्युतजलैधितसिन्धुपूरे विश्राणने दाने च्युतं यत् जलं तेनैधितो यः सिन्धोः सरितः पूरः प्रवाहस्तस्मिन् मज्जति इति मतिः तव मा भूत् त्वद्दत्तशैलसदृशद्विपबद्धसेतुः त्वया दत्ताः ये शैलसदृशाः द्विपाः तैः बद्धः सेतुर्येन सः (बहु०) अखिलार्थिसार्थः सम्पूर्णयाचकवर्गः द्राक् शीघ्रम् अस्य सरित्प्रवाहस्य पारम् उपयाति ।

हिन्दी अनुवाद—हे वीर ! यह याचकवृन्द दान में गिरे हुये जल से बढ़ी हुई नदी के प्रवाह में डूब रहा है, ऐसा विचार आप न करें । क्योंकि आपके दिये हुए पर्वततुल्य गजों से सेतु बाँधकर सम्पूर्ण याचक वर्ग उस (नदी प्रवाह) के पार जा रहा है ।

टिप्पणी—विश्राणनम्-विश्राणनं विहापितमंहतिरपवर्जनं वितरणं च निर्वापणं च स्पर्शनमुत्सर्गः स्यात्प्रदेशनं दानमिति भट्टहलायुधः । सिन्धुपूरे—सरित्समुद्रयोः सिन्धुरिति विश्वः, पूरस्तु प्रवाहः । अर्थिसार्थः—अर्थिनां सार्थः संघः वृन्दभेदाः समैर्वर्ग-संघसार्थौ तु जन्तुभिरित्यमरः । वसन्ततिलकावृत्तम् अतिशयोक्तिरलंकारः ।

श्रीरामस्य नैसर्गिकीं दानवृत्तिमाह—

वीतप्रत्यूहवित्ताधिगमविलसितोत्साहशाली दिगन्तम्
वेगादाप्नोति नापि क्षिपति रघुपतिः कालमर्थान् प्रदातुम् ।
दत्ते चाश्वानुदीर्णस्यदजितमरुतो वल्लभस्तन्न दूरे
त्वद्भिक्षोःपक्ष्मलाक्षीं वदति विरहिणीं नित्यमित्यालिवर्गः ।१४५।।

माधुरी—[हे राम !] आलिवर्गः सखीसमूहः त्वद्भिक्षोः तव समीपमागतस्य याचकस्य विरहिणीम् वियुक्तां पक्ष्मलाक्षीं प्रेयसीं नित्यम् इति वदति—वीतप्रत्यूहवित्ताधि-गमविलसितोत्साहशाली वीतः प्रत्यूहो यस्मात् स (बहु०) निर्विघ्नः यः वित्तस्याधिगमः धनप्राप्तिस्तेन विलसितो य उत्साहस्तेन शालते शोभते यः स दिगन्तम् सुदूरमित्यर्थः वेगात् आप्नोति गच्छति । रघुपतिः अपि अर्थान् धनानि प्रदातुं कालं न क्षिपति विलम्बं न करोति । उदीर्णस्यदजितमरुतः उद्भटवेगनिर्जितवायून् अश्वान् च दत्ते यच्छति । तत् तस्मात्कारणात् वल्लभः प्रियः दूरे न (अचिरादेवागच्छतीति भावः) ।

हिन्दी अनुवाद—[हे राम !] सखियों का समूह तुम्हारे पास आये हुये याचक की वियोगिनी प्रियतमा को नित्य ही इस प्रकार समझा रहा है—निर्विघ्न-धनलाभ के कारण अत्यधिक उत्साह से सम्पन्न व्यक्ति दिशाओं के छोर तक बड़ी द्रुतगति से पहुँच जाता है । श्रीराम भी (याचक को) धन देने में विलम्ब नहीं करते तथा उत्कट वेग से वायु को जीतने वाले घोड़े प्रदान करते हैं । अतः (तुम्हारे) प्रियतम दूर नहीं हैं (शीघ्र ही आजायँगे ।)

टिप्पणी—उदीर्णस्यदजितमरुतः—उदीर्णो यः स्यदस्तेन जिताः मरुतो यैस्ते (बहु०) पक्ष्मलाक्षीम्—पक्ष्मले—शोभनपक्ष्मयुते अक्षिणी यस्याः सा ताम् (बहु०) स्रग्धरावृत्तम् दातुः प्रतिग्रहीतुश्चोत्साहकथनात् रसवदलङ्कारः ।

श्री रामस्य दानं प्राप्यार्थिनां प्रमोदमाह—

श्रीखण्डैः काकतुण्डैः कुरुत करिवरानाहितोदारभारा-
नारादारादनोभिः कलयत निचयं काञ्चनालंकृतीनाम् ।
राशिः पट्टांशुकानां कथमपि करभैरुह्यतामेष हर्षा-
दित्युच्चैर्भाषमाणः क्षितिप तवगृहान्निःसरत्यर्थिसार्थः ।१४६।।

माधुरी—हे क्षितिप ! राजन् ! एषः अर्थिसार्थः याचकसमूहः हर्षात् इति उच्चैः भाषमाणः तव गृहात् प्रासादात् निःसरति 'करिवरान् श्रीखण्डैः चन्दनैः काकतुण्डैः आहितोदारभारान् आहितः आरोपितः उदारो भारः महाभारो येषु ते तान् (बहु०) कुरुत । काञ्चनालंकृतीनाम् सुवर्णाभूषणानां निचयं समूहं आरात् आरात् समीपे समीपे अनोभिः शकटैः कलयत योजयत । पट्टांशुकानां दुकूलानां राशिः कथमपि करभैः उष्ट्रैः उह्यताम् नीयताम् ।'

हिन्दी अनुवाद—हे महाराज ! याचकों का यह समूह हर्ष से इस प्रकार जोर से बोलता हुआ आपके महल से निकलता है—'श्रेष्ठ हाथियों पर चन्दन तथा अगुरु के बोझ लाद दिये जायँ, स्वर्णाभूषणों के ढेर को पास पास खड़ी हुई गाड़ियों में भर दिया जाय तथा रेशमी वस्त्रों की राशि को किसी तरह ऊँटों पर लादा जाय ।'

टिप्पणी—भारः—भारो वाहनयोग्ययोरिति विश्व. । अनोभिः—क्लीबेऽनः शकटोऽस्त्री स्याद्गंत्री कंबलिवाह्यकमित्यमरः । स्रग्धराच्छन्दः वृत्त्यनुप्रासः दानवीररसध्वनिः ।

श्रीरामस्य दानप्रचुरतां वर्णयति—

राशिः कार्त्तस्वरस्य त्रिदशगिरिगुरुर्दन्तिनोराजदत्ताः
पंकं पृष्ठे पृथिव्याः प्रतिपथमतुलं तन्यते दानतोयैः ।
तत्र प्रस्थाप्य यामः सपदि कथमिमान् भूरिमारोप्य भारम्
चिन्तेति क्ष्माधिप त्वद्वितरणविरतौ मार्गणग्रामणीषु ।१४७।।

माधुरी—हे क्ष्माधिप ! पृथ्वीपते ! त्वद्वितरणविरतौ तव दानस्य विरामे मार्गणग्रामणीषु याचकश्रेष्ठेषु इति चिन्ता (भवतीति शेषः) [यत्] कार्तस्वरस्य सुवर्णस्य राशिः त्रिदशगिरिगुरुः सुमेरोरप्यधिकः राजदत्ताः दन्तिनः गजाः (तेषाम्) दानतोयैः मदजलैः पृथिव्याः पृष्ठे प्रतिपथम् मार्गे अतुलं पंकं तन्यते विस्तार्यते । तत्र मार्गे गजेषु वा भूरिम् भारम् आरोप्य स्थापयित्वा सपदि इमान् गजान् प्रस्थाप्य कथं यामः गच्छामः ?

हिन्दी अनुवाद—हे पृथ्वीपते ! आपका दानकार्य समाप्त होने पर प्रधान भिक्षुकों को यह चिन्ता होती है— '(हमें प्राप्त) स्वर्ण का ढेर सुमेरु पर्वत से भी अधिक भारी है तथा महाराज के द्वारा प्रदत्त हाथी (भी) हैं । (उनके) मदजल से धरती के ऊपर प्रतिमार्ग में अत्यधिक कीचड़ फैल रहा है । ऐसे मार्गों में विपुल बोझ लादकर शीघ्र ही इन हाथियों को भेजकर कैसे (हम लोग) चलें ?'

टिप्पणी—प्रतिपथम्—पन्थाः पन्था इति अच् समासान्तः (अव्ययी०)

मार्गणग्रामणीषु मार्गणानां ग्रामण्यः श्रेष्ठास्तेषु (तत्पु०) मार्गणो याचकार्थिनावित्यमरः ग्रामीणः स्वप्रधाने स्यात्पतिनापितभोगिष्वपिधरणिः । स्रग्धरावृत्तम् अनुप्रासालङ्कारः ।

याचकानां श्रीरामे श्रद्धां श्रीरामस्य परमौदार्यं च व्यनक्ति—

वर्द्धन्तां मेरुपृष्ठे विबुधविटपिनः कामधेनुः स्वयं त-
च्छाये विश्रम्य रोमन्थयतु नतिरियं दूरतो देवताभ्यः ।
यत्रास्ते तत्र चिन्तामणिरपनयतु ध्वान्तमुस्रैरजस्रं
नान्यं विद्मोवदान्यं जगति वयमहो मार्गणा रावणारेः ।१४८॥

माधुरी—अहो ! रावणारेः श्रीरामस्य मार्गणाः याचकाः **वयम् जगति अन्यम्** **अजस्रम्** शाश्वतिकम् **वदान्यम्** दातारम् **न विद्मः** जानीमः । **मेरुपृष्ठे** सुमेरोः उपरि **विबुधविटपिनः** कल्पवृक्षाः वर्द्धन्ताम्, **कामधेनुः** अभीष्टप्रदात्री गौः **स्वयम् तच्छाये** तेषां (कल्पवृक्षाणाम्) घनच्छायायां **विश्रम्य रोमन्थयतु** रोमन्थं करोतु; **देवताभ्यः दूरतः इयं नतिः** अयं प्रणामाञ्जलिः । **चिन्तामणिः** अभिलषितदाता मणिविशेषः **यत्र** यस्मिन् स्थले **आस्ते तत्र उस्रैः** किरणैः **ध्वान्तम्** अन्धकारम् **अपनयतु** दूरीकरोतु । (तेषां दानम् अस्माभिर्न परिग्राह्यम् इतिभावः ।)

हिन्दी अनुवाद—[हे राम ! आपके याचकों का कथन है—] अहो ! श्रीराम के याचक हम लोग विश्व में दूसरे सदा उदार दाता को जानते ही नहीं । सुमेरु पर्वत के ऊपर कल्पवृक्ष बहुत बढ़ें (फूलें फलें), कामधेनु स्वयं उनकी घनी छाया में रोमन्थ (जुगाली) करें; [इन] देवताओं को दूर से ही प्रणाम है । चिन्तामणि जिस स्थान में है वहाँ पर किरणों से अन्धकार को दूर करे । (हमें उनसे कुछ भी नहीं माँगना है । इससे श्री राम की परमोदारता ध्वनित होती है ।)

टिप्पणी—तच्छाये—तेषां छाया (तत्पु०, बाहुल्यार्थे छायाशब्दस्य नपुंसकत्वम्) सूत्र 'छाया बाहुल्ये' (अष्टा० २।४।२२) **रोमन्थयतु**—रोमन्थं चर्वितचर्वणं करोतु रोमन्थ+क्विप् नामधातुप्रयोगः **मार्गणाः**—मार्गणो याचके बाणे याच्ञाऽन्वेषणयोरपीति धरणिः । स्रग्धरावृत्तम् श्रीरामस्य परमौदार्यरूपवस्तुध्वनिः ।

श्रीरामस्य याचकैरितरदानितिरस्कारमाह—

अवधीरितकामधेनुकोटि-
र्धुतचिन्तोपलशैलचक्रवालः ।
नृपते तव मार्गणस्तनोति
त्रिदशानोकहकाननेऽप्यवज्ञाम् ॥१४९॥

माधुरी—हे नृपते ! **अवधीरितकामधेनुकोटिः** अवधीरिताः तिरस्कृताः कामधेनूनां कोटयो येन (बहु०) **धुतचिन्तोपलशैलचक्रवालः** धुतम् तिरस्कृतं चिन्तोपलानां चिन्तामणीनां शैलानां चक्रवालं मण्डलम् येन सः (बहु०) **तव मार्गणः** याचकः **त्रिदशानोकहकानने** त्रिदशानां देवानाम् अनोकहाः वृक्षाः कल्पवृक्षा इत्यर्थ स्तेषां कानने वने **अपि अवज्ञां तनोति** विस्तारयति । (भवदीयमार्गणः कामधेनुचिन्तामणिकल्पवृक्षानपि न गणयतीति भावः ।)

हिन्दी अनुवाद्—हे महाराज ! करोड़ों कामधेनुओं को तिरस्कृत करने वाला, चिन्तामणियों के पर्वतों के समूहों को त्याग देने वाला आपका याचक कल्पवृक्षों के जंगल में भी अपना तिरस्कार भाव फैला रहा है। (आपका याचक उपर्युक्त तीनों दानिशिरोमणियों को कुछ नहीं समझता, यह भाव है ।)

टिप्पणी—**धुतः**—धुतस्तु कम्पिते त्यक्ते इति धरणिः **चक्रवालम्**—पटलं पेटलं चक्रं चक्रवालं तु मण्डलम् । जालं जातं तथा वारव्यूहस्तोमाश्च ते समा इत्यभिधानरत्नमालायाम् । मालभारिणी छन्दः व्यतिरेकालंकारः ।

कल्पवृक्षदानापेक्षया श्रीरामदानस्य वैशिष्ट्यमाह—

ये हृष्यन्ति जलस्य पादपतने ये रागिणः पल्लवे
ये मुञ्चन्त्यविचारितं सुमनसः केनापि नुन्नाः क्षणात् ।
गण्यन्ते प्रथमं पलाशिषु जनैः कल्पद्रुमास्तेषु ये
कीदृग्देव भवेत् त्वदीय इव तद्दाने विवेकोदयः ॥१५०॥

माधुरी—हे देव ! ये (वृक्षाः) **जलस्य पादपतने** पादेषु मूलेषु पतने **हृष्यन्ति** हर्षिताः भवन्ति ये **पल्लवे** नवीनपत्रे **रागिणः** रक्ताः [भवन्ति], ये **केनापि** मयूरेणापि **नुन्नाः** प्रहृताः सन्तः **क्षणात्** शीघ्रमेव **अविचारितम्** विचारम् अकृत्वा **सुमनसः** पुष्पाणि **मुञ्चन्ति** । तेषु **पलाशिषु** वृक्षेषु ये **कल्पवृक्षाः प्रथमं** मुख्याः **गण्यन्ते** (ते अविवेकिनः कल्पवृक्षाः दातारो भवन्तु नाम परम्) **त्वदीये** तव (दाने) **इव तद्दाने** तेषाम् अविवेकिनां दाने **विवेकोदयः** ज्ञानस्य प्राप्तिः **कीदृक् भवेत्** स्यात् (अविवेकिनां दानं हस्तिस्नानमिवायथायोग्यमित्यर्थः ।) [कल्पवृक्षाः अविवेकिनः सन्ति अविवेकिनः पुरुषाः अपि डलयोरभिन्नत्वात् जडस्य पादपतने पादप्रहारे हृष्यन्ति, पल्लवे—धूर्ते रागिणः—प्रीतियुक्ताः भवन्ति केनाऽपि नुन्नाः पीडिताः (सन्तः) अविचारितं सुमनसः—देवान् मुञ्चन्ति पलाशिषु राक्षसेषु ये प्रथमं गण्यन्ते तेषां दानमपि ज्ञानविरहितं स्यात् इत्युभयेषां साम्यम् ।]

हिन्दी अनुवाद—हे देव ! जो (वृक्ष) जड़ों में जल गिरने पर प्रसन्न होते हैं,

जिनके नये किसलय लाल होते हैं, जो मयूर के द्वारा भी प्रहार किये जाने पर अतिशीघ्र बिना बिचारे फूलों को छोड़ देते हैं; उन वृक्षों में जो कल्पवृक्ष मुख्य माने जाते हैं, आपके दान के समान उन (विवेकहीन कल्पवृक्षों) के दान में ज्ञान की प्राप्ति कैसे हो सकती है (अविवेकी जनों का दान हाथी के स्नान की तरह विचारशून्य होता है।) [कल्पवृक्ष अविवेकी हैं, मूर्ख भी जड़ पुरुष के द्वारा लात मारने पर प्रसन्न होते हैं, धूत से प्रेम करते हैं, जिस किसी से भी पीड़ित होने पर देवों को (भी) छोड़ देते हैं, जो राक्षसों में मुख्य कहे जाते हैं। अतः उनका दान भी विवेकहीन होगा इस प्रकार दोनों तुल्य विशेषण वाले हैं।]

टिप्पणी—पादपतने—पादाः वृक्षमूलानि चरणाश्च **पल्लवः** पल्लवः स्यात्किशलये धूर्त्तशृङ्गारयोरपीति धरणिः। **केनापि** को ब्रह्मणि समीरात्मयमदक्षेषु **भास्करे।** मयूरेऽग्नौ च पुंसि स्यात्सुखशीर्षबलेषु कम्। **नुन्नाः**—नुद्+क्त। **सुमनसः**—देवाः लिङ्गव्यत्ययेन सुमनांसि—पुष्पाणि। **शार्दूलविक्रीडितं छन्दः, श्लेषालङ्कारः।**

श्रीरामेण सुमेरुपर्वतदानाशंकामभिव्यनक्ति—

दास्यत्येष सुपर्वपर्वतमिति श्रुत्वाऽन्यभूपस्तवम्
व्यक्तं नः प्रहसन्ति वन्दिन इह ख्याता मृषाभाषिणः।
शङ्कन्ते भवतः स्वयं सुरगणाः स्वर्णाद्रिविश्राणनम्
रक्षोराजि हते यतः प्रणमते भ्रात्रेऽस्य लङ्काऽर्पिता ॥१५१॥

माधुरी—**सुरगणाः एषः सुपर्वपर्वतम्** सुपर्वणां देवानां पर्वतम् सुमेरुं **दास्यति** इति **अन्यभूपस्तवम् श्रुत्वा इह** पृथिव्यां **वन्दिनः** भट्टाः **मृषाभाषिणः** असत्यवक्तारः **ख्याताः** प्रसिद्धाः इति **नः** अस्मान् **व्यक्तं** स्पष्टं **प्रहसन्ति।** (अस्मत्कृतां स्तुतिमश्रुत्वाऽपि) **स्वयं भवतः स्वर्णाद्रिविश्राणनं** सुमेरुदानं **शङ्कन्ते,** यतः **रक्षोराजि** रक्षसां राट् रावणस्तस्मिन् **हते अस्य प्रणमते** नम्राय **भ्रात्रे** बिभीषणाय **लङ्का अर्पिता** दत्ता।

हिन्दी अनुवाद—देवता 'ये सुमेरु पर्वत का दान करेंगे' ऐसी अन्य राजा की स्तुति सुनकर, 'इस पृथ्वी में बन्दीजन असत्य बोलते हैं।' वह कहते हुये हम लोगों का स्पष्ट ही उपहास करते हैं [तथा बिना हमारी स्तुति को सुने ही] स्वयं आपके द्वारा सुमेरु के दान की आशङ्का करते हैं। क्योंकि [आपने] राक्षसराज रावण के मारे जाने पर उसके प्रणाम करते हुये भाई बिभीषण को [स्वर्णमयी] लङ्का दे दी थी।

टिप्पणी—**सुपर्वपर्वतम्**—अमरा निर्जरा देवास्त्रिदशा विबुधाः सुरा सुपर्वाणः इत्यमरः तेषां पर्वतस्तम्। **रक्षोराजि**—रक्षसां राट् (राज्+क्विप्) तस्मिन्। **शार्दूलविक्रीडितं छन्दः उदात्तालङ्कारः।**

श्रीरामस्य मेघापेक्षया वैशिष्ट्यमाह—

औदार्यं कियदम्बुदस्य वलते भूतिः कियत्यस्य वा
पाण्डुर्योऽनुशयेन भाति करकाभावोऽपि यस्य क्षणात् ।
वृष्ट्या केवलयाऽम्भसोऽप्यविरतं जाम्बूनदं वर्षता
लक्ष्म्या जुष्टपदाम्बुजेन स कथं श्रीराम तुल्यस्त्वया ॥१५२॥

माधुरी—श्रीराम ! अम्बुदस्य कियत् औदार्यम् वा अस्य भूतिः सम्पत्तिः कियती वलते वर्धते, केवलया अम्भसः जलस्य वृष्ट्या अनुशयेन पश्चात्तापेन पाण्डुः श्वेतो भाति भवति यस्य क्षणात् करकाभावः वर्षोपलाभावः मृत्पात्राणाम् अभावः अपि जायते सः मेघः अपि अविरतं निरन्तरं जाम्बूनदं सुवर्णं वर्षता ददता लक्ष्म्या जुष्टपदेन सेवित-चरणारविन्देन त्वया कथं तुल्यः ।

हिन्दी अनुवाद—श्री राम जी ! मेघ में कितनी उदारता या महत्ता है अथवा इसकी सम्पत्ति ही कितनी बढ़ती है, जो केवल जल की वर्षा कर पश्चात्ताप से श्वेतवर्ण का हो जाता है तथा क्षण भर की (वर्षा से) ही जिसमें उपलों का अभाव (अथवा क्षणभर दान से मिट्टी के बरतनों का (भी) अभाव हो जाता है) वह मेघ भी, निरन्तर स्वर्ण का दान करते हुये, लक्ष्मी जी से सेवित चरणारविन्द वाले तुम्हारे समान कैसे हो सकता है ?

टिप्पणी—औदार्यम्—उदारस्य भावः (उदार + ष्यञ्) उदारो दातृमहतोरिति धरणिः । अनुशयः—अनुशयश्च विद्वेषे पश्चात्तापानुबन्धयोरितिधरणिः करकाभावः-करकाणाम् अभावः करकस्तु वर्षोपले मृत्पात्रविशेषे (करवा) नारिकेलफले कमण्डलौ च प्रयुज्यते । शार्दूलविक्रीडितं छन्दो व्यतिरेकालङ्कारः ।

इति दानवर्णना समाप्तिगात् ।

अथ श्रीरामस्य देवकुलादिवर्णना

श्रीरामेण निर्मितदेवालयानां पर्वतेभ्योऽपि समुन्नतिमाह—

यदोड्डीय यान्तोऽप्यधस्तस्थुरेते
त्वदुत्थापितेभ्यः सुरेन्द्रालयेभ्यः ।
तदा जातलज्जाः पयोधौ ममज्जु-
र्विलक्षा कुतः पक्षरक्षा गिरीणाम् ॥१५३॥

माधुरी—[हे राम !] यदा उड्डीय उत्पत्य यान्तः गच्छन्तः अपि एते पर्वताः त्वदुत्थापितेभ्यः त्वया उच्चैः कारितेभ्यः सुरेन्द्रालयेभ्यः देवमन्दिरेभ्यः अधः एव तस्थुः (ऊर्ध्वं गन्तुं न समर्थाः अभवन् तदा जातलज्जाः लज्जिताः विलक्षाः विस्मिताः (सन्तस्ते) पयोधौ समुद्रे ममज्जुः मग्नाः अभवन् गिरीणां पक्षरक्षा कुतः (इन्द्रेण पक्षच्छेदभयात् सपक्षाः पर्वताः पक्षरक्षार्थं समुद्रं गतास्तन्न सत्यमिति भावः ।)

हिन्दी अनुवाद—[हे राम !] जब ऊँचे उड़कर जाते हुये भी ये पर्वत आपके द्वारा बनवाये गये देवालयों से नीचे ही स्थित रहे (मन्दिरों से ऊपर न जा सके ।) तब लज्जित तथा विस्मित होकर वे समुद्र में डूब गये । (इन्द्र के द्वारा पंख काटे जाने के भय से पंखों की रक्षा के लिये मैनाक आदि पर्वत समुद्र में गिरे थे यह कथा सत्य नहीं है ।)

टिप्पणी—जातलज्जाः—जाता लज्जा येषु ते (बहु०) विलक्षाः—विलक्षो विस्मयान्वितःइत्यमरः । पक्षरक्षा—पक्षाणां रक्षा (तत्०) पार्श्वे वर्गे बले पक्षो मासार्धे गृहसाध्ययोः । पक्षो विरोधे देहाङ्गे सहाये राजकुंजरे इति हैमः । शार्दूलविक्रीडितं छन्दः काव्यलिङ्गमलङ्कारः देवालयमहोच्चतारूपवस्तुध्वनिः ।

श्रीरामनिर्मितदेवालयेषु दीपज्योतिषा सह धूपधूमस्य वर्णनं करोति—

त्वद्वृन्दारकमन्दिरेषु सुरभिस्नेहप्रदीपार्चिषा-
मुन्मेषैरपनीयमानतिमिरस्तोमेष्वपि क्ष्मापते !
कर्पूरागुरुगन्धसारविलसत्सौरभ्यलोभभ्रमद्-
भृङ्गौघैः सह धूपधूमनिकरः स्फारान्धकारायते ॥१५४॥

माधुरी—हे क्ष्मापते ! भूपाल ! त्वद्वृन्दारकमन्दिरेषु तव देवालयेषु सुरभिस्नेहप्रदीपार्चिषाम् सुगन्धिघृतदीपज्वालानाम् उन्मेषैः प्रकाशैः अपनीयमानतिमिरस्तोमेषु दूरीक्रियमाणान्धकारसमूहेषु अपि कर्पूरागुरुगन्धसारविलसत्सौरभ्यलोभभ्रमद्-भृङ्गौघैः कर्पूरः अगुरुः गन्धसारः चन्द्रनम् चेत्येतेषु विलसत् यत् सौरभ्यम् तस्य लोभेन भ्रमतां भृङ्गाणाम् ओघाः समूहास्तैः सह धूपधूमनिकरः धूपस्य धूमस्य निकरः समूहः स्फारान्धकारायते महान्धकार इवाचरति ।

हिन्दी अनुवाद—हे भूपाल ! आपके देवमन्दिरों में सुगन्धित घृत के दीपकों की ज्योति के प्रकाशपुञ्ज से अन्धकार के समूह के दूर किये जाने पर भी कपूर, अगर तथा चन्दन में विलसित सुगन्ध के लोभ से मँड़राते हुये भ्रमरों के समूहों के साथ धूप के धुयें का समूह महान् अन्धकार जैसा हो जाता है ।

टिप्पणी—वृन्दारकमन्दिरेषु—वृन्दारकाणां मन्दिराणि तेषु वृन्दारका देवतानि पुंसि वा देवतास्त्रियाम् इत्यमरः। स्फारान्धकारायते—स्फारो घनीभूतो योऽन्धकारः स इवाचरति (स्फारान्धकार + क्यङ्) शार्दूलविक्रीडितं छन्दः उदात्तालंकारः।

श्रीरामस्य देवालयस्येन्द्रनीलमणिमये कलशे हंसभ्रममाह—

देवागारे त्वदीये शशिमणिशकलैः केवलैः कल्पितेऽस्मिन्
मौलिन्यस्तः सुरेन्द्रोपलमयकलशस्तत्किरत्यंशुजालम्।
यस्मिन्नापत्य नित्यं गगनगतिवशात्कोऽपि केलीमरालः
कालिन्दीवारिबुद्ध्या तरितुमभिलषत्यग्रतो न प्रयाति ।।१५५।।

माधुरी—[हे महाराज!] **केवलैः शशिमणिशकलैः** चन्द्रकान्तमणिभिः **कल्पिते** निर्मिते **त्वदीये अस्मिन् देवागारे मौलिन्यस्तः** मौलौ शिखरे न्यस्तः स्थापितः (तत्०) **सुरेन्द्रोपलमयकलशः** इन्द्रनीलमणिनिर्मितः कलशः **तत् अंशुजालम्** किरणसमूहं **किरति** विस्तारयति। **यस्मिन् गगनगतिवशात्** आकाशचरत्वात् **कोऽपि केलीमरालः** क्रीडाहंसः **नित्यम् आपत्य** आगत्य **कालिन्दीवारिबुद्ध्या** यमुनाजल मत्वा **तरितुम् अभिलषति** इच्छति [परं जलाभावेन निराधारत्वात्] **अग्रतः न प्रयाति** गन्तुम् अशक्तो भवतीत्याशयः।

हिन्दी अनुवाद—[हे महाराज!] केवल चन्द्रकान्तमणियों से निर्मित आपके इस देवमन्दिर में शिखर में स्थापित इन्द्रनीलमणिनिर्मित कलश वैसे किरण-समूह का विस्तार करता है, जिसमें आकाशगामी होने से कोई क्रीडाहंस नित्य आकार यमुना का जल समझकर तैरने की इच्छा करता है [परन्तु जल न होने से तथा निराधार होने के कारण] आगे नहीं जा पाता।

टिप्पणी—**सुरेन्द्रोपलमयकलशः**—सुरेन्द्रोपलः इन्द्रनीलमणिस्तस्यविकारस्तेन निर्मितो वा (सुरेन्द्रोपल + मयट्) स्रग्धरावृत्तम्, भ्रान्तिमानलंकारः।

श्रीरामस्य नगरे शिवालयं वर्णयति—

प्रासादस्तव पत्तने पशुपतेर्यो निर्मितो हेमभि-
र्मौलौ तस्य नवप्रवालरुचिरा याऽभूत्पताका पुरा।
साऽदृश्याऽजनि पद्मरागकलशच्छायाविलासैरलम्
बद्धाऽन्या धवला तयाऽनुविदधे बन्धूकपुष्पच्छदः ।।१५६।।

माधुरी—[हे राम] तव पत्तने नगरे हेमभिः स्वर्णैः निर्मितः यः पशुपतेः शिवस्य प्रासादः मन्दिरम्, तस्य मौलौ शिखरे पुरा या नवप्रवालरुचिरा प्रवालवद्रक्तवर्णा पताका अभूत्; सा पद्मरागकलशच्छायाविलासैः पद्मरागमणिमयकलशकान्तिशोभया अलम् अदृश्या पूर्णरूपेण अदर्शनीया अजनि जाता। अन्या धवला श्वेता बद्धा तया बंधूकपुष्पच्छदः बन्धूकपुष्पवद्रक्तपटः अनुविदधे अनुहृतः।

हिन्दी अनुवाद—[हे राम !] तुम्हारे नगर में स्वर्णनिर्मित जो शिव जी का मन्दिर है, उसके शिखर में जो नये मूँगे के समान लाल वर्ण की सुन्दर पताका थी; वह पद्मरागमणिनिर्मित कलश की कान्ति की शोभा से पूर्ण रूप से अदृश्य हो गई। दूसरी श्वेत पताका बँधी थी उसने भी दुपहरिया पुष्प के समान लाल वस्त्र का अनुहार किया (वह भी लाल हो गई।)

टिप्पणी—प्रासादः—हर्म्यादि धनिनां वासः प्रासादो देवभूभुजामित्यमरः। शार्दूलविक्रीडितं छन्दः उपमालङ्कारः।

श्री रामेण निर्मितस्य विष्णुमन्दिरस्य शोभां वर्णयति—

स्यादेतद्धवलं विनैव सुधयेत्युक्ते नृपाल त्वया
विष्णोर्वेश्म दिवाकराश्मपटलैर्यत्कल्पितं शिल्पिभिः।
नित्यं सन्निहितस्य दानवरिपोरुद्दामदेहच्छवि-
प्राग्भारच्छुरणाद्गरुत्मदुपलैः क्लृप्तं तदाख्यायते ॥१५७॥

माधुरी—हे नृपाल ! 'एतत् सुधया विना एव धवलं स्यात्' इति त्वया उक्ते शिल्पिभिः कारुभिः विष्णोः यद् वेश्म मन्दिरं दिवाकराश्मपटलैः सूर्यकान्तमणिसमूहैः कल्पितम् निर्मितम् तद् नित्यं सन्निहितस्य सदा समीपवर्तिनः दानवरिपोः विष्णोः उद्दामदेहच्छविप्राग्भारच्छुरणात् उद्दामा या देहस्य छविस्तस्याः प्राग्भारः आधिक्यं तस्य छुरणं मिलनं तस्मात् [जनैः] गरुत्मदुपलैः मरकतमणिभिः क्लृप्तम् रचितम् (इति) आख्यायते कथ्यते।

हिन्दी अनुवाद—हे भूपाल ! 'यह चूना के बिना ही सफेद हो।' ऐसा तुम्हारे कहने पर शिल्पियों (मिस्त्रियों) के द्वारा भगवान् विष्णु का जो मन्दिर सूर्यकान्तमणियो के समूहों से बनाया गया था वह सदा समीप स्थित नारायण (विष्णु) की उत्कट श्याम वर्ण की देहकान्ति की प्रचुरता के मिलने से [मनुष्यों के द्वारा] श्याम हरित (मरकत) मणियों से निर्मित कहा जाता है। (श्वेतमणि निर्मित मन्दिर मरकतमणि का लगता है।)

टिप्पणी—शिल्पिभिः—तक्षा च तन्तुवायश्च नापितो रजकस्तथा। पञ्चम-

श्चर्मकारश्च कारवः शिल्पिनो मताः। इति हैमः। गरुत्मदुपलैः—गारुत्मदं मरकत-मश्मगर्भोहरिन्मणिरित्यमरः। शार्दूलविक्रीडितं छन्दः विभावनाऽलंकारः।

श्री रामस्य दुर्गामन्दिरे श्वेतमणिरचितं सिंहं वर्णयति—

अगारे दुर्गायास्तव पुरि सुधारोचिरुपल-
प्रणीतः पारीन्द्रः प्रशमयतु विश्वप्रतिभयम्।
यमालोक्य व्यालं विरतदमनक्लेशमुदिता
विशेषादर्चन्ति प्रतिदिवसमाधोरणगणाः ॥१५८॥

माधुरी—[हे राम !] तव पुरि नगरे **दुर्गायाः अगारे** मन्दिरे **सुधारोचिरुपल-प्रणीतः** श्वेतमणिनिर्मितः **पारीन्द्रः** सिंहः **विश्वप्रतिभयम्** विश्वस्य सङ्कटम् **प्रशमयतु** नाशयतु। **व्यालं** दुष्टगजं **यम् आलोक्य** दर्शयित्वा **विरतदमनक्लेशमुदिताः** विरतः दमनस्य क्लेशो येषां ते (बहु०) ते च मुदिताः (कर्म०) आधोरणगणाः हस्तिपकाः (तम्) प्रतिदिवसं **विशेषात् अर्चन्ति** पूजयन्ति।

हिन्दी अनुवाद—[हे राम !] आपके नगर में श्री दुर्गा जी के मन्दिर में स्फटिक मणि से निर्मित सिंह विश्व के सङ्कट को दूर करे। दुष्ट गज को जिसे दिखलाकर (हाथियों के) दमन करने के क्लेश से रहित तथा प्रसन्न हुये महावत लोग प्रतिदिन विशेष रूप से उस (सिंह) की पूजा करते हैं।

टिप्पणी—सुधारोचिरुपलप्रणीतः—सुधायाः रोचिरिव रोचिर्यस्य स तादृश उपलः—मणिस्तेन प्रणीतो निर्मितः **व्यालम् गजं यम् आलोक्य**—यम् सिंहं दर्शयित्वा '**दृशेश्च**' (गतिबुद्धि अष्टा० सूत्रोपरि वार्तिकम्) इति व्यालम् इत्यस्य कर्मत्वम् यद्यप्यत्र दृश् धातुर्नास्ति तथाऽपि 'अर्थनिबन्धनेयं संज्ञा' इत्याश्रित्यात्रापि कर्मसंज्ञा भवति **आधोरणाः**—आधोरणा हस्तिपका हस्त्यारोहा निषादिनः इत्यमरः। **शिखरिणीछन्दः** वृत्यनुप्रासालङ्कारः।

श्री रामेण स्थापितां गणेशप्रतिमां वर्णयति—

नवपद्मरागसद्मनि द्विरदाननस्य तावके
प्रतिमा नरेश पत्तने स्फटिकोपलेन निर्मिता।
बहलेन रक्तरेणुनाच्छुरितेति पूजने जनैः
स्नपिताऽपि तोयधारयाऽधिकमेव लोहितायते ॥१५९॥

माधुरी—हे नरेश ! तावके तव पत्तने नगरे नवपद्मरागसद्मनि नवीनारक्त-मणिमन्दिरे स्फटिकोपलेन स्फटिकमणिना निर्मिता द्विरदाननस्य गणेशस्य प्रतिमा मूर्तिः बहलेन प्रचुरेण रक्तरेणुना सिन्दूरेण छुरिता लिप्ता इति हेतोः पूजने जनैः तोयधारया जलधारया स्नपिता प्रक्षालिता अपि [पद्मरागकान्त्या] अधिकम् एव लोहितायते रक्तवर्णा भवति ।

हिन्दी अनुवाद—हे महाराज ! आपके नगर में नवीन पद्मराग के मन्दिर में स्फटिकमणि से निर्मित गणेशजी की मूर्ति 'प्रचुर सिन्दूर से लिप्त है' इस कारण पूजन-काल में मनुष्यों के द्वारा जल की धारा से प्रक्षालित होने पर भी [पद्मराग की कान्ति से] अधिक लाल वर्ण की हो जाती है ।

टिप्पणी—**रक्तरेणुना**—रक्तरेणुस्तु सिन्दूरे पलाशे कलिकोद्गमे इति मेदिनी सिन्दूरं रक्तरेणुश्चेति धन्वन्तरीयनिघण्टौ । **लोहितायते**—अलोहिता लोहिता भवतीति लोहिता + क्यष् सूत्र 'लोहितादिडाज्भ्यः क्यष्' (अष्टा० ३।१।१३) तथा 'वा क्यषः' (अष्टा० १।३।९०) सूत्रेण विकल्पेनात्मनेपदम् । [इयं मूर्तिः सिन्दूरलिप्ता इति भ्रमेण जलधारया धौता सती स्फटिकपाषाणस्य धावनादधिकरक्ता भवति ।] छन्दः भ्रान्तिमान् विशेषोक्तिश्चालंकारौ ।

श्रीरामेण निर्मितस्य सूर्यमन्दिरस्य वर्णनं करोति—

दृष्ट्वा भानोरगारं तव पुरि परितो जाज्वलच्चित्ररत्न-
ज्योतिर्ध्वस्तान्धकारं हृदि निखिलजनस्योदयत्येष तर्कः ।
अस्मद्वंश्येन राज्ञा रचितमिदमिह प्रीतये नः किलेति-
भ्रान्त्वाकाशेचिरायक्षपयतिभगवान्यामिनीमत्र मित्रः ।१६०।।

माधुरी—[हे राम !] तव पुरि नगरे परितः सर्वतः जाज्वलच्चित्ररत्नज्योतिर्ध्वस्तान्धकारं जाज्वलन्ति अतिशयेन दीप्यमानानि यानि रत्नानि तेषां ज्योतिषा प्रकाशेन ध्वस्तोनष्टोऽन्धकारो यस्मिन् तत् (बहु०) भानोः सूर्यस्य अगारं मन्दिरं दृष्ट्वा निखिल-जनस्य हृदि एषः तर्कः विचारः उदेति भवति 'अस्मद्वंश्येन सूर्यकुलोत्पन्नेन राज्ञा रामेण किल नः प्रीतये प्रसन्नतायै इह इदं मन्दिरं रचितम् इति हेतोः, भगवान् पूज्यः मित्रः सूर्यः आकाशे चिराय चिरकालं भ्रान्त्वा भ्रमणं कृत्वा अत्र यामिनीं रात्रिं क्षपयति व्यतीतां करोति ।

हिन्दी अनुवाद—[हे राम !] आपके नगर में सब ओर अत्यन्त प्रदीप्त रत्नों के प्रकाश से विनष्ट अन्धकार वाले सूर्य के मन्दिर को देखकर सभी जनों के हृदय में यह विचार उत्पन्न होता है—'हमारे (सूर्य के) वंश में उत्पन्न महाराज [राम] के द्वारा

निश्चय ही हमारी प्रसन्नता के लिये यहाँ पर यह मन्दिर निर्मित किया गया है इस कारण भगवान् सूर्य आकाश में चिरकालपर्यन्त भ्रमण कर यहाँ पर रात्रि व्यतीत करते हैं।'

टिप्पणी—जाज्वलन्ति-√ज्वल्+यङ् तस्य लुक्+शतृ (प्र०ब०व०) **भगवान् मित्रः**—भगवान् सुगते पूज्ये इति धरणिः, बुध्नो हंसः खगो मित्रश्चित्रभानुरहर्पतिरित्यभिधानरत्नमालायाम्। **स्रग्धरावृत्तम्, काव्यलिङ्गमलंकारः।**

इति देवकुलादिवर्णना समाप्तिमगात्।

अथ श्रीरामस्य तडागादिवर्णना

श्रीरामसरोवरस्य शोभां वर्णयति—

सुरेन्द्रासुरेन्द्रप्रयासेन लक्ष्मीः
कदाचित्पुरा सागरादाविरासीत्।
दलत्पद्मसौरभ्यलुभ्यत्षडंघ्रिः
प्रतिप्रातरुज्जृम्भते त्वत्सरोभ्यः ॥१६१॥

माधुरी—पुरा प्राचीनकाले **कदाचित् सुरेन्द्रासुरेन्द्रप्रयासेन** देवदैत्यराजयत्नेन **समुद्रात् लक्ष्मीः आविरासीत्** प्रकटीभूता। **दलत्पद्मसौरभ्यलुभ्यत्षडंघ्रिः** विकसत्कमलेषु सौरभ्यलुब्धमधुकरा [सा लक्ष्मीः] **त्वत्सरोभ्यः** तव तडागेभ्यः **प्रतिप्रातः** प्रतिदिनं प्रातःकाले **उज्जृम्भते** वर्धते। (समुद्रात्त्वत्सरांसि श्रेष्ठानीत्याशयः।)

हिन्दी अनुवाद—प्राचीनकाल में कभी एकबार देवेन्द्र तथा दैत्येन्द्र के संयुक्त प्रयत्न से समुद्र से लक्ष्मी प्रकट हुई थी। विकसित कमलों की सुगन्ध से लुब्ध मधुकरों से युक्त [वह लक्ष्मी] आपके तालाबों से प्रत्येक प्रातःकाल प्रस्फुटित होती है। (समुद्र से आपके तालाब श्रेष्ठ हैं, यह आशय है।)

टिप्पणी—कदाचित्—एकवारमित्यर्थः **प्रतिप्रातः**—प्रातः प्रातः इति (अव्य०) **दलत्पद्मसौरभ्यलुभ्यत्षडंघ्रिः** दलतां पद्मानां सौरभ्येण लुभ्यन्तः षडंघ्रयः यस्यां सा (बहु०) दिवसे सरोजेषु लक्ष्मीः वसति रात्रौ चन्द्रमसि प्रातःकाले सूर्यकिरणसम्पर्कात् कमलेषु फुल्लेषु सा स्फुटीभवति। **भुजङ्गप्रयातं छन्दः, श्रीरामतडागश्रेष्ठता व्यङ्ग्या। दलत्पद्मिनीखण्डखेलत्षडंघ्रिरिति** पाठान्तरम्, अर्थे तु न विशेषः।

तडागानां समुद्ररूपत्वं हेतुपुरस्सरं साधयति—

नृप त्वन्निदेशप्रणीतैः सरोभि-
र्गतार्थं स्थलीकर्तुमब्धिर्विधिर्यान् ।
इह क्ष्माभृतः क्षिप्तवान्मन्दमेधा
जनो मन्यते पक्षरक्षार्थिनस्तान् ॥१६२॥

माधुरी—हे नृप ! त्वन्निदेशप्रणीतैः तवादेशेन निर्मितैः सरोभिः गतार्थम् प्रयोजनरहितम् (व्यर्थम्) अब्धिम् समुद्रम् स्थलीकर्तुम् समीकर्तुम् विधिः ब्रह्मा यान् क्ष्माभृतः पर्वतान् इह समुद्रतलेषु क्षिप्तवान् अपातयत्, मन्दमेधाः मूर्खः जनः तान् पक्षरक्षार्थिनः पक्षरक्षार्थं समुद्रं गतान् मन्यते जानाति ।

हिन्दी अनुवाद—हे महाराज ! आपकी आज्ञा से निर्मित तालाबों के द्वारा निष्प्रयोजन (व्यर्थ) किये गये समुद्र को सम करने के लिये ब्रह्मा ने जिन पर्वतों को समुद्र में फेंक दिया था मूर्खजन उनको पक्ष बचाने के लिये समुद्र में गये हुये मानते हैं (इन्द्र ने पर्वतों के पंख काटना प्रारम्भ किया था उससे त्रस्त मैनाक आदि पर्वत समुद्र में गिर गये थे । यह कथा पुराणों में प्रसिद्ध है ।)

टिप्पणी—गतार्थम्—गतः अर्थः यस्य सः तम् (बहु०) **मन्दमेधाः**—मन्दामेधा यस्य सः (बहु०) 'नित्यमसिच् प्रजामेधयोः' (अष्टा० ५।४।१२२) इत्यत्र नित्यग्रहणात् अन्यतोऽप्यसिच् इत्यसिच् समासान्तः । भुजंगप्रयातं छन्दः उत्प्रेक्षाऽलंकारः ।

शरदि हंसानां तडागाश्रयणमाह—

गतो मानसेऽस्माकमम्भोधरर्तु-
र्न संलक्ष्यते तत्र युष्मद्गुणश्रीः ।
घनान्ते रुतच्छद्मनेत्यालपन्तः
सरांसि त्वदीयानि हंसाः श्रयन्ते ॥१६३॥

माधुरी—[हे राम !] हंसाः घनान्ते शरदृतौ रुतच्छद्मना स्वशब्दव्याजेन 'मानसे मानसरोवरे अस्माकम् अम्भोधरर्तुः वर्षर्तुः गतः व्यतीतः तत्र युष्मद्गुणश्रीः युष्माकं (तडागानां) गुणानां श्रीः शोभा (बहु०) न संलक्ष्यते दृश्यते ।' इति आलपन्तः कथयन्तः, त्वदीयानि तव सरांसि श्रयन्ते ।

हिन्दी अनुवाद—[हे राम !] हंस, शरद ऋतु में अपनी ध्वनि के बहाने मान सरोवर में [रहते हुये] हमारी वर्षा ऋतु व्यतीत हो गई, वहाँ पर तुम्हारे

(गंभीरता, पवित्रता इत्यादि) गुणों की शोभा नहीं दिखाई पड़ती है।' इस प्रकार बोलते हुये, तुम्हारे सरोवरों का आश्रय लेते हैं।

टिप्पणी—**अम्भोधरर्तुः**—अम्भोधरस्य मेघस्य ऋतुः (ष० तत्०) रुतच्छद्मना—रुतस्य छद्मना—व्याजेन (ष० तत्०) भुजंगप्रयातं छन्दः अपह्नुतिरलङ्कारः।

पुनरपि तडागवर्णनं क्रियते—

अपेयैः पयोदार्पितैः क्षारसिन्धोः
पयोभिर्विवृद्धिर्न साधीयसी नः!
निजैरम्बुभिः पूरितानामितीमे
परीवाहिनः प्रावृषि त्वत्तडागाः ॥१६४॥

माधुरी—[हे राम !] **इमे त्वत्तडागाः** तव सरांसि '**पयोदार्पितैः** मेघदत्तैः **क्षारसिन्धोः** लवणसमुद्रस्य **अपेयैः** पातुम् अयोग्यैः **पयोभिः** जलैः **विवृद्धिः** विशिष्टा वृद्धिः **निजैः अम्बुभिः पूरितानाम् नः** अस्माकं **साधीयसी** समीचीना **न**।' **इति** हेतोः **प्रावृषि** वर्षर्तौ **परीवाहिनः** जलत्यागिनः (भवन्तीति शेषः।)

हिन्दी अनुवाद—[हे राम] आपके ये तालाब 'मेघ के द्वारा दिये गये खारे समुद्र के पीने के अयोग्य जल से विशेष वृद्धि अपने ही जल से पूर्ण हमारे लिये श्रेयस्करी नहीं (है)।' इस कारण से वर्षा ऋतु में बढ़े हुये जल का त्याग करते हैं।

टिप्पणी—**साधीयसी**—अतिशयेन साधुः इति साधीयान् (साधु+ईयसुन्) स्त्री० साधीयस्+ङीप् **परीवाहिनः**—परीवाहो जलोच्छ्वासे महीभृद्योग्यवस्तुनीति हैमः भुजंगप्रयातं छन्दः अनुप्रासोत्प्रेक्षालङ्कारौ।

श्रीरामस्य तडागानां जलधिसाम्यमाह—

त्वदीयानां पंकः पयसि सरसां भूयसि कुतो
निदाघेऽपि क्रीडद्वनकरटियूथेऽपि नृपते
त्विषाऽपि स्पर्धन्ते सह जलधिना तान्यसितया
गरीयस्तद्गंडद्वितयमदवीचिव्यतिकरात् ॥१६५॥

माधुरी—हे **नृपते**! **त्वदीयानां सरसां** तडागानां **भूयसि** प्रचुरपरिमाणे **पयसि** जले **निदाघे** ग्रीष्मे **अपि क्रीडद्वनकरटियूथेऽपि** क्रीडत् वनस्य करटिनाम् गजानां यूथं यस्मिन् तत्तस्मिन् (बहु०) **अपि** (अतलस्पर्शतया) **पंकः** कर्दमः

कुतः ? तानि सरोवराणि (श्वेतजलपूर्णान्यपि) **गरीयस्तद्गंडद्वितयमदवीचिव्यतिकरात्** गरीयसा तेषां गजानां गण्डयो द्वितयस्य द्वयस्य मदस्य वीचीनां व्यतिकरात् सम्पर्कात् (तत्०) **असिततया** श्यामतया **त्विषा** कान्त्या अपि **जलधिना सह स्पर्धन्ते** । तुल्यतां कुर्वन्ति । (गम्भीरतया श्यामतया चोभयथा समुद्रेण सह तेषां साम्यमस्तीति भावः ।)

हिन्दी अनुवाद—हे महाराज ! आपके तालाबों के प्रचुर जल में गर्मी में भी तथा जंगली हाथियों के समूह के क्रीडा करने पर भी (अत्यन्त गहराई के कारण) कीचड़ कैसे हो सकता है ? (श्वेतजल से भरे हुये) वे सरोवर उन गजों के दोनों भारी कपोलों के मद की लहरों के सम्पर्क से श्याम कान्ति के द्वारा भी समुद्र के साथ बराबरी करते हैं । (गम्भीरता तथा श्यामता दोनों प्रकार से समुद्र के साथ आपके सरोवरों की समता है ।)

टिप्पणी—भूयसि—भूयान् बहुतरार्थे स्यात्पुनरर्थे तदव्ययमिति धरणिः । **निदाघः**—नितरां दह्यते अत्रेति (नि √ दह + घञ्) ग्रीष्मः निदाघः कथ्यते ग्रीष्मे इति भट्टहलायुधः **गरीयः**—अतिशयेन गुरु इति गरीयः (गुरु + ईयसुन्) **शिखरिणी छन्दः,** उपमालंकारः ।

सरोवरस्य सौन्दर्यातिशयं वर्णयति कविः—

मरालोऽयमायाति यत्तीरभूमी-
मरालो यदम्बुप्रवाहोर्मिपुञ्जः ।
सरोलंबशैवालवल्लीवृतं तत्
सरो लम्बपद्मं तवोल्लालसीति ॥१६६॥

माधुरी—[हे राम !] **तव सरोलम्बशैवालवल्लीवृतं** रोलम्बाः भ्रमराः तैः सह याः शैवालवल्ल्यः ताभिर्वृतं युक्तम् (तत्०) **लम्बपद्मम्** लम्बानि दीर्घाणि पद्मानि यस्मिन् तत् (बहु०) तत् सुन्दरं **सरः उल्लालसीति** अतिशयेन उल्लसति (शोभते इत्यर्थः) अरालः कुटिलः **यदम्बुप्रवाहोर्मिपुञ्जः** यस्य जलप्रवाहस्य **ऊर्मिपुञ्जः** लहरि-समूहः **'अयं मरालः** हंसः (जातौ लक्षणया हंससमूहः) **यत्तीरभूमीम्** यस्य तटस्थलम् **आयाति ।'** (इति भ्रान्तिर्भवति ।)

हिन्दी अनुवाद [हे राम] आपका, भ्रमरों तथा शैवाल घास के समूह से युक्त बड़े-बड़े कमलों वाला सुन्दर सरोवर अत्यन्त शोभित हो रहा है । जिसके जल-प्रवाह की टेढ़ी लहरों का समूह 'यह हंस समूह जिसके तट की भूमि तक पहुँच रहा है ।' [ऐसा भ्रम उत्पन्न करता है ।]

टिप्पणी—**मरालः**—हंसः (जातोलक्षणया हंससमूहः इत्यर्थः ।) **अरालः**—कुटिले सर्जरसे समददन्तिनीति विश्वः **प्रवाहः**—प्रवाहो जलवेगेऽपि पारम्पर्यानुवर्तने इति धरणिः । भुजङ्गप्रयातंछन्दः यमकंभ्रान्तिमांश्चालंकारौ ।

इति तडागवर्णना समाप्तिमगात् ।

अथ श्रीरामस्यारामवर्णना

श्रीरामस्योपवनपादपानां पुष्पफलसमृद्धिं वर्णयति—

भूरिस्वादुरसं फलं सुमनसः सान्द्रोल्लसत्सौरभाः
जृम्भन्तेऽखिलशाखिनां रघुपते यस्यानुभावात्तव ।
त्वत्केलीवनपादपा यदि गुणैस्तत्तत्प्रयत्नार्जितै-
र्विश्वानन्दनिदाननन्दनतरून्निन्दन्तिचित्रंनतत् ॥१६७॥

माधुरी—हे विश्वानन्दनिदान ! सर्वे सुखस्यादिकारण ! रघुपते ! रामचन्द्र ! यदि त्वत्केलीवनपादपाः तव उपवनस्य वृक्षाः तत्तत्प्रयत्नार्जितैः शास्त्रोक्तयत्नसेवितैः गुणैः पत्रपुष्पफलसमृद्धिभिः नन्दनतरून् इन्द्रवनस्य वृक्षान् निन्दन्ति तिरस्कुर्वन्ति तत् चित्रम् आश्चर्यकरं न । यस्य तव अनुभावात् प्रभावात् अखिलशाखिनाम् सकलवृक्षाणाम् भूरिस्वादुरसं भूरिः स्वादुः रसः यस्य तत् (बहु०) फलं फलसमूहः सान्द्रोल्लसत्सौरभाः सान्द्रं घनीभूतम् उल्लसत् सौरभं येषां ते (बहु०) सुमनसः पुष्पाणि जृम्भन्ते वर्द्धन्ते ।

हिन्दी अनुवाद—हे सकल सुखों के आदिकारण भगवन् रामचन्द्र ! यदि आपके प्रमोदवन के वृक्ष वनस्पति शास्त्रोक्त प्रयत्नों से प्राप्त पत्रपुष्प फल समृद्धि रूप गुणों से नन्दन बन के वृक्षों का तिरस्कार करते हैं (तो) यह आश्चर्य नहीं है। जिस आपके प्रभाव से सभी वृक्षों के अत्यधिक मधुर रस से युक्त फल तथा घनीभूत सुरभि वाले फूल बढ़ा करते हैं ।

टिप्पणी—**सुमनसः**—सुमनसः पुष्पं प्रसूनं कुसुमं सुममित्यमरः । **निदानम्**—निदानं त्वादिकारणमित्यमरः **नन्दनम्**—नन्दनं स्यादिन्द्रवनमिति धरणिः । शार्दूलविक्रीडितम् छन्दः व्यतिरेकालङ्कारः ।

उपवनानां समृद्धिं वर्णयति—

नटन्नीलग्रीवा बहुविरुतमाद्यत्परभृता-
स्तरत्केलीहंसा मणिविरचितावालसलिले ।
अलंकुर्वन्त्युर्वीं परिणतफला नम्रतरव-
स्तवारामा वीरुत्कुसुमचयचित्राः क्षितिपते ॥१६८॥

माधुरी—हे **क्षितिपते** भूस्वामिन् ! **तव नटन्नील ग्रीवाः** नटन्तः नृत्यन्तः नीलग्रीवाः मयूराः येषु ते (बहु०) **बहुविरुतमाद्यत्परभृताः** बहु विरुतं येषां ते (बहु०) एवम्भूताः माद्यन्तः उन्मत्ताः परभृताः कोकिलाः येषु ते (बहु०) **मणिविरचितावालसलिले** मणिभिः विरचितानि यानि आवालानि तेषां सलिले **तरत्केलीहंसाः** तरन्तः केलीहंसाः येषु ते (बहु०) **परिणतफलानम्रतरवः** परिणतानि पक्वानि यानि फलानि तैः आनम्राः तरवः येषु ते (बहु०) **वीरुत्कुसुमचयचित्राः** वीरुधां कुसुमानां चयेन चित्राः बहुराग-युक्ताः **आरामाः** उपवनानि **उर्वीम्** भूमिम् **अलंकुर्वन्ति** शोभयन्ति ।

हिन्दी अनुवाद—हे भूपते ! जिन (उपवनों) में मयूर नृत्य कर रहे हैं, बहु-भाषी उन्मद कोकिल हैं, मणिमय आवालों (थालों) के जल में क्रीडा हंस तैर रहे हैं, पके हुये फलों से अत्यन्त झुके हुये वृक्ष हैं तथा फैली हुई लताओं के फूलों के समूह से जो चित्र वर्ण के (बहुरंगी) हैं । ऐसे आपके उपवन पृथ्वी को आभूषित करते हैं ।

टिप्पणी—नटन्नीलग्रीवाः—नटौ शोणकनर्तकाविति धरणिः नीलग्रीवाः शिवो बर्हीति हैमः **परिणतम्**—पक्वे परिणतमिति विश्वः **आरामाः**—आरामः स्यादुपवनं कृत्रिमं वनमेव यदित्यमरः **वीरुत्**—लता प्रतानिनी वीरुत् इत्यमरः । **शिखरिणी छन्दः उदात्तालंकारः ।**

श्रीरामस्य क्रीडावनवृक्षाणाम् इन्द्रेण साम्यं ब्रूते—

विहितानतयः सुमनोनिवहै-
र्बहुरागमनोज्ञवयोवलिताः ।
बहुनेत्रतया तवकेलिवने
तरवस्तुलयन्ति पुलोमरिपुम् ॥१६९॥

माधुरी—[हे राम !] **तव केलिवने** क्रीडोपवने **सुमनोनिवहैः** सुमनसां पुष्पाणां निवहैः समूहैः **विहितानतयः** विहिता आनतिः नम्रता येषां ते (बहु०) **बहुरागमनोज्ञवयोवलिताः** बहुरागाणि अनेकवर्णानि मनोज्ञानि सुन्दराणि यानि वयांसि

पक्षिणस्तैर्वलिताः युक्ताः तरवः वृक्षाः **बहुनेत्रतया**—बहुमूलतया बहुनेत्रतया वा **पुलोमरिपुम्** इन्द्रम् **तुलयन्ति** समतां कुर्वन्ति [इन्द्रोऽपि विभक्तिविपरिणामेन सुमनसां देवानां निवहैः विहितानतिः कृतप्रणामः, बहुरागेण अतिप्रीतियुक्तेन मनोज्ञेन सुन्दरेण वयसा यौवनेन वलितः बहुनेत्रयुक्तश्चास्तीत्युभयोः साम्यम् सिद्ध्यति ।]

हिन्दी अनुवाद—[हे राम !] आपके क्रीडोपवन में पुष्पों के समूहों से झुकाये गये अनेक वर्णों के सुन्दर पक्षियों से युक्त वृक्ष बहुत सी जड़ों से युक्त होने के कारण इन्द्र की समता करते हैं। [इन्द्र भी देवसमूहों से प्रणत अत्यन्तप्रेमपूर्ण सुन्दर यौवन से युक्त तथा अनेक नेत्रों वाले हैं, अतः दोनों की समता सिद्ध होती है।]

टिप्पणी—**सुमनसः**—सुमनसः स्मृताः पुष्पमालतीसुरपण्डिताः इति धरणिः **वयोवलिताः**—वयो बाल्यादि पक्षी च यौवनं रक्तविड्वयः इति धरणिः **नेत्रम्**—नेत्रं पथि गुणे वस्त्रभेदे मूले द्रुमस्य च । रथे चक्षुषि नद्यां च नेत्रा नाड्याञ्च योषितीति हैमः। **पुलोमरिपुः**—पुलोम्नः तन्नामकस्य दैत्यस्य रिपुः शत्रुः इन्द्रः। तोटकछन्दः उपमालंकारः।

उपवनतरुराजिसघनतामाह—

तव विहरणारण्ये क्षोणीरुहैर्विरतिं यती
दिनकरतिरोधानाद्या रक्ष्यते रजनिः प्रगे ।
रहयति न सा जातुच्छायाछलेन महीपते
पतितसुमनस्ताराचित्रा तदंघ्रिनिषेवणम् ॥१७०॥

माधुरी—हे महीपते ! तव विहरणारण्ये आरामे क्षोणीरुहैः वृक्षैः **दिनकरतिरोधानात्** दिनकरस्य सूर्यस्य तिरोधानात् अस्ताचलगमनात् **विरतिं** विनाशं **यती** गच्छन्ती **पतितसुमनस्ताराचित्रा** पतिताः सुमनसः एव ताराः तैश्चित्रा शबला **या रजनिः रक्ष्यते** त्रायते। **सा प्रगे** प्रातःकाले (दिनेऽपि) **छायाछलेन** छायायाः व्याजेन **जातु** कदाचिदपि **तदङ्घ्रिनिषेवणं** तेषाम् अङ्घ्रीणां मूलानां निषेवणम् सेवां **न रहयति** त्यजति।

हिन्दी अनुवाद—हे भूपते ! आपके विहारवन में वृक्षों के द्वारा, सूर्य के अस्ताचल गमन के कारण विनाश को प्राप्त होती हुई, गिरे हुये पुष्प रूपी ताराओं से चित्रित रात्रि (विनाश से) बचाई जाती है। वह प्रातःकाल (दिन में) छाया के बहाने कभी भी उन वृक्षों की जड़ों की सेवा को नहीं त्यागती है। ('दिन में रात छाया के रूप में पला करती है' यह तात्पर्य है।)

टिप्पणी—**क्षोणीरुहाः**—क्षोण्यां पृथिव्यां रोहन्ति इति (क्षोणी √ रुह् + क) **प्रगे**—प्रातःकाले (लक्षणया दिने) **रहयति**—√ रह् (त्यागे) + लट् **हरिणी छन्दः** अपह्नुतिरलंकारः।

आरामवृक्षाणां योधानाञ्च श्लेषेण साम्यमाह—

हित्वा पत्रं जरदभिनवं गृह्णते यन्मनोज्ञं
पत्रिव्रातैरनुपमरणारम्भयोग्यैरुपेताः ।
स्थैर्यन्नाजौ जहति भवदारामभूमीरुहास्त्वद्-
योधै राजन्निजविलसितं नूनमध्यापितास्तत् ॥१७१॥

माधुरी—हे राजन् ! भवदारामभूमीरुहाः भवतः उपवनस्य वृक्षाः त्वद्योधैः तव वीरसैनिकैः तत् प्रसिद्धम् निजविलसितं स्वकीयं शीलं नूनम् निश्चयेन अध्यापिताः शिक्षिताः, यत् यथा योधाः जरत्पत्रम् वृद्धं वाहनं हित्वा त्यक्त्वा मनोज्ञम् नववयस्कं (वाहनं) गृह्णते स्वीकुर्वन्ति वृक्षा अपि जीर्णं पत्रं त्यक्त्वा नवीनं किशलयं धारयन्ति । [योधाः] अनुपमरणारम्भयोग्यैः महारणं कर्तुं समर्थैः पत्रिव्रातैः बाणसमूहैः उपेताः संयुताः [सन्ति] वृक्षा अपि अनुपमो यो रणः शब्दस्तस्यारम्भस्तस्य योग्यैः समर्थैः पत्रिव्रातैः पक्षिसमूहैः उपेताः सन्ति । योधाः आजौ युद्धस्थले स्थैर्यं न जहति त्यजन्ति (तिष्ठन्तीति भावः) वृक्षाः अपि आजौ वनभूमौ स्थावराः भवन्ति ।

हिन्दी अनुवाद—हे राजन् ! आपके उपवन के वृक्ष तुम्हारे वीर सैनिकों के द्वारा अपना प्रसिद्ध स्वभाव सिखा दिये गये हैं (सैनिकों ने अपना आचरण वृक्षों को सिखा दिया है)। जैसे सैनिक वृद्ध वाहन को त्याग कर नवीन वाहन को स्वीकार करते हैं, महायुद्ध करने में समर्थ बाण समूह से संयुत रहते हैं तथा युद्ध में स्थिर रहते हैं तथैव वृक्ष भी जीर्ण पत्ते को त्याग कर नवीन पल्लव धारण करते हैं, अनुपम कलरव करने वाले पक्षिसमूहों से युक्त रहते हैं एवं वनभूमि में स्थिर रहा करते हैं ।

टिप्पणी—पत्रम्—पत्रं स्याद् वाहने पर्णे पक्षे च शरपक्षिणोरिति धरणिः । जरत्—प्रवयाः स्थविरो वृद्धो जीनो जीर्णो जरन्नपीत्यमरः । पत्रिव्रातैः—पत्रिणः बाणाः पक्षिणश्च तेषां व्राताः समूहाः आजौ—आजिः वनभूमिः संग्रामभूमिश्च तस्याम् । मन्दाक्रान्तावृत्तम् श्लेषालंकारः ।

श्रीरामस्योद्याने मुनेरपि रागं वर्णयति—

किं चित्रमवनिजाने भवदुद्याने यदुन्मदो भ्रमरः ।
सुमनस्संगतिमानपि मुनिरपि रागी विभाव्यते यत्र ॥१७२॥

माधुरी—हे अवनिजाने ! भूपते ! भवदुद्याने भवतो वाटिकायां यत् भ्रमरः मधुकरः [स्त्रीलम्पटः] यत् उन्मदः उन्मत्तः (अत्र) किं चित्रम् आश्चर्यम्, यत्र (उद्याने) सुमनस्संगतिमान् पुष्पितः [देवयुक्तो वा] अपि मुनिः अगस्त्यवृक्षः [अगस्त्यनामको

मुनिः] अपि रागी रक्तपुष्पयुक्तः [शृङ्गारी] विभाव्यते दृश्यते [एतच्चित्रमस्तीति शेषः ।]

हिन्दी अनुवाद—हे भूपते ! आपकी वाटिका में भ्रमर या स्त्रीलम्पट जो मतवाले हो जाते हैं इसमें क्या आश्चर्य है। (भ्रमर का पुष्परस के आस्वादन से तथा कामुक जन का पुष्प घनीछाया आदि उद्दीपन विभाव की प्राप्ति से उन्मत्त होना स्वाभाविक है।) जिस (वाटिका) में पुष्पित अगस्त्य भी लाल फूलों के रंग से रंजित होता है अथवा देवों की संगति वाले अगस्त्यमुनि (ब्राह्मण) भी रागी (शृङ्गारी) बन जाते हैं (यह आश्चर्य हे।)

टिप्पणी—**अवनिजाने !**—अवनिः जाया यस्यसः तत्सम्बुद्धौ **उन्मदो भ्रमरः**—भ्रमरः कामुके भृङ्गे इत्यमरः भृंगाः पुष्परसास्वादनत्वात् कामुकाः पुष्पादेरुद्दीपन-विभावत्वात् वनादौ उन्मत्ता भवन्तीति काक्वा युक्तमेव। **सुमनस्संगतिमान्**—सुमनसः पुष्पाणि देवाश्च तेषां संगतिरस्यास्तीति संगति + मतुप् **मुनिः** अगस्त्यवृक्षविशेषः अगस्त्य-नामको मुनिश्च। गीतिश्छन्दः अनुप्रासोऽलंकारः काकुध्वनिरत्र ।

श्रीरामारामस्य महानससादृश्यमाह—

श्रितविपुलताम्रकरकं
विशदौदनपाकिशाकसश्रीकम् ।
समधुदधिफलसनाथं
केलिवनं ते महानसोपमितम् ॥१७३॥

माधुरी—[हे राम !] ते तव **श्रितविपुलताम्रकरकम्** पक्षिपालकलतादाडिम-वृक्षसहितम् **विशदौदनपाकि,**—निर्मलसप्तपर्णवृक्षयुतं **शाकसश्रीकम्** शोभाञ्जनलवंग-वृक्षशालि **समधु** मधुसहितं **दधिफलसनाथं** कपित्थवृक्षशोभितम् **केलिवनम्** क्रीडोपवनं **महानसोपमम्** पाकशालया तुल्यम् अस्तीति शेषः। [महानसमपि **श्रितविपुलताम्रकरकं** बहुताम्रपात्राश्रयीभूतम् **विषदौदनपाकि** निमलौदनपाकयुक्तं **शाकसश्रीकम्** शाकं सश्रीकम् लवंगसहितं यस्मिन् तत् (बहु०) **समधु दधिफलसनाथं** मधुना सहितं दधिफलाभ्यां च सहितं भवति इत्युभयोः साम्यं सुस्पष्टमस्ति ।]

हिन्दी अनुवाद—[हे राम !] आपका, पक्षिपालक, लता एवं अनार के वृक्षों सहित (फूलों का समय होने से) निर्मल ओदनपाकी (कटसरैया) सप्तपर्ण (सतिवन) शोभाञ्जन (सहिंजन) तथा लौंग वृक्षों से युक्त, मधु तथा कपित्थ (कैथा) वृक्षों से सनाथ क्रीडावन पाकशाला के तुल्य है। [पाकशाला (रसोई घर) भी बहुत से ताँबे के बरतनों की आश्रय, विशद भात से युक्त लौंग से सुरभित

सागों के सहित तथा मधु दही एवं फलों से भरी हुई होती है। इस प्रकार दोनों की समता स्पष्ट है।]

टिप्पणी—श्रितविपुलताम्रकरकम्—(उपवनपक्षे) श्रिताः विपवः लताः आम्रकरकाश्च यस्मिन् तत् (महानसपक्षे) श्रिताः विपुलाः ताम्रकरकाः यस्मिन् तत् विशदौदनपाकि (उपवनपक्षे) विशदः पुष्पसमयत्वात् निर्मलः ओदनापाकी शाकः श्रिया सहितो यस्मिन् तत् (महानसपक्षे)। (रंधनचातुर्येण) विशदः ओदनपाकः यस्मिन् तत्तथा शाकं वास्तुकादि (बथुवाआदि) सश्रीकं यस्मिन् तत् समधुदधिफलसनाथं चेत्युभयत्र तुल्यम्। शिग्रुर्ना शाकमात्रे च शोभाञ्जनमहीरुहे इति विश्वः। कपित्थे स्यु र्दधित्थग्राहिमन्मथाः। तस्मिन् दधिफलः पुष्पफल दन्तशठावपीत्यमरः। **गीतिश्छन्दः श्लेषपुष्टोपमालङ्कारः।**

श्रीरामस्य विहारद्रुमाणां पुष्परसाधिक्यं दयार्द्रत्वञ्च वर्णयति—

दूरतः पथिकः प्रयाति रवित्विषा परितापितः

स्थावरा वयमेत्य तद्विपदं न हन्तुमिह क्षमाः।

इत्यमी कृपयाऽधिकं दधति प्रसूनविलोचनै-

रश्रुवारि मधुच्छलेन भवद्विहारवनद्रुमाः॥१७४॥

माधुरी—[हे राम] अमी भवद्विहारवनद्रुमाः भवतः उपवनस्य वृक्षाः 'रवित्विषा सूर्यस्य तेजसा परितापितः पथिकः दूरतः दूरे प्रयाति गच्छति। इह वनभूमौ स्थावराः स्थितिमन्तः (अचलाः) वयम् एत्य गत्वा तद्विपदम् तस्य विपत्तिम् हन्तुम् क्षमाः समर्थाः न (स्मः) किम् इति हेतोः कृपया दयया प्रसूनविलोचनैः पुष्पनेत्रैः मधुच्छलेन पुष्परसव्याजेन अधिकम् अत्यन्तम् अश्रुवारि अश्रुजलं दधति धारयन्ति।

हिन्दी अनुवाद—[हे राम !] आपके उपवन के ये वृक्ष 'सूर्य के तेज से तपाया गया पथिक दूर जा रहा है। इस उपवन में अचल हम (वहाँ) जाकर उसकी विपत्ति को दूर करने में समर्थ नहीं हैं।' क्या इस कारण दया से, पुष्प रूपी नेत्रों के द्वारा पुष्परस के बहाने से अधिक अश्रुजल को धारण करते हैं। (वृक्षों के फूलों का रस मानों उनकी करुणा का जल है।)

टिप्पणी—पथिकः—पान्थोऽध्वगोऽध्वनीनः स्यादध्वन्यः पथिकस्तथेति भट्टहलायुधः। **प्रसूनविलोचनैः**—प्रसूनान्येव विलोचनानि (कर्म०) तैः। **चर्चरीछन्दः उत्प्रेक्षा-रूपकापह्नुतीनां संसृष्टिः उत्प्रेक्षालङ्कारोऽत्र व्यङ्ग्यः।**

श्रीरामस्यारामवर्तिनोरशोकतमालवृक्षयो वैशिष्ट्यमाह—

तापिच्छस्त्वद्‌विहरणवने यो मसीबद्धसख्यः
कंकेलिश्चाप्यभिनवतयाऽलक्तकालोहितो यः ।
निर्वृत्तौ तत्किशलयरसैरुल्लसद्‌यौवनानां
पुंसामाशु क्षिपति मदनो हृत्सु शृङ्गाररागौ ॥१७५॥

माधुरी—[हे राम] **त्वद्विहरणवने** तव विहारवने **यः मसीबद्धसख्यः** मसीवत् श्यामः **तापिच्छः** तमालवृक्षः **यः अभिनवतया अलक्तकालोहितः** अलक्तकवद् रक्तः **कंकेलिः** अशोकश्च (स्तः) । **मदनः** वसन्तकालः **निर्वृत्तौ** कार्यस्य समाप्तौ **तत्किशलयरसैः** तयोर्वृक्षयोः किशलयानां पल्लवानां रसैः **उल्लसद्यौवनानां** प्रकटयौवनानां **पुंसाम्** **हृत्सु** हृदयेषु **आशु** शीघ्रमेव **शृङ्गाररागौ** सौन्दर्यं प्रेमाधिक्यं च **क्षिपति** पातयति । (वसन्ते तमालपत्राणां श्यामतां अशोककिशलयानां रक्ततां च दृष्ट्वा युवकजनाः शृङ्गाररसाप्लुताः प्रीतियुक्ताश्च भवन्तीतिभावः ।)

हिन्दी अनुवाद—[हे राम !] आपके विहारवन में जो स्याही की तरह काला तमाल वृक्ष तथा नवीनता के कारण अलक्तक के समान लाल अशोक वृक्ष है। वसन्त काल अपने कार्य की समाप्ति पर उन दोनों के पत्तों के रसों से यौवनारूढ़ पुरुषों के हृदयों में शीघ्र ही शृङ्गार तथा प्रेम (काले व लाल रस) को डाल देता है। (वसन्त में तमाल के काले तथा अशोक वृक्ष के लाल पत्तों को देखने से उद्दीप्त नवयुवक शृङ्गार तथा प्रीति की भावना से भावित हो जाते हैं। यह भाव है।)

टिप्पणी—**कंकेलिः**—अशोकस्त्रिषु निःशोके पुंसि कंकेलिपादपे इति मेदिनीकारः **शृंगारः**—शृंगारस्तु विभूषायां शृङ्गारो राजमंडने । सुरते रसभेदे च शृंगारो नागसम्भवे इति हैमः । शृङ्गारः श्यामः रागश्च अरुणोभवति । मन्दाक्रान्तावृत्तम् उपमाऽलंकारः ।

श्रीरामस्यारामे चम्पावृक्षाद् भ्रमराणां पलायनमाह—

धौताङ्घ्रेर्विमलालवालपयसा वल्लीवधूसंगता-
दत्रासन्नशुभद्विजश्रुतिसुखध्वानप्रवृद्धश्रियः ।
चाम्पेयाद्विपतत्प्रसूनमिषतः कार्त्तस्वरं वर्षतो
दूरं यात्यसितं कुलं मधुलिहामेनो वदान्यादिव ।१७६॥

माधुरी—[हे राम !] अत्र भवतोऽस्मिन्नारामे **मधुलिहाम्** भ्रमराणाम् **असितम्** श्यामवर्णम् **कुलम्** **विमलालवालपयसा** निर्मलेन आलवालजलेन **धौताङ्घ्रेः**

धौताः अङ्घ्रयः मूलानि यस्य सः तस्मात् (बहु०) **वल्लीवधूसंगतात्** वल्ली एव वधूः तस्या संगतस्तस्माद् **आसन्नशुभद्विजश्रुतिसुखध्वानप्रवृद्धश्रियः** आसन्नानां शुभद्विजानां शुकपिकादिपक्षिणां श्रुतिसुखं मनोज्ञं यद् ध्वानं रवः तेन प्रवृद्धा श्री र्यस्य स तस्मात् (बहु०) **निपतत्प्रसूनमिषतः** निपततां प्रसूनानां मिषतो व्याजेन **कार्त्तस्वरं** सुवर्णं **वर्षतः वदान्यात्** दानिनः **एनः** पापम् इव **चाम्पेयात्** चम्पापुष्पवृक्षात् **दूरं याति** गच्छति। [वदान्योऽपि जलेन धौतपादः स्वस्त्रियासहितः निकटवर्तिनां ब्राह्मणानां मनोहरवचनश्रवणात् विलसितः सुवर्णदायको भवतीत्युभयोः साम्यम् ।]

हिन्दी अनुवाद—[हे राम] आपके इस उपवन में थाले के विमल जल से धोई गई जड़ वाले, लतारूपिणी पत्नी के सहित, समीपवर्ती शुक पिक आदि शुभ पक्षियों के कर्णसुखद कलरव को सुनने से प्रकृष्ट शोभाशाली तथा गिरते हुये फूलों के ब्याज से सुवर्ण की वर्षा करने वाले चम्पा के वृक्षों से काले भौंरों का समूह इस प्रकार दूर भाग जाता है जैसे जल से धोने से पवित्र पैरों वाले, अपनी भार्या के सहित रहते हुये निकटवर्ती ब्राह्मणों के सुन्दर बचनों को सुनने से विलसित तथा स्वर्ण का दान करने वाले महादानी पुरुष के समीप से पाप भाग जाता है। (चम्पा के फूल की गन्ध से भौंरों के शिर में पीड़ा होती है अतः वे चम्पा के पास नहीं जाते ।)

टिप्पणी—**चाम्पेयः**—चाम्पेयश्चंपके स्वर्णे किञ्जल्के नागकेशरे इति हैमः। **धौताङ्घ्रेः**—धौताः अङ्घ्रयः मूलानि पादाः वा यस्य स तस्मात् (बहु०) शार्दूलविक्रीडितं छन्दः पूर्णोपमालङ्कारः।

श्रीरामस्योपवनद्रुमाणां किशलयकलनायाः शीतलच्छायायाश्च शोभां वर्णयति—

प्रत्यग्रं दधति द्रुमाः किशलयं कुल्याम्भसामुक्षणात्
छायाऽपैति न जातु तन्नतरणेस्तापस्तपर्त्तावपि ।
अत्र स्निग्धपयोदनादसमदक्रीडाकलापिस्फुरत्
केकाकर्णनकौतुकात्कथमपि प्रावड्जनैः प्रार्थ्यते ॥१७७॥

माधुरी—[हे राम ! अत्र भवदीयोपवने **द्रुमाः** वृक्षाः **कुल्याम्भसाम्** कृत्रिमसरिताम् अम्भसां जलानाम् **उक्षणात्** सेकात् **प्रत्यग्रं** नवं **किसलयं** पल्लवं **दधति** धारयन्ति । **जातु** कदाचिदपि **छाया न अपैति** दूरे भवति **तपर्तौ** ग्रीष्मर्तौ अपि **तरणेः** सूर्यस्य **तापः** न (भवति) **तत्** तस्मात् कारणात् **जनैः स्निग्धपयोदनादसमदक्रीडाकलापिस्फुरत्केकाकर्णनकौतुकात्** स्निग्धो मनोहरो यः पयोदस्य मेघस्य नादः तेन समदः उन्मदो यः क्रीडाकलापी क्रीडामयूरः तस्य केकायाः आकर्णनस्य श्रवणस्य यत्कौतुकम् तस्मात् **कथमपि प्रावृट्** वर्षर्तुः **प्रार्थ्यते** अभिलष्यते ।

हिन्दी अनुवाद—[हे राम !] (आपके) इस उपवन में वृक्ष नहरों के जल के सींचने से नूतन किसलयों को धारण करते हैं, कभी भी छाया नहीं हटती है [तथा] ग्रीष्म ऋतु में भी सूर्य का ताप नहीं होता है (अतः पल्लव, छाया की प्राप्ति तथा सूर्य ताप के परिहार के हेतु वर्षा की आवश्यकता नहीं पड़ती है)। इस कारण मनुष्यों के द्वारा मेघ की मनोज्ञध्वनि से उन्मत्त क्रीडामयूर की बोली सुनने के कुतूहल से किसी प्रकार वर्षा ऋतु की चाह की जाती है। (मयूर की बोली वर्षा में ही सुनाई पड़ती है।)

टिप्पणी—कुल्या—कुल्या कृत्रिमा सरिदित्यमरः, कुल्या नदी कुल्यमस्थि कुल्या वारिप्रणालिकेति वैजयन्ती। प्रावृट्—स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षा इत्यमरः [वर्षायाः जलं प्राप्य वृक्षेषु पल्लवप्रादुर्भावो भवति, मेघच्छाया सूर्यस्य तापं परिहरति कृत्रिमसरितः जलेन वृक्षाणां सान्द्रशीतलच्छायया तदुभयं सिद्धं भवति परन्तु मयूरकेका तु मेघागमे एव श्रूयते तदर्थं वर्षायाः शुभागमनमभीष्टमस्ति जनानाम्] **शार्दूलविक्रीडितं** छन्दः काव्यलिङ्गमलंकारः।

उपवनवृक्षालवालजले च्युतपुष्पाणां तत्र निलीनभ्रमराणां शोभां वर्णयति—

अत्रालवालाम्भसि भूरुहाणां
पुष्पैश्च्युतैः फेनसमुद्गमश्रीः।
शैवालशोभास्फुरदञ्जनाभैस्
तद्गन्धलोभादलिभिर्विलीनैः ॥१७८॥

माधुरी—[हे राम !] अत्र उपवने आलवालाम्भसि आलवालजले **भूरुहाणां** वृक्षाणां **च्युतैः** पतितैः **फेनसमुद्गमश्रीः** फेनविकासशोभा **तद्गन्धलोभाद्** तेषां पुष्पाणां गन्धस्य लोभात् **विलीनैः** गुप्तैः **स्फुरदञ्जनाभैः** व्यक्ताञ्जनसमकान्तिभिः **अलिभिः** मधुकरैः **शैवालशोभा** जलनीलीशोभा [भवतीति शेषः।]

हिन्दी अनुवाद—[हे राम ! आपके] इस उपवन में थालों के जल में वृक्षों के गिरे हुये फूलों से फेन के विकास की शोभा [तथा] उन फूलों के गन्ध के लोभ से (उनमें) छिपे हुये चमकीले अञ्जन की कान्ति वाले भ्रमरों से सेवारू घास की शोभा [होती है]

टिप्पणी—फेनः—डिंडीरोऽब्धिकफः फेन इत्यमरः **स्फुरदञ्जनाभैः**—स्फुरद्-यदञ्जनं तस्य आभेवाभा येषां ते तैः (बहु०) **इन्द्रवज्राछन्दः अनुप्रासः उपमाचालंकारौ।**

उपवनद्रुमालवालानां समुद्रसाम्यमाह—

विविधमणिमयैरशोषदोषै
नृप तव केलिवने द्रुमालवालैः ।
तुलितसुवदनाधरप्रवाल-
प्रभवतया तुलितो वताम्बुराशिः ॥१७९॥

माधुरी—हे **नृप** ! **तव केलिवने विविधमणिमयैः** अनेकविधैर्मणिभिर्निर्मितैः **अशोषदोषैः** न शोषस्य दोषो येषु ते तैः (बहु०) शोषणदोषरहितैः **द्रुमालवालैः** वृक्षाणां जलाधारस्थलैः **तुलितसुवदनाधरप्रवालप्रभवतया** तुलितः समीकृतः सुवदनायाः सुमुख्याः अधरः एव प्रवालः किशलयो विद्रुमो वा तस्य प्रभवस्तस्य भावस्तया **वत** आश्चर्यमस्ति अधरप्रवालस्य अधरविद्रुमस्य प्रभवतया **अम्बुराशिः** समुद्रः **तुलितः** सदृशीकृतः ।

हिन्दी अनुवाद—हे राजन् ! आपके क्रीडोद्यान में विविध मणियों से निर्मित, सूखने के दोष से रहित, वृक्षों के थालों से; सुमुखी स्त्री के अपने सदृश बनाये गये अधर पल्लव का जन्म स्थान होने के कारण, आश्चर्य है कि अधर प्रवाल [अधररूपी मूंगे] का जन्म स्थान होने से समुद्र भी सदृश बना लिया गया है ।

टिप्पणी—**प्रवालः**—प्रवालो वल्लकीदण्डे विद्रुमे नवपल्लवे इति धरणिः **प्रभवः**—प्रभवो जन्मनो हेतुः प्रभवो मूलमस्त्यपाम् । प्रभवं केचिदिच्छन्ति स्थानमाद्योपलब्धये इति धरणिः **वत**—खेदानुकम्पासन्तोषविस्मयामन्त्रणे वतेत्यमरः । **पुष्पिताग्राच्छन्दः उपमालंकारः** ।

श्रीरामस्योपवने विविधवृक्षस्थितिपुरस्सरं कल्पवृक्षापमानं वर्णयति—

विन्ध्ये गौरीगुरौ च क्षितिभृति मलये विश्रुताः स्वैर्गुणैर्ये
शोभन्तेऽभ्रंकषास्त्वद्विहरणविपिने शाखिनस्ते समस्ताः ।
यत्नादारोप्यमाणाः सुरपतिवचसा नन्दनोद्यानपालैः
सव्रीडास्त्वां विभाव्यत्रिदशविटपिनोनप्ररोहन्तिराजन् ।१८०।

माधुरी—हे **राजन्** ! **ये** (वृक्षाः) **विन्ध्ये** विन्ध्याचले **गौरीगुरौ** हिमाचले **मलये क्षितिभृति** पर्वते **च स्वैः गुणैः** सुगन्धादिभिः **विश्रुताः** प्रसिद्धाः (सन्ति), **ते समस्ताः** सकलाः **अभ्रंकषाः** गगनचुम्बिनः (अत्युन्नताः) **शाखिनः** वृक्षाः **त्वद्विहरणविपिने** भवतो विहारवने **शोभन्ते** । **त्वाम् विभाव्य** मनसि सञ्चिन्त्य **सव्रीडाः** लज्जिताः

त्रिदशविटपिनः कल्पवृक्षाः सुरपतिवचसा इन्द्रस्यादेशेन नन्दनोद्यानपालैः नन्दनवनस्योद्यान-रक्षकैः यत्नात् प्रयत्नपूर्वकम् आरोप्यमाणाः स्थापिताः अपि न प्ररोहन्ति वर्द्धन्ते ।

हिन्दी अनुवाद—हे महाराज ! जो (वृक्ष) विन्ध्याचल, हिमालय तथा मलय पर्वत में (सुगन्ध आदि) गुणों से प्रसिद्ध हैं, वे समस्त अत्यन्त ऊँचे वृक्ष आपके विहार वन में सुशोभित हो रहे हैं। मन में तुम्हें सोचकर (आत्म हीनता के कारण) लज्जित, इन्द्र के आदेश से नन्दन वन के उद्यानपालकों के द्वारा प्रयत्नपूर्वक लगाये गये भी कल्पवृक्ष नहीं बढ़ रहे हैं (कल्पवृक्ष दानी हैं तथा आप महादानी, अतः आपके समक्ष उनका लज्जित होना स्वाभाविक ही है।)

टिप्पणी—त्रिदशविटपिनो न प्ररोहन्ति—त्वां विभाव्य कल्पवृक्षा न प्ररोहन्ति साङ्कुरा न भवन्ति। आशयस्तु ते दातारस्त्वां महादातारं विभाव्य-मनसि चिन्तयित्वा सव्रीडाः, अतो न प्ररोहन्ति न प्रत्यक्षमायान्ति यद्वा तैः स्वर्गादारोप्यमाणाः स्थापिता अपि न वर्धन्ते।) स्रग्धराच्छन्दःविशेषोक्तिरलंकारः।

श्री रामोपवनस्य वृक्षान् नामकथनपूर्वकं निर्दिशति—

वटार्कपर्णपाटलाशमीरसालजम्भलैः
कदम्बकुन्दसिन्दुवारकिंकिरातकेतकैः ।
प्रियालतालमालतीजवातिमुक्तवंजुलै-
र्भवद्विहारकाननं मनो न कस्य कर्षति ॥१८१॥

माधुरी—[भोराम] भवद्विहारकाननम् भवतो विहारवनम् वटार्कपर्णपाट-लाशमीरसालजम्भलैः, कदम्बकुन्दसिन्दुवारकिंकिरातकेतकैः [तथा] प्रियालतालमालती-जवातिमुक्तवंजुलैः [वृक्षैः सहितम्] कस्य मनो न कर्षति (सर्वं दर्शकजनमाकर्ष-तीति भावः)

हिन्दी अनुवाद—[हे राम] आपका उपवन वट, मदार, पलाश, पाढर, शमी, आम्र, चकोतरा, कदम्ब, कुन्द, सँभालू, कनसरैया, केतकी, चिरौंजी, ताड़, चमेली, गुड़हल, माधवी तथा अशोक वृक्षों से सनाथ (समन्वित होकर) किसके मन को नहीं हरता है (सभी को आकर्षित करता है।)

टिप्पणी—वटादिषु अष्टादशसु वृक्षेषु अष्टौपुष्पवृक्षा दश च फल वृक्षाः सन्ति। पञ्चचामरच्छन्दः अनुप्रासालङ्कारः।

श्रीरामस्योपवने विभिन्नवृक्षकृतान्धकारमाह—

खर्जूरसर्जविषमच्छदकोविदार
नारंगबिल्वबकुलामलकाम्लिकाभिः ।
पुन्नागपूगतगरागुरुगन्धसारैः
केलीवनेषु तव कृष्णनिशागमश्रीः ॥१८२॥

माधुरी—[हे राम] तव केलीवनेषु खर्जूरसर्जविषमच्छदकोविदारैः, नारंग-बिल्वबकुलामलकाम्लिकाभिः [तथा] पुन्नागपूगतगरागुरुगन्धसारैः वृक्षैः कृष्णनि-शागमश्रीः कृष्णरात्रिशोभा (भवतीतिशेषः)

हिन्दी अनुवाद—[हे राम] आपके क्रीडोपवनों में खजूर, साल, सप्तपर्ण (सतिवन) कचनार, नारंगी, बेल, मौलसिरी, आमला, इमली, केसर, सुपाड़ी, तगर, अगर तथा चन्दन वृक्षों से; काली (अन्धकार) रात्रि के आगमन की शोभा होती है । (घना अन्धकार बना रहता है ।)

टिप्पणी—अस्मिन् श्लोके फलिनो सुरभयश्च वृक्षाः उल्लिखिताः सन्ति । वसन्ततिलकावृत्तम् अनुप्रासालंकारः ।

श्रीरामस्यारामे वसन्ते देवाङ्गनानां रमणं वर्णयति—

नन्दनतोऽप्यभिरामं मत्वाऽऽरामं तव त्रिदशवध्वः ।
सह दयितैरतिमुदिताः, साधु वसन्ते रमन्तेऽस्मिन् ॥१८३॥

माधुरी—[हे राम !] त्रिदशवध्वः त्रिदशानां देवानां वध्वः भार्याः तव आरामं विहारवनं नन्दनतः इन्द्रवनात् अपि अभिरामं मत्वा दयितैः प्रियैः सह अतिमुदिताः परमप्रसन्नाः [सत्यः] वसन्ते वसन्तर्तौ अस्मिन् उपवने साधु सम्यक् रमन्ते मोदन्ते ।

हिन्दी अनुवाद—[हे राम] देवों की स्त्रियाँ आपके उपवन को नन्दन वन से भी सुन्दर समझकर अपने प्रियजनों के सहित अत्यन्त प्रसन्न [होकर] वसन्त में इस उपवन में भली भाँति रमण करती हैं ।

टिप्पणी—त्रिदशवध्वः—अमरा निर्जरा देवास्त्रिदशा विबुधा सुराः इत्यमरः, वधूर्नवोढा योषायां स्नुषाभार्याङ्गनासु चेति धरणिः । साधु—साधु शोभनमाख्यातमिति धरणिः । आर्याच्छन्दः अनुप्रासयमकावलंकारौ ।

वसन्ते सर्वमुद्दीपनविभावमालक्ष्य प्रिययोरनुरागं वर्णयति—

गुञ्जति भ्रमरावली परिपीतचूतमधुद्रवा
मन्दमेति समीरणः सहकारसौरभनिर्भरः ।
इत्युदीरितवाचि काचिदुदञ्चितस्मरमानसे
वल्लभे बहुलच्छदं कदलीनिकुञ्जमवेक्षते ॥१८४॥

माधुरी—काचित् नवोढा अनुरागवती प्रिया **उदञ्चितस्मरमानसे** उदञ्चितः उत्कटः स्मरो यस्मिन् तत् मानसं यस्य स तस्मिन् (बहु०) **वल्लभे** प्रिये '**परिपीतचूतमधुद्रवा** परिपीतः चूतस्य आम्रस्य मधुद्रवो यया सा (बहु०) **भ्रमरावली** भ्रमरपंक्तिः **गुञ्जति । सहकारसौरभनिर्भरः** सहकारस्य आम्रस्य सौरभेण निर्भरो युक्तः **समीरणः** वायुः **मन्दम् एति** वाति ।' **इत्युदीरितवाचि** इति उदीरिता उक्ता वाक् येन स तस्मिन् **बहुलच्छदम्** बहुलाः छदाः आवरणपत्राणि यस्मिन् तत् **कदलीनिकुञ्जम् अवेक्षते** पश्यति । (सा तत्र कुञ्जे गमनाय सङ्केतं करोतीति तात्पर्यम् ।)

हिन्दी अनुवाद—कोई अनुरक्त रमणी, उत्कटकामभावनायुक्त मनवाले प्रिय के द्वारा 'आम्रमञ्जरी के रस का पान करने वाली भ्रमरों की पंक्ति गुञ्जन कर रही है, आम की सुगन्ध से युक्त वायु बह रही है।' ऐसा कहने पर बहुत से आवरण पत्तों से घिरे हुये केले की कुञ्ज की ओर देखती है। (वहाँ चलने का संकेत करती है, यह तात्पर्य है।)

टिप्पणी—**मधुद्रवा**—मधु मद्ये च क्षौद्रे पुष्परसे जले इति धरणिः । अत्राभिसारिका मध्यानायिका, भ्रमरावलीत्यादि उद्दीपनविभावः, अनुरक्तो नायकः आलम्बनविभावः, उत्कटकामभावः अनुभावः, औत्सुक्यं सञ्चारीभावः, रतिः स्थायीभावः । **प्रिययोः** संभोगशृङ्गाररसोत्र व्यङ्ग्यः । चर्चरीच्छन्दः वृत्त्यनुप्रासालङ्कारः ।

कदलीनिकुञ्जे दम्पत्योः रतिक्रीडां वर्णयति—

तल्पे तापिच्छपत्रप्रकरविरचिते कञ्चुकं नीलमुच्चै—
स्तुल्याभे दुर्विभाव्यं कथमपि न पुरा मुक्तमासादयन्त्या ।
तन्व्या निर्वर्ण्य मुग्धस्तनमुकुलमुरो नाभिदत्तेक्षणान्तः
कान्तः श्रान्तामपीमां पुनरपि रतये गाढमाश्लिष्य शेते ।१८५।

माधुरी—**तापिच्छपत्रप्रकरविरचिते**—तमालपत्रसमूहनिर्मिते **तल्पे** पर्यंके **पुरा मुक्तं** रतिक्रीडायाः प्राक् परित्यक्तं **तुल्याभे** समानकान्तिमति (तस्मिन्) **दुर्विभाव्यम्**

पृथग्द्रष्टुमशक्यं उच्चैर्नीलं अतिनीलवर्णम् कञ्चुकम् कथमपि न आसादयन्त्याः प्राप्नुवत्याः (अन्वेषयन्त्याः) तन्व्याः कृशाङ्ग्याः मुग्धस्तनमुकुलम् सुन्दरस्तनचूचुकं उरः वक्षःस्थलं निर्वर्ण्य सम्यगालोक्य नाभिदत्तेक्षणान्तः नाभौ दत्तम् ईक्षणान्तं येन सः (बहु०) कान्तः प्रियः श्रान्ताम् रतिक्लान्ताम् अपि पुनः रतये सम्भोगाय गाढम् आश्लिष्य शेते ।

हिन्दी अनुवाद—(नीले) तमाल पत्र से निर्मित पलंग में (रतिक्रीड़ा से) पहिले उतारी गई समान वर्ण की (उस शयन में) कठिनाई से पहिचानी जाने वाली गाढ़े नीले रंग की चोली को किसी भी तरह न खोज पाने वाली कृशाङ्गी के सुन्दर स्तनों की घुंडी वाले वक्षःस्थल को अच्छी तरह देखकर नाभि में दृष्टि गड़ाये हुये प्रिय (रतिक्रीड़ा में) थकी हुई भी प्रिया का पुनः संभोग के लिये गाढ़ आलिङ्गन कर लेटा है ।

टिप्पणी—तुल्याभे—तुल्या कञ्चुकसमा नीला आभा कान्तिर्यस्य तत्तस्मिन् दुर्विभाव्यम्—दुःखेन विभावयितुं शक्यम् (दुर्√भू+ण्यत्) निर्वर्ण्य—निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणम् इत्यमरः मुग्धः—मुग्धः स्यात्सुन्दरे मूढे इत्यमरः । धीरललितो नायकः मध्या प्रगल्भानायिका, तावेवालम्बनविभावौ, तमालतल्पाद्युद्दीपनविभावाः, वक्षःस्थलनिदर्शनम् कञ्चुकान्वेषणाद्यनुभावः, रतिः स्थायी भावः; संयोगशृङ्गाररसः । स्रग्धरावृत्तम् वृत्यनुप्रासोऽलंकारः ।

नायिकायाः स्तनयोर्मेघसादृश्यमाह—

अलिच्छवी मृगमदपंकलेपनात्
सविद्युतौ विकसितपङ्कजस्रजा ।
समुन्नतौ सुतनु भवत्पयोधरौ
विनिर्मितौ घनरसदायिनौ मया ॥१८६॥

माधुरी—[प्रियः स्वप्रियायाः पयोधरौ प्रशंसन् तां कथयति—]

हे सुतनु ! सुन्दरि ! मृगमदपङ्कलेपनात् कस्तूरीगाढलेपात् अलिच्छवी भ्रमरसमौ कृष्णवर्णौ विकसित पंकजस्रजा विकसितकमलमालया (तस्याः परागेण) सविद्युतौ विद्युता युक्तौ समुन्नतौ भवत्पयोधरौ भवत्याः स्तनौ मया प्रियेण घनरसदायिनौ [जलदायिनौ जलदाविव] सान्द्रानन्दप्रदौ निर्मितौ कृतौ । [स्तनयोः सान्द्रानन्दो मया प्राप्तः इति व्यञ्जना] ।

हिन्दी अनुवाद—[प्रिय अपनी प्रिया के स्तनों की प्रशंसा करता हुआ उससे कहता है—] हे सुन्दरी ! कस्तूरी के गाढ़ लेप से भ्रमर के समान काले रंग के, विकसित कमलों की माला (के पराग) से बिजली के सहित, उभड़े हुये, तुम्हारे दोनों स्तन मेरे

द्वारा [जल देने वाले मेघ के समान] घने शृङ्गाररसास्वाद के दायक बना दिये गये। [तुम्हारे स्तनों का सान्द्ररस मुझे प्राप्त हुआ है यह व्यञ्जना है ।]

टिप्पणी—**घनरसदायिनौ**—घनं सान्द्रं घनं वाद्यं घनो मुस्तोऽम्बुदो घनः घनं काठिन्यसंघाते इति धरणिः । रसो गन्धरसे स्वादे तिक्तादौ विषरागयोः । शृङ्गारादौ विषे वीर्ये देहधात्वम्बुपारदे इति विश्वः । रुचिराच्छन्दः उपमालङ्कारः ।

प्रेष्ठः ब्रह्मविष्णुरुद्रसाम्येन प्रियतमायाः सुशोभितं कबरीभारं वर्णयति—

कति तव सुमनःसंगात्कबरीभारः प्रियेऽति नीलत्वात् ।
भवति च कलापवत्त्वान्निर्जरसेव्यः कथं नो चेत् ॥१८७॥

माधुरी—[प्रियः प्रियतमां वदति—] हे **प्रिये ! तव कबरीभारः** केशकलापः **सुमनःसंगात्** सुमनसां पुष्पाणां संगात् सम्पर्कात् [**देवानां संगात्**] **कति कः ब्रह्मा** स इवाचरति, **अतिनीलत्वात्** घनश्यामतया **अति** अः **विष्णुः** स इवाचरति तथा **कलापवत्त्वात्** जटामण्डलत्वात् **भवति** भवः शिवः स इवाचरति । **चेत् निर्जरसेव्यः** निर्जरैः देवैः तरुणैर्जनैर्वा सेव्यः आश्रितः **कथं न** (स्यादितिशेषः ।)

हिन्दी अनुवाद—[हे प्रिये !] तुम्हारा केशकलाप (बालों का जूड़ा) पुष्पों के सम्पर्क [देवों के सम्पर्क] से ब्रह्मा की तरह, अधिक काला होने से विष्णु की तरह तथा जटामंडल होने से शिव की तरह आचरण करता है फिर देवों से सेवनीय [नवयुवकों के द्वारा उपभोग्य] क्यों न हो। (उसे हमारा प्रीतिवर्धक होना ही चाहिये ।)

टिप्पणी—**कति, अति, भवति**—कः इवावचरति, अः इवाचरति तथा भवः इवाचरतीत्यर्थे क + क्विप् अ + क्विप् तथा भव + क्विप् **वार्तिकम्** 'सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः' 'कर्तुः क्यङ् सलोपश्च' (अष्टा० ३-१-११ सूत्रोपरि वार्तिकम्) कः ब्रह्मा अः विष्णुः इत्येकाक्षरी कोषः भवः शिवः व्योमकेशो भवोभीमः स्थाणू रुद्र उमापतिरित्यमरः । **सुमनसः संगात्**—सुमनसः पुष्पाणि देवाश्च **निर्जरसेव्यः**—निर्जराः देवाः युवानश्च । आर्याच्छन्दः मालोपमाऽलङ्कारः ।

उपवने प्रिययोः परस्पराश्लेषमाह—

परिश्रमः क्वचन वृथा न कस्यचिद्
विधीयतां तदुचितमस्य कर्मणः ।
इति प्रिये वदति मनोभवातुरे
चिराय तं परिरभते विलासिनी ॥१८८॥

माधुरी—'कस्यचित् परिश्रमः क्वचन कुत्रापि न वृथा व्यर्थः (भवति) तद् अस्य रत्याख्यस्य कर्मणः उचितम् अनुरूपम् विधीयताम् क्रियताम् ।' इति मनोभवातुरे मनोभवेन कामेन आतुरे आकुले प्रिये वदति, विलासिनी, कामिनी चिराय बहुकालं परिभते आलिङ्गति ।

हिन्दी अनुवाद—'किसी का परिश्रम कभी नहीं व्यर्थ होता है, अतः इस (रतिक्रीडा नामक) काय के अनुरूप आचरण करो ।' इस प्रकार कामाकुल प्रिय के कहने पर, कामिनी चिरकाल पर्यन्त (उसका) आलिङ्गन करती है ।

टिप्पणी—प्रियौ परस्परमालम्बनविभावौ, आलिङ्गनमनुभावः आतुरतादि-सञ्चारी भावः, रतिः स्थायीभावः, सम्भोगशृङ्गाररस ध्वनिः । रुचिराच्छन्दः ।

उपवने शठनायकस्याचरणमाह—

तल्पे चाम्पेयपुष्पप्रकरविरचिते कान्त केयं न काचित्
पादौ पश्यामि तस्याः किशलययुगलं न्यस्तमेतद्द्रुमस्य ।
हस्तौ रक्तारविन्दद्वयमिह निहितं वेणिरेषा न भृङ्ग-
श्रेणिः स्वर्णप्रभामित्यपलपति शठः प्रेयसीमन्यवध्वाः ।१८९।

माधुरी—[शठो नायकः ज्येष्ठायाः नायिकायाः प्रेयसीं सुन्दरीम् अपह्नुते । ताम् अवलोक्य तदीया ज्येष्ठा नायिका पृच्छति—] **कान्त ! चाम्पेयपुष्पप्रकरविरचिते** चम्पापुष्पसमूहनिर्मिते **तल्पे** शयनपर्यङ्के इयम् का ? **उत्तरम्—काचित् न** । **प्रश्नः—यस्याः पादौ पश्यामि** । **उत्तरम्—एतद् द्रुमस्य किशलययुगलम्** **प्रश्नः—हस्तौ** । (पश्यामीति शेषः) **उत्तरम्**—इह रक्तारविन्दद्वयं **निहितं** स्थापितम् । **प्रश्नः—एषा वेणिः** चूडापाशः । **उत्तरम्—न, भृङ्गश्रेणिः** मधुकरपंक्तिः । **इति** एवम् **स्वर्णप्रभाम्** स्वर्णसदृश-कान्तिम् **प्रेयसीम्** प्रियतमाम् **अन्यवध्वाः** ज्येष्ठानायिकायाः अपलपति निगूहति ।

हिन्दी अनुवाद—[शठनायक ज्येष्ठनायिका से अपनी प्रियतमा को इस प्रकार छिपा रहा है । नायिका दूसरी सुन्दरी को देखकर पूछती है—]

प्रश्न—हे कान्त ! चम्पा के फूलों के समूह से निर्मित पर्यङ्क में यह कौन है ?

उत्तर—कोई नहीं ।

प्रश्न—(मैं) जिसके दो पैर देख रही हूँ । **उत्तर**—ये वृक्ष के दो किसलय हैं ।

प्रश्न—दो हाथ (देख रही हूँ) । **उत्तर**—यहाँ पर दो लाल कमल रखे हैं ।

प्रश्न—यह चोटी है । **उत्तर**—नहीं, (यह) भ्रमरों की पंक्ति है ।

इस प्रकार [वह शठनायक अपनी] स्वर्ण के समान प्रभ वाली प्रेयसी को दूसरी (ज्येष्ठा) नायिका से छिपा रहा है।

टिप्पणी—चाम्पेयः—चाम्पेयः केसरो नागकेसरः काञ्चनाह्वयः इत्यमरः **अपलपति**—निह्नुते सुप्रलापः सुवचन मपलापस्तु निह्नव इत्यमरः **शठः**—शठो मध्यस्थपुरुषे धूर्त्ते धत्तूरकेऽपि चेति धरणिः। स्रग्धराच्छन्दः अपह्नुतिरलङ्कारः।

सुप्तायाः कस्याश्चिन्नायिकायाः पुलकं सख्याः परिहासं च वर्णयति—

काचिद्विधायसुतनुः कुसुमावचायं
सुप्ता श्रमेण निहितं कुतुकेन सख्या।
बालप्रवालमुपनीवि निभालयन्ती
भूयो बिभर्ति पुलकं स्मृतकान्तपाणिः॥१६०॥

माधुरी—काचित् सुतनुः—सुन्दरी [तस्मिन्नुपवने] **कुसुमावचायम्** कुसुमसञ्चयं **विधाय** कृत्वा **श्रमेण** खेदात् **सुप्ता** [सती], **सख्या**आल्या **कुतूकेन** कौतुहलेन **उपनीवि** नीव्याः समीपम् (अव्ययी०) **निहितम्** स्थापितं **बालप्रवालम्** नवीनरक्तपत्रम् **निभालयन्ती** आदर्शयन्ती **स्मृतकान्तपाणिः** स्मृता कान्तस्य प्रियस्य पाणिः यया सा (बहु०) **भूयः** **पुलकम्** रोमाञ्चं **बिभर्ति** धारयति।

हिन्दी अनुवाद—कोई सुन्दरी [उस उपवन में] पुष्पों की शय्या रचकर (रति क्रीडाजन्य) थकान से सोई हुई, सखी के द्वारा खेल में ही नीवी (साड़ी की गाँठ) के पास रखे गये नवीन किसलय को निरखती हुई, प्रिय के करतल का स्मरण कर, पुनः रोमाञ्च को धारण करती है।

टिप्पणी—**कुतुकेन**—कौतूहलं कौतुकं च कुतुकं च कुतूहलमित्यमरः **बालप्रवालम्**—नवीनरक्तपत्रं प्रवालमंकुरेऽप्यस्त्रीत्यमरः **नीवी**—नीवीं ग्रन्थिं विदुर्धीरा नारीजघनवासस इति धरणि। **कैशिकीवृत्तिः वैदग्ध्ययुक्तं नर्म वसन्ततिलका वृत्तं स्मरणालङ्कारः।**

उपवने प्रिययोः नर्मालापमाह—

उद्यानेऽमृतमुद्वमन्ति विरुतव्याजात्कुतः कोकिलाः।
स्वामिन्नत्र निपीय नक्तमुदितात्पीयूषभानोः प्रिये!
किं मुग्धेयमिति प्रतारयसि मां पश्य प्रतीति न चेद्
बिंबे चन्द्रमसस्तदेव पिबतस्तानेव लक्ष्मच्छलात्॥१६१॥

माधुरी—प्रिया—स्वामिन् ! अत्र उद्याने अस्मिन् वने कोकिलाः पिकाः विरुतव्याजात् ध्वनिव्याजात् अमृतम् उद्वमन्ति उद्गिरन्ति [एतत्] कुतः !

प्रियः—हे प्रिये ! नक्तम् रात्रौ उदितात् पीयूषभानोः चन्द्रात् [अमृतं] निपीय पीत्वा (तदेवोद्वमन्ति ।)

प्रिया—किम् इयं मुग्धा अज्ञा इति मां प्रतारयसि वञ्चयसि ।

प्रियः—चेत् यदि प्रतीतिः विश्वासः न, चन्द्रमसः बिम्बे मण्डले लक्ष्मच्छलात् कलङ्कव्याजेन तान् कोकिलान् एव तदेव अमृतमेव पिबतः पश्य ।

हिन्दी अनुवाद—प्रिया—स्वामिन् ! इस उपवन में कोयल बोलने के बहाने अमृत उगलते हैं । (यह) कैसे ?

प्रिय—हे प्रिये ! रात में उदय को प्राप्त (निकले हुये) चन्द्रमा से (अमृत) पीकर ।

प्रिया—क्या यह अनजान है, इसलिये मुझे धोखा दे रहे हो ।

प्रिय—यदि विश्वास नहीं है तो चन्द्रमण्डल में कलङ्क के रूप में उनको ही उसी (अमृत) को ही पीते हुये देखो ।

टिप्पणी—निपीय—(नि √ पा + क्त्वा → ल्यप्) पीयूषभानोः—पीयूषम् अमृतमेषामिति पीयूषाः (पीयूष + अच्) भानवः यस्य सः चन्द्रः तस्य (बहु०) मनोरञ्जकालापान्नर्मभाषितमिदम् यथा च 'कादम्बर्याम् नर्मप्रायाभिः कथाभिः' । शार्दूलविक्रीडितं छन्दः अपह्नुतिरलङ्कारः ।

कामियुग्मस्य क्रीडापर्वते विहारं वर्णयति—

इन्दुर्नाथ निरीक्ष्यतां कथमितः सम्पृक्तसान्द्रद्रुमे
दिक्चक्रे मम कौतुकं तव गिरा भूयस्तदालोकने ।
जल्पन्तीमिति कामिनीं कलयति क्रीडाचलारोहणं
कश्चित्पञ्चशरार्दितोमधुनिशिज्योत्स्नाविहारोत्सुकः ॥१६२॥

माधुरी—पञ्चशरार्दितः—कामबाणपीडितः मधुनिशि चैत्ररात्रौ ज्योत्स्नाविहारोत्सुकः चन्द्रिकायां विहाराय उत्सुकः कश्चित् प्रियः 'हे नाथ ! सम्पृक्तसान्द्रद्रुमे सम्पृक्ताः संयुक्ताः सान्द्राः घनीभूताः द्रुमाः यस्मिन् तत्तस्मिन् (बहु०) दिक्चक्रे दिङ्मण्डले इतः अस्मात्प्रदेशात् इन्दुः चन्द्रमाः कथम् निरीक्ष्यताम् दृश्यताम् । तदालोकने तस्यालोकनाय भूयः पुनः तव गिरा कथनेन मम कौतुकम् (जातमिति शेषः)' इति

एवं जल्पन्तीं वदन्तीं कामिनीम् कामपर्याकुलां प्रियां क्रीडाचलारोहणं क्रीडापर्वतारोहणं कलयति प्रेरयति। (ततः चन्द्रदर्शनं सुकरमिति भावः।)

हिन्दी अनुवाद—काम के बाणों से पीड़ित, चैत की रात की चाँदनी में विहार करने का अभिलाषी कोई प्रिय 'हे नाथ ! संयुक्त होने से घनीभूत द्रुम वाली दिशाओं के घेरे में यहाँ से चन्द्रमा कैसे देखूँ ? उसे देखने के लिये पुन: तुम्हारे कथन से मुझे उत्कंठा हो गई है।' ऐसा कहती हुई कामाकुल प्रिया को (चन्द्रदर्शनार्थं) क्रीडापर्वत में चढ़ने की प्रेरणा दे रहा है। (वहाँ से चन्द्रमा आसानी से दिखाई पड़ेगा, यह भाव है)।

टिप्पणी—पञ्चशरार्दितः—उन्मादनस्तापनश्च शोषणः स्तम्भनस्तथा। सम्मोहनश्च कामस्य पञ्च बाणाः प्रकीर्तिताः। पञ्च शराः यस्य सः (बहु०) कामः तेनार्दितः पीडितः अर्दितं याचकेऽपि स्याद् वातव्याधौ च हिंसिते इति हैमः। शार्दूलविक्रीडितं छन्दः संयोगशृङ्गाररसोऽत्र व्यङ्ग्यः।

श्रीरामस्य केलिशैलस्य वर्णनं करोति—

राजन् वृन्दारकाद्रिं तुलयति भवतः केलिशैलः श्रियासौ
शिल्पीन्द्रैः सम्प्रणीतो विहरणविपिने यन्निविष्टः स्वभासा।
सूते सन्ध्यामकालेऽप्यरुणमणिगणः क्वापि दर्शत्रियामां
क्वापिश्यामाश्मराशिःशशिमणिनिकरःक्वापिराकानिशीथम्॥१६३॥

माधुरी—हे राजन् ! भवतः विहरणविपिने उपवने शिल्पीन्द्रैः श्रेष्ठैः कारुभिः सम्प्रणीतः असौ प्रसिद्धः केलिशैलः क्रीडापर्वतः श्रिया सम्पत्त्या वृन्दारकाद्रिम् वृन्दारकाणाम् देवानाम् अद्रिः पर्वतः तम् सुमेरुम् तुलयति समीकरोति। यन्निविष्टः यस्मिन् मन्दिरे व्यवस्थितः अरुणमणिगणः माणिक्यसमूहः स्वभासा निजेन प्रकाशेन क्वापि कुत्रचित् अकाले अपि सन्ध्याम् सूते श्यामाश्मराशिः नीलमणिगणः क्वापि दर्शत्रियामाम् अमावास्यारात्रिम् [तथा] शशिमणिनिकरः चन्द्रकान्तमणिराशिः क्वापि राकानिशीथम् पूर्णमासीरात्रिम् (सूते इति शेषः)

हिन्दी अनुवाद—हे राजन् ! आपके विहार वन में श्रेष्ठ शिल्पियों के द्वारा निर्मित क्रीडापर्वत सम्पत्ति में सुमेरु की बराबरी करता है। जिस मन्दिर में व्यवस्थित रूप से रखे गये मानिक मणियों का समूह अपने प्रकाश से कहीं पर असमय मे भी सन्ध्या काल को उत्पन्न करता है। नीले मणियों का ढेर कहीं पर अमावास्या की रात्रि को तथा चन्द्रकान्त मणियों का गण कहीं पर पूर्णिमा की रात्रि को [पैदा करता है।]

टिप्पणी—राका—पौर्णमासी तु पूर्णिमा । कलाहीने सानुमतिः पूर्णे राका-निशाकरे इत्यमरः । स्रग्धराच्छन्दः, उदात्तालङ्कारः !

श्रीरामस्य क्रीडाशैले निर्मितं मयूरं वर्णयति—

आकलय्य कलापिनं मकरध्वजाधिकमञ्जुलम्
त्वद्विहारमहीधरे विविधामलोपलनिर्मितम् ।
स्फाटिके शिखरे शरज्जलदोऽयमित्युदितभ्रमो
मौनमेष न मुञ्चतीति न कस्य चेतसि निश्चयः ॥१६४॥

माधुरी—त्वद्विहारमहीधरे तव क्रीडापर्वते **विविधामलोपलनिर्मितम्** विविधाः अनेकप्रकाराः अमलाः निर्मलाः ये उपला रत्नानि तैः निर्मितम् **मकरध्वजाधिकमञ्जुलम्** मकरस्य ध्वजो यस्य सः कामः तस्मादधिको मञ्जुलः सुन्दरः तम् **कलापिनं** मयूरम् आकलय्य दृष्ट्वा **कस्य** दर्शकस्य **चेतसि** निश्चयः ज्ञानं न (भवति, यत्) एषः **स्फाटिके शिखरे, अयं** शरज्जलदः शरत्कालीनो मेघः इति उदितभ्रमः उदितो भ्रमो यस्य सः (बहु०) सन् **मौनं न मुञ्चति** नादं न करोति । (स मयूरो मणिनिर्मितोऽपि सन् जीवन्मयूर इव मेघस्य भ्रमात् एव न नदति । तस्य सत्यासत्यविवेको विद्यते इति भावः ।]

हिन्दी अनुवाद—[हे राम !] आपके क्रीड़ापर्वत में विविध निर्मल रत्नों से निर्मित कामदेव से भी अधिक कान्त मयूर को देखकर, किस (दर्शक) के चित्त में यह निश्चय नहीं होता कि, यह (मयूर) स्फटिकमणि निर्मित शिखर में, 'यह शरत्कालीन मेघ है' ऐसा भ्रम होने पर बोलता नहीं है । (सभी दर्शक यह जानते हैं कि यह वस्तुतः जीवित मयूर है तथा मेघ का भ्रम होने से ही यह नहीं बोल रहा है ।)

टिप्पणी—मञ्जुलम्—कान्तं मनोहरं रुच्यं मनोज्ञं मंजु मञ्जुलमित्यमरः **स्फाटिके**—स्फाटिकः सूर्यकान्तः स्यादर्काश्मा दहनोपल इत्यभिधानरत्नमालायाम् । **विबुधप्रियाच्छन्दः**, वृत्त्यनुप्रासो भ्रान्तिमांश्चालंकारौ ।

श्रीरामस्यारामगिरेः सूर्यकान्तमणिमयीम् भूमिं वर्णयति—

त्वद्विहारगिरौ मही मिहिरोपलेन विनिर्मिता
विश्वतस्तपनोदयज्वलितेन भाति कृशानुना ।
वारिणा शरदागमाधिकनिर्मलेन समुल्लसत्
पुण्डरीकरजोभरव्यतिषंगिणीव तरंगिणी ॥१६५॥

माधुरी—[हे राम !] **त्वद्विहारगिरौ** तव विहारपर्वते **मिहिरोपलेन** सूर्यकान्तमणिना **विनिर्मिता मही** भूमि **विश्वतः** सर्वतः **तपनोदयज्वलितेन** तपनः सूर्यः तस्योदयस्तेन ज्वलितेन **कृशानुना** अग्निना **शरदागमाधिकनिर्मलेन** शरदः आगमेन निमलेन **वारिणा** जलेन **पुण्डरीकरजोभरव्यतिषंगिणी** पुण्डरीकस्य कमलस्य रजसः परागस्य भरः समूहस्तस्य व्यतिषङ्गः मिश्रणं तद्वती **तरङ्गिणी** नदी इव **भाति** शोभते ।

हिन्दी अनुवाद—[हे राम] आपके विहारपर्वत में सूर्यकान्तमणि से निर्मित भूमि (फर्श) सर्वत्र सूर्य के उदय से जलती हुई अग्नि से, शरद् ऋतु के समय निर्मल जल से (युक्त) कमल के पराग के समूह से मिश्रित नदी की तरह शोभित हो रही है ।

टिप्पणी—तपनः-भानुर्हंसः सहस्रांशुस्तपनः सविता रविरित्यमरः **व्यतिषंगिणी**—व्यतिषङ्गः (वि अति√सञ्ज+घञ्) सञ्जातः अस्या इति व्यतिषंग+इनि+ङीप् **तरङ्गिणी**—सिन्धुः स्रवन्ती तटिनी तरङ्गिणी नदी धुनी निर्झरिणी च निम्नगेत्यभिधानरत्नमालायाम् । विबुधप्रियाच्छन्दः उपमालङ्कारः ।

आरामपर्वतभित्तेर्वर्णनं करोति—

स्फटिकोपलभित्तिरदूरदलद्-
बहुरागलताविलसत्कुसुमैः ।
प्रतिबिम्बगतैस्तुलयत्यचले
नवचित्रदुकूलतिरस्करिणीम् ॥१६६॥

माधुरी—[हे राम !] **अचले** (क्रीडा) शैले **प्रतिबिम्बगतैः** प्रतिच्छायाश्रितैः **बहुरागलताविलसत्कुसुमैः** बहुरागवद्भिः लतासु विलसद्भिः कुसुमैः [युक्ता] **स्फटिकोपलभित्तिः** स्फटिकमणिनिर्मितम् कुड्यम् **नवचित्रदुकूलतिरस्करिणीम्** नवचित्रयुतां दुकूलस्य **तिरस्करिणीम्** जवनिकाम् **तुलयति** ।

हिन्दी अनुवाद—[हे राम ! आपके क्रीडा—] पर्वत में, लताओं से शोभित अनेक रंग के फूलों के प्रतिबिम्ब से युक्त, स्फटिकमणिनिर्मित दीवाल ; नवीन चित्रों वाली रेशमी जवनिका (कनात) की समता करती है ।

टिप्पणी—**बहुरागलताविलसत्कुसुमैः**—बहवो रागाः येषां तानि (बहु०) लतासु विलसन्ति यानि कुसुमानि तैः **प्रतिबिम्बम्**—प्रतिमानं प्रतिबिम्बं प्रतिमा प्रतिच्छाया प्रतिकृतिरिति समानार्थाः **तिरस्करिणी**—प्रतिसीरा जवनिका स्यात्तिरस्करिणी च सेत्यमरः । **तोटकवृत्तम्** उपमालङ्कारः ।

श्रीरामस्य क्रीडाशैले लीलामयूरं वर्णयति—

धरित्रीभृति प्रावृषीहोपलौघ-
त्विषा चित्रया पातितोऽन्तःस्फुरन्त्या ।
न संलक्ष्यते नृत्यपर्यस्तपिच्छः
समीपं गतेनापि लीलामयूरः ॥१६७॥

माधुरी—[भो राम !] इह अस्मिन् धरित्रीभृति क्रीडापर्वते प्रावृषि वर्षाकाले स्फुरन्त्या निर्गच्छन्त्या चित्रया बहुवर्णया उपलौघत्विषा मणिसमूहकान्त्या अन्तःपातितः अन्तःप्रवेशितः नृत्यपर्यस्तपिच्छः नृत्ये पर्यस्तानि विकीर्णानि पिच्छानि यस्य सः (बहु०) लीलामयूरः समीपं गतेन अपि [पुरुषेण] न संलक्ष्यते परिचीयते ।

हिन्दी अनुवाद—[हे राम !] इस क्रीड़ापर्वत में वर्षाकाल में मणियों के समूह की कान्ति के भीतर प्रवेश करने से उससे युक्त, नृत्य में अपने पंखों को छिटकाये हुये क्रीडामयूर समीप गये हुये भी पुरुष के द्वारा नहीं पहिचाना जाता है । (क्रीडापर्वत की मणियों की निकलती हुई बहुरंगी चमक के भीतर वह नर्तन करता हुआ मयूर पड़ गया है अतः दर्शक उसे नहीं पहिचान पाता है ।)

टिप्पणी—प्रावृषि—स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षा इत्यमरः । पिच्छम्—शिखा चूडा शिखण्डस्तु पिच्छबर्हे नपुंसके इत्यमरः । लीलामयूरः लीलायै इति लीलार्थः स चासौ मयूरः (उत्तर०) अथवा लीलायाः मयूरः (ष० तत्०) भुजंगप्रयातं छन्दः सामान्यालंकारः ।

श्रीरामक्रीडापर्वतस्य मणिमयानि शृङ्गाणि वर्णयति—

वर्त्म सुराणामिदमिति केलिगिरिस्ते मनोज्ञमणिशृंगः ।
व्योम निजद्युतिलहरीविचित्रपट्टांशुकावृतं तनुते ॥१६८॥

माधुरी—[हे राम !] ते मनोज्ञमणिशृंगः सुन्दरमणिशिखरः केलिगिरिः 'इदम् सुराणां वर्त्म मार्गः, इति हेतोः निजद्युतिलहरीविचित्रपट्टांशुकावृतम् निजद्युति-लहरीणां स्वकान्तितरङ्गाणां विचित्रं पट्टांशुकम् दुकूलं तेन आवृतं व्योम आकाशं तनुते विस्तारयति । (येन देवानामातपक्लेशो न स्यात् ।)

हिन्दी अनुवाद—[हे राम !] तुम्हारा मणिमयशिखरों वाला क्रीड़ापर्वत 'यह देवताओं का मार्ग है ।' इस कारण अपनी कान्ति की तरंगों के महीन रेशमी वस्त्र से आच्छादित आकाश को तान देता है । (जिससे देवों को घाम न लगे ।)

टिप्पणी—मनोज्ञमणिशृङ्गः—मनोज्ञानि मणीनां शृङ्गाणि यस्य सः (बहु०) व्योम—नभोऽन्तरिक्षं गगनमनन्तं सुरवर्त्म खमित्यमरः। गीतिश्छन्दः काव्यलिङ्गमलङ्कारः।

भूयोऽपि क्रीडाशैलं वर्णयति—

नृप स्वर्णदुर्वर्णसन्दोहसृष्टे
न दर्भोद्‌गमस्तोयवाहागमेऽपि ।
महानीलरश्मिप्ररोहैरजस्रं
भवत्केलिशैले तदुल्लासलक्ष्मीः ॥१९९॥

माधुरी—हे नृप ! स्वर्णदुर्वर्णसृष्टे स्वर्णम् हिरण्यं दुर्वर्णम् रूप्यं च ताभ्यां सृष्टे निर्मिते भवत्केलिशैले भवतः क्रीडापर्वते तोयवाहागमे तोयवाहो मेघस्तस्यागमे वर्षाकाले अपि दर्भोद्‌गमः कुशोत्पत्तिः न (भवतीति शेषः।) (परम्) महानीलरश्मिप्ररोहैः इन्द्रनीलमणिकिरणांकुरैः तदुल्लासलक्ष्मीः तेषां दर्भाणाम् उल्लासस्य उद्‌गमस्य लक्ष्मीः सुषमा (दृश्यते इति शेषः।)

हिन्दी अनुवाद—हे राजन् ! सोने तथा चाँदी से बनाये गये आपके क्रीडापर्वत में वर्षाकाल में भी कुशों की उत्पत्ति नहीं [होती है। परन्तु] इन्द्रनीलमणि की किरणों के अंकुरों से उन (कुशों) के निकलने की शोभा [दिखाई पड़ती है।]

टिप्पणी—स्वर्णम्—स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकमित्यमरः। दुर्वर्णम्—दुर्वर्णस्त्रिष्वसद्वर्णे क्लीबं मैरेयरूप्ययोरिति मेदिनीकारः संदोहः—समूहनिवहव्यूहसन्दोहविसरव्रजाः इत्यमर.। भुजंगप्रयातं छन्दः अनुप्रासालंकारः।

वर्षाकाले क्रीडापर्वतशिखरशोभां वर्णयति—

साम्भसा जलधरेण सङ्गतसानुरस्य धवलाश्मनिर्मितः ।
प्रेमसंवलितशार्ङ्गधन्वनस्तुल्यतां वहति नीलवाससः ॥२००॥

माधुरी—[हे राम !] अस्य भवदीयक्रीडापर्वतस्य धवलाश्मनिर्मितः श्वेतमणिरचितः साम्भसा सजलेन जलधरेण मेघेन सङ्गतः सहितः सानुः शिखरं यस्य सः (बहु०) प्रेमसंवलितशार्ङ्गधन्वनः प्रेम्णा संवलितः संश्लेषितः शार्ङ्गधन्वा कृष्णः येन सः तस्य (बहु०) नीलवाससः बलभद्रस्य तुल्यतां समत्वं वहति धारयति।

हिन्दी अनुवाद—हे राम ! आपके इस क्रीडापर्वत का स्फटिकमणि से निर्मित [तथा] सजलमेघ के सहित शिखर प्रेमपूर्वक कृष्ण को लिपटाये हुये बलराम की समता कर रहा है।

टिप्पणी—शार्ङ्गधन्वनः शार्ङ्गं धनुर्यस्य सः (बहु०) तस्य 'धनुषश्च' (अष्टा० ५-४-१३२) सूत्रेण सकारस्यानङादेशः **नीलवाससः**—नीलं वासो यस्य सः (बहु०) तस्य नीलाम्बरो रौहिणेयस्तालांको मुशली हलीत्यमरः। **रथोद्धतावृत्तम्** उपमालंकारः।

क्रीडापर्वतनिर्माणकौशलकथनपूर्वकं श्री रामचरितं वर्णयति—

किं निर्माय सिताश्मना शितिमणिस्तम्बेरमेण त्वया
सम्पृक्तः परभागलुब्धमतिना न्यस्तोऽस्य वैरी हरिः।
तूष्णीमास्स्व रघूद्वहे नरपतौ कः केन वैरायते
क्रीडाद्राविति जल्पतोस्तव गिरः सौख्याय नः शिल्पिनोः।२०१।

माधुरी—[क्रीडाद्रौ क्रीडाशैले एकः शिल्पी द्वितीयं कथयति—]

हे शिल्पिन् ! '**परभागलुब्धमतिना** गुणोत्कर्षलोभेन **त्वया, शितिमणिस्तम्बेरमेण** नीलमणिनिर्मितेन हस्तिना **सम्पृक्तः** संयुक्तः **अस्य वैरी हरिः** सिंहः **सिताश्मना** स्फटिकमणिना **निर्माय** विरच्य **किं न्यस्तः** स्थापितः।' [तदा द्वितीयः प्रथमं उत्तरयति—]

'**तूष्णीम् आस्स्व** तिष्ठ, **रघूद्वहे** रघुकुलश्रेष्ठे **नरपतौ** महाराजे **कः केन वैरायते** वैरं करोति।' सर्वे प्राणिनो निर्वैराः सन्तीति शाश्वतिकविरोधिनोः सिंहगजयोरपि मैत्री जाता तथा च तयोरेकत्र न्यासो युज्यते।)

इति जल्पतोः वदतोः **तव शिल्पिनोः गिरः** वाचः **नः सौख्याय** [स्युः।]

हिन्दी अनुवाद—[हे राम ! आपके क्रीडापर्वत में एक शिल्पी दूसरे से कहता है—]

[हे कारीगर !] 'अधिक सुन्दरता लाने के लोभ वाले तुमने, नीलम से बनाये गये हाथी से मिला हुआ उसका बैरी सिंह स्फटिकमणि से रचकर क्यों जड़ दिया है।' [इस पर दूसरा मिस्त्री पहले से कहता है—]

चुप रहो, रघुकुलशिरोमणि भगवान् राम के राजा होने पर कौन किससे वैर करता है, (सभी प्राणी वैर रहित हैं, अतः जन्मजात विरोधी सिंह व गज में भी मित्रता हो गई है। अतः उन दोनों को पास-पास बैठाना उचित है।)

इस प्रकार कहते हुये, आपके दोनों मिस्त्रियों की बातें हम सब के लिये श्रेयस्कर हों।

टिप्पणी—**स्तम्बेरमः**—मतंगजो गजो नागः कुञ्जरो वारणः करी। इभः स्तम्बेरमः इत्यमरः स्तम्बे वृक्षादीनां काण्डे गुल्मे वा रमते (√रम् + अच् अलुक् समासः)

सूत्र 'तत्पुरुषे कृति बहुलम्' (अष्टा० ६–३–१४) 'स्तम्बेरमाः मुखरशृङ्खलकर्षिणस्ते, (रघु० ५–७२) परभागलुब्धमतिना—परो भागस्तस्मिन् लुब्धा मतिर्यस्य स तेन (बहु०) वैरायते वैरं करोति (वैर+क्यङ्) सूत्र 'शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे' (अष्टा० ३-१-१७) श्रीरामचरित्रस्यानुपमतारूपवस्तुध्वनिः । शार्दूलविक्रीडितं छन्दः, असंगतिरलङ्कारः ।

श्रीरामस्य विहारवने क्रीडाशैलस्य मणिप्रकाशं वर्णयति—

कुर्मश्छायां जनस्येत्यहिमकरमहः संनिरुद्ध्यात्मसृष्टै-
र्गुप्तं गाढैस्तमोभिः फलमिह तरवो नार्थिनं दर्शयन्ति ।
इत्युक्तिं दुर्जनानां तव विहृतिवने नूनमश्रोतुकामः
शैलः श्रीभिर्मणीनां रचयति रजनीमप्यसौ मध्यमह्नः ॥२०२॥

माधुरी—[भो राम !] 'वयम् अहिमकरमहः सूर्यतेजः संनिरुद्ध्य अपवार्य जनस्य छायां कुर्मः (वृक्षाः न) इति इह आरामे तरवः आत्मसृष्टैः स्वनिर्मितैः गाढैः तमोभिः, गुप्तम फलम् अर्थिनं याचकं न दर्शयन्ति ।' इति (च) दुर्जनानाम् उक्तिम् कथनम् नूनम् अश्रोतुकामः श्रोतुम् अनिच्छुकः असौ शैलः मणीनां श्रीभिः कान्तिभिः रजनीम् रात्रिम् अपि अह्नः दिनस्य मध्यं रचयति करोति ।

हिन्दी अनुवाद—[हे राम ! 'हम लोग] सूर्य के घाम को रोककर मनुष्यों को छाया प्रदान करते हैं, ऐसे (तथा) इस उपवन में वृक्ष स्वनिर्मित गाढ़ अन्धकार से छिपाये गये फल को याचकों को नहीं दिखलाते हैं ।' दुष्टों के ऐसे कथन को निश्चय ही न सुनने की इच्छा वाला यह पर्वत मणियों की कान्ति से रात को भी मध्याह्न बनाता है ।

टिप्पणी—**अहिमकरमहः**—न हिमाः इति अहिमाः अशीताः (उष्णाः) कराः यस्य सः अहिमकरः सूर्यस्तस्य महस्तेजः महो हर्षो महस्तेज इति धरणिः **आत्मसृष्टैः**—आत्मना सृष्टैः निर्मितैः सृष्टं स्यान्निर्मिते भुक्ते भुरिनिश्चितयोरपीति धरणिः । स्रग्धरावृत्तम् उत्प्रेक्षालङ्कारः ।

श्रीरामस्य विहारशैलस्यानुत्तमतां कथयति—

स्तूपयति त्रिदशाद्रिं तृणयति तत्र प्ररूढममरतरुम् ।
इह केलीशैलवरे वीर मुहूर्त्तं विहृत्य विश्रान्तः ॥२०३॥

माधुरी—हे वीर ! इह अस्मिन्नारामे केलीशैलवरे श्रेष्ठे क्रीडापर्वते मुहूर्त्तं

क्षणं विहृत्य भ्रान्त्वा विश्रान्तः (जनः) त्रिदशाद्रिम् त्रिदशानां देवानाम् अद्रिः पर्वतस्तं स्तूपयति निन्दति तत्र प्ररूढम् जातम् अमरतरुम् कल्पवृक्षं तृणयति तृणमिव करोति ।

हिन्दी अनुवाद—हे वीर ! आपके इस उपवन में, श्रेष्ठ क्रीडापर्वत में क्षणभर भ्रमण कर श्रम को दूर करनेवाला व्यक्ति सुमेरु की निन्दा करता है (तथा) उसमें उत्पन्न कल्पवृक्ष को तिनके के समान गिनता है ।

टिप्पणी—स्तूपयति—√स्तूप् (निन्दायाम्) + लट् (प्र० ए० व०) तृणयति—तृणमिव करोतीति (तृण् + णिच्) 'तत्करोति तदाचष्टे' (वार्तिकम्) गीतिश्छन्दः व्यतिरेकालंकारः ।

इत्यारामवर्णना समाप्तिमगात् ।

अथ श्रीरामस्य यशोवर्णना

श्रीरामस्य यशसो बहूपमानोल्लेखपूर्वकं वर्णनं करोति—

क्षीरक्षीराब्धिजेन्द्रद्विरदशरद्वारिदव्यालराज-
श्रीखण्डस्यन्दकुन्दद्रुतरजतसुधास्वर्धुनीस्पर्धिनीभिः ।
पुण्याभिः पूरयन्तं जगदनवरतं कीर्तिभिः कान्तमूर्ते
वागीशाः केऽपि धन्या दशमुखदमन त्वामुपश्लोकयन्ति ॥२०४॥

माधुरी—हे कान्तमूर्ते ! कान्ता शोभना मूर्तिः यस्य स तत्सम्बोधने दशमुख-दमन ! रावणारे ! केऽपि सौभाग्यशालिनः धन्याः वागीशाः कवयः क्षीरक्षीराब्धि-जेन्द्रद्विरदशरद्वारिदव्यालराजश्रीखण्डस्यन्दकुन्दद्रुतरजतसुधास्वर्धुनीस्पर्धिनीभिः क्षीरं दुग्धम् क्षीराब्धिजं मौक्तिकम् इन्द्रद्विरदरदः ऐरावतदन्तः शरद्वारिदः शरत्कालीनो मेघः व्यालराजः वासुकिः श्रीखण्डस्यन्दः चन्दनरसः कुन्दं कुन्दपुष्पं द्रुतरजतं द्रवीभूतं रौप्यम् सुधा अमृतं स्वर्धुनी गंगा इत्येताः स्पर्धितुं शीलम् आसाम् इति (√स्पर्ध + णिनि + ङीप्) ताभिः पुण्याभिः मङ्गलप्रदाभिः कीर्तिभिः अनवरतं निरन्तरं जगत् विश्वं पूरयन्तम् पूर्णं कुर्वन्तं त्वाम् भवन्तम् उपश्लोकयन्ति स्तुवन्ति ।

हिन्दी अनुवाद—हे सुन्दर आकृति वाले ! रावण के शत्रु श्रीराम ! सौभाग्य-शाली पुण्यात्मा कवि दुग्ध मोती ऐरावत के दाँत शरत्कालीन मेघ वासुकिनाग चन्दनरस

कुन्दपुष्प द्रवीभूत रजत अमृत तथा गङ्गा से स्पर्धा करने वाली मङ्गलमयी कीर्तियों से निरन्तर विश्व को पूर्ण करते हुये आपकी स्तुति करते हैं।

टिप्पणी—**क्षीरम्**—क्षीरं नीरे च दुग्धे चेति धरणिः **क्षीराब्धिजम्**—क्षीराब्धिजं मौक्तिके स्यादिति धरणिः रदः—रदो विलेखने दन्ते इति धरणिः **श्रीखण्डः**—श्रीखण्डश्चन्दनोऽस्त्रियामित्यमरः। स्रग्धराच्छन्दः मालोपमालङ्कारः।

वन्दिगणाय श्रीरामस्य प्राज्यं दानं वर्णयति—

इत्युपश्लोकितः संसदा वन्दिना-
मेकवीरो विदेहात्मजावल्लभः।
तुष्टिमस्यास्ततानार्थदानाद्भृशं
यक्षजम्भद्विषल्लक्षलक्ष्मीधरः ॥२०५॥

माधुरी—वन्दिनां स्तुतिपाठकानां संसदा सभया इति एवम् **उपश्लोकितः** पद्यैः उपस्तुतः यक्षजम्भद्विषल्लक्षलक्ष्मीधरः यक्षः कुबेरः जम्भद्विषद् इन्द्रस्तयोर्लक्षं तस्य लक्ष्मीं धरति सः **एकवीरः** अद्वितीयवीरः **विदेहात्मजावल्लभः** जानकीशः **अर्थदानात्** धनं दत्त्वा अस्याः सभायाः (वन्दिसमूहस्य) भृशम् अत्यन्तं **तुष्टिं** प्रसन्नतां **ततान** अकरोत्।

हिन्दी अनुवाद—स्तुति करने वालों (चारणों) की सभा के द्वारा इस प्रकार श्लोक रचना के द्वारा प्रशंसित, लाखों कुबेर व इन्द्र की सम्पत्ति के स्वामी अद्वितीय वीर सीतापति [श्रीराम] ने धन देकर उस चारणसभा को अत्यन्त सन्तुष्ट किया।

टिप्पणी—उपश्लोकितः—श्लोकैः उपस्तुतः पद्ये यशसि च श्लोकः इत्यमरः संसदा—समज्यापरिषद्गोष्ठी सभासमितिसंसदः इत्यमरः **यक्षजम्भद्विषल्लक्षम्**—उत्तराशापतिर्यक्षः कुबेरो नरवाहन इत्यभिधानरत्नमालायाम् जम्भभेदी हरिहयः स्वाराण्नमुचिसूदनः इत्यमरः। लक्षं छद्मनि विख्यातं लक्षं संख्यातसंख्ययोरिति धरणिः। **स्रग्विणी छन्दः** अनुप्रासालंकारः।

वन्दिपरिषदा धनप्राप्तेरनन्तरं रामस्तुतिं वर्णयति—

तुष्टाप्यदोऽधिगतवित्तभरैर्निकामम्
तुष्टाव वन्दिपरिषत्पुनरेव रामम्।
झङ्कारमुज्झति कदापि न षट्पदाली
फुल्लद्रुमार्पितमधुद्रवतुन्दिलाऽपि ॥२०६॥

माधुरी—अदोऽधिगतवित्तभरैः श्रीरामप्राप्तधनसमूहैः निकामं पर्याप्तं तुष्टा प्रसन्ना अपि वन्दिपरिषत् चारणसभा पुनः एव रामं तुष्टाव प्रशशंस फुल्लद्रुमार्पितमधुद्रवतुन्दिला विकसितवृक्षप्रदत्तमकरन्दातितृप्ता अपि षट्पदाली षट्पदानां मधुकराणाम् आली पङ्क्तिः कदापि झङ्कारं गुञ्जनं न उज्झति त्यजति । [मधुकराणां गुञ्जनमिव वन्दिनां स्तवनं नैसर्गिकमिति भावः ।]

हिन्दी अनुवाद—श्री रामचन्द्र से प्राप्त धन समूह से अत्यन्त प्रसन्न भी चारणों की परिषद् ने फिर भी श्रीराम को स्तुति की। विकसित वृक्षों से प्रदत्त मकरन्द से तृप्त भी मधुकर श्रेणी कभी भी गुञ्जन को नहीं त्यागती है। [मधुकरों के गुञ्जन की तरह वन्दियों का स्तुतिकार्य स्वाभाविक होता है यह व्यङ्ग्य है।]

टिप्पणी—अदोऽधिगतवित्तभरैः—अमुष्मादधिगताः ये वित्तानां भराः राशयस्तैः (कर्म०) फुल्लद्रुमार्पितमधुद्रवतुन्दिला—फुल्लो यो द्रुमस्तेनार्पितो यो मधुनो द्रवस्तेन तुन्दिला (तत्०) तुन्दिलस्तुन्दिभस्तुन्दी बृहत्कुक्षिः पिचण्डिलः इत्यमरः। इन्द्रवज्रावृत्तम् दृष्टान्तालंकारः।

श्रीरामस्य यशसोऽनुपमतां कथयति—

कर्पूरद्विपदन्तनिर्जरसरिड्डिण्डीरहीरस्फुरन्
मार्त्तण्डोपलपुण्डरीकनिकराः कीर्तेः पुरस्तात्तव ।
नीलीरागतडागमग्नमहिषप्रेङ्खद्विषाणत्विषो
लक्ष्यन्ते क्षितिनाथ तां तुलयितुं केन प्रगल्भामहे ॥२०७॥

माधुरी—हे क्षितिनाथ ! भूपते ! तव कीर्तेः पुरस्तात् समक्षं कर्पूरद्विपदन्तनिर्जरसरिड्डिण्डीरहीरस्फुरन्मार्त्तण्डोपलपुण्डरीकनिकरः कर्पूरः द्विपदन्तः निर्जरसरिड्डिण्डीरः स्वर्गङ्गाफेनः हीरः स्फुरन् मार्त्तण्डोपलः सूर्यकान्तमणिः पुण्डरीकम् एतेषां निकराः समूहाः नीलीरागतडागमग्नमहिषप्रेङ्खद्विषाणत्विषः नीलीरागस्य तडागस्तस्मिन् मग्नो यो महिषस्तस्य प्रेङ्खन्ती या विषाणस्य त्विड् कान्तिस्तद्वत् त्विड् येषा ते (बहु०) (हीनाः) लक्ष्यन्ते प्रतीयन्ते (अतः) ताम् केन वस्तुना तुलयितुं समीकर्तुं प्रगल्भामहे धृष्टतां कुर्मः। (तव यशसो धवलता सर्वश्रेष्ठा नोपमानमस्ति तस्या इति व्यञ्जना)

हिन्दी अनुवाद—हे भूपते ! आपकी कीर्ति के सामने कपूर हाथी दाँत आकाश गंगा का फेन हीरा चमकती हुयी सूर्यकान्तिमणि तथा श्वेत कमल के समूह; नील के रंग के तालाब में डूबे हुये भैंसे के सींगों की फैलती हुई कान्ति वाले (हीन) प्रतीत होते हैं [हम लोग] उस कीर्ति की किस वस्तु से समानता करने की धृष्टता करें। (तुम्हारे यश की धवलिमा का कोई भी उपमान नहीं है यह भाव व्यक्त होता है।)

टिप्पणी—नीलीरागः—नीली काली क्लीतकिका ग्रामीणा मधुपर्णिकेत्यमरः (नील के पौधे का रंग) **विषाणम्**—विषाणं द्विरदक्रोडदन्ते शृङ्गे पशोरपीति धरणिः । **प्रगल्भामहे**—प्र√गल्भ्+लट् (उ० पु० ब० व०) । शार्दूलविक्रीडितं छन्दः विरोधालंकारः ।

श्रीरामस्य यशसः कैरवेभ्यः उत्कृष्टतामाह—

खंडितं भुवि न क्वचिद्दलजालसंवलितात्मभिः
पुण्यपुञ्जसमुद्भवं पृथुपङ्कराशिसमुत्थितैः ।
सूरिभिर्विततीकृतं शशिना जडेन विकाशितै-
र्जानकीश यशः कथं तव कैरवैरनुगम्यते ॥२०८॥

माधुरी—हे जानकीश ! सीतापते ! भुवि पृथिव्यां क्वचित् न खण्डितम् विभक्तं **पुण्यपुञ्जसमुद्भवम्** पुण्यसमूहे सञ्जातं **सूरिभिः** पण्डितैः **विततीकृतम्** विस्तारितं **तव यशः दलजालसंवलितात्मभिः** पत्रसमूहेनावृतैः [खण्डैः निर्मितैः] **पृथुपंकराशिसमुत्थितैः** महति पंकराशौ समुत्पन्नैः [महापापजातैः] **जडेन** शीतलेन [मूर्खेण] **शशिना** चन्द्रेण **विकाशितैः कैरवैः** कुमुदैः **कथम् अनुगम्यते** समीक्रियते (कुमुदराशिर्हीनत्वात्तव यशोभिः समतां कर्तुं नार्हतीतिभावः ।)

हिन्दी अनुवाद—हे सीतापते ! जो पृथ्वी में अखण्डित है, पुण्य कर्मों से उत्पन्न हुआ है तथा पण्डितों द्वारा फैलाया गया है । ऐसा आपका यश पत्तों [टुकड़ों] के समूह से आवृत, अत्यधिक पंक के ढेर में [पाप की राशि में] उत्पन्न तथा शीतल [मूर्ख] चन्द्रमा के द्वारा विकाशित किये गये कुमुदों के द्वारा कैसे सदृश किया जा सकता है । (आपके यश तथा कुमुदराशि में जन्म से ही महान् भेद है अतः दोनों में उपमानोपमेयभाव की कल्पना अनुचित है ।)

टिप्पणी—दलजातसंवलितात्मभिः—दलानां पत्राणां खण्डानां वा जातं समूहस्तेन संवलितः आत्मा येषां ते तैः (बहु०) **सूरिभिः**—स्यात्सूरिः पण्डितः प्राज्ञ इत्यभिधानरत्नमालायाम् । **जडेन**—जडो मूर्खे हिमग्रस्ते इति धरणिः । **विबुधप्रियाच्छन्दः** विरोधालङ्कारः ।

सूर्यस्य हिमराशिनाशादि कार्यं सहेतुकमुत्प्रेक्षते—

आशु प्रालेयराशिं गमयति विलयं म्लापयत्योषधीशम्
भानुर्भूयः कृशानुं किरति निजकरेण स्वकान्तोपलेऽपि ।
उन्निद्रं कैरवं यन्नयति मुकुलतामेष तदेव मन्ये
त्वज्जन्मोज्जृम्भितस्वान्वयबहलयशःपूरवैशद्यदर्पात् ॥२०९॥

माधुरी—हे देव ! एषः भानुः सूर्यः यत् प्रालेयराशिं हिमसमूहम् आशु शीघ्रं विलयं गमयति विनाशयति, ओषधीशं चन्द्रं म्लापयति म्लानं करोति निजकरेण स्वकिरणेन [हस्तेन] भूयः स्वकान्तोपले सूर्यकान्तमणौ अपि कृशानुम् अग्निं किरति विक्षिपति उन्निद्रं विकसितं कैरवं कुमुदं मुकुलतां नयति कलिकाकारं करोति तत् कार्यजातं त्वज्जन्मोज्जृम्भितस्वान्वयबहलयशःपूरवैशद्यदर्पात् तव जन्मना उज्जृम्भितं प्रवृद्धं यत् स्वान्वयस्य स्वकुलस्य बहलम् अत्यधिकं यशस्तस्य पूरस्य प्रवाहस्य वैशद्यं नैर्मल्यं तस्य दर्पः गर्वस्तस्मात् मन्ये [इति] उत्प्रेक्षे ।

हिन्दी अनुवाद—हे देव ! ये सूर्य भगवान्, जो पाला की राशि को शीघ्र ही नष्ट कर देते हैं, चन्द्रमा को मलिन बना देते हैं, अपने किरण [हाथ] से सूर्यकान्ति-मणि में भी अग्नि को बिखेर देते हैं (तथा) विकसित कुमुद को कली के रूप का (संकुचित) कर देते हैं। यह सब कार्य आपके जन्म से बढ़े हुये, अपने (सूर्य के) कुल के अत्यधिक यश के प्रवाह की निर्मलता के घमण्ड के कारण करते हैं; ऐसी सम्भावना करता हूँ।

टिप्पणी—**प्रालेयम्**—अवश्यायस्तुनीहारस्तुषारस्तुहिनं हिमम् । प्रालेयं मिहिका-चेत्यमरः **ओषधीशः**—विधुः सुधांशुः शुभ्रांशुरोषधीशोनिशापतिरित्यमरः । (प्रायः समुन्नतिदर्पान्नरः पूर्वं स्वशत्रुं विनाशयति ततः स्वाश्रितं हीनवर्णं कुरुते तदनन्तरं निजालङ्कारम् दहति तत्पश्चात् स्वाश्रिताश्रितं विनाशयति । निजवंशवृद्धिगर्वितः सूर्यः तथैवाचरति । स्रग्धरावृत्तम् उत्प्रेक्षालङ्कारः ।

श्रीरामयशसो धवलतां वर्णयति—

अभ्यवहरतु मृणालं पिबतु पयो मज्जतु त्रिपथगायाम् ।
दाशरथे तव कीर्तिं धवलतया नानुयाति हंसकुलम् ॥२१०॥

माधुरी—हे दाशरथे ! श्रीराम ! हंसकुलम् हंसानां कुलम् मृणालम् कमलनाल-तन्तुम् अभ्यवहरतु भक्षयतु पयः दुग्धं पिबतु त्रिपथगायाम् गंगायाम् मज्जतु [तथापि] धवलतया श्वेतगुणेन तव कीर्तिम् न अनुयाति अनुसरति ।

हिन्दी अनुवाद—हे दशरथनन्दन राम ! हंसों का समूह चाहे मृणाल (कमल के डंठल का रेशा) खाय, दूध पिये तथा गंगा में डुबकी लगाये तो भी सफेदी में आपकी कीर्ति का अनुसरण नहीं कर सकता है।

टिप्पणी—**त्रिपथगा**—भागीरथी त्रिपथगा त्रिस्रोता भीष्मसूरपीत्यमरः । **गीतिश्छन्दः अतिशयोक्तिरलङ्कारः ।**

श्रीरामस्य यशसो रजतापेक्षया शुभ्रतरतामाह—

भूपालप्रवर त्वदीयशसा पर्वण्यखर्वार्चिषो
निःशेषः शिशिरद्युतेर्धवलिमा यल्लीलया लुण्टितः ।
तेनासौ सपदि प्रसाद्य कुमुदं संवर्ध्य दुग्धाम्बुधिं
भूतेशं कलया विभूष्य निजया तेभ्यस्तमादित्सते ॥२११॥

माधुरी—हे भूपालप्रवर ! भूपतिवर ! **पर्वणि** पूर्णिमायाम् **अखर्वार्चिषः** प्रवृद्धकान्तेः **शिशरद्युतेः** चन्द्रस्य **निःशेषः** पूर्णः **धवलिमा** श्वेतगुणः **यत्** **त्वदीयशसा** तव कीर्त्या **लीलया** अनायासेन **लुण्टितः** अपहृतः तेन कारणेन **असौ** सः **सपदि** शीघ्रमेव **कुमुदं** (विकासेन) **प्रसाद्य** प्रसन्नं कृत्वा **दुग्धाम्बुधिम्** क्षीरसमुद्रं **संवर्ध्य** **भूतेशं** शंकरं **निजया** **कलया** निजांशेन **विभूष्य** अलंकृत्य **तेभ्यः** सर्वेभ्यः **तम्** धवलिमानम् **आदित्सते** आदातुमिच्छति ।

हिन्दी अनुवाद्—हे भूपालश्रेष्ठ ! पूर्णिमा तिथि में पूर्णकान्तिमान् चन्द्रमा की सम्पूर्ण शुभ्रता को आपके यश ने बिना श्रम के ही लूट लिया है । इस कारण वह शीघ्र ही कुमुद को (विकसित कर) प्रसन्न कर, क्षीर समुद्र को बढ़ाकर तथा शंकरजी को अपनी कला से विभूषित कर उन सबसे (अपनी) धवलिमा को लेना चाहता है । [कुमुद के विकास आदि कार्यो मे चन्द्रमा के हेतु व्यङ्ग्य है ।)

टिप्पणी—पर्वण्यखर्वार्चिषः—अष्टमी, चतुर्दशी, पूर्णिमा, अमावस्या, संक्रान्तिश्च पर्वतिथयः तस्मिन् अखर्वार्चिषः अखर्वम् अर्चिर्यस्य स तस्य आदित्सते—आ √दा + सन् । शार्दूलविक्रीडितं छन्दः काव्यलिङ्गालङ्कारध्वनिः ।

श्रीरामस्य यशसो रजतापेक्षया शुभ्रतरतामाह—

ब्रूमः किं भवतो यशांसि रजतैस्तुल्यानि तानि स्वतो
व्यक्तं राघववंशवारिधिविधो ज्ञातान्तराणि त्वया ।
पूर्वेषामिह न व्ययं विषहसे स्वल्पं यदन्यानि तु
क्षिप्तं विप्रकवीन्द्रवृन्दभवने क्षिप्यन्न विश्राम्यसि ॥२१२॥

माधुरी—हे राघववंशवारिधिविधो ! रघुकुलसागरोदितचन्द्र ! **भवतः** **यशांसि** **रजतैः** **तुल्यानि** [तद्विषये वयम्] **किं** **ब्रूमः** कथयामः । **व्यक्तम्** स्पष्टं, **त्वया** **तानि** यशोरजतानि **ज्ञातान्तराणि** ज्ञातम् अन्तरं येषां तानि (बहु०) । **इह** **यत्** **पूर्वेषां** यशसां **स्वल्पं** **व्ययं** क्षयं **न** **विषहसे** कर्तुं समर्थः, तु **अन्यानि** रजतानि **क्षिप्रं** शीघ्रं

विप्रकवीन्द्रवृन्दभवने विप्राणां कवीन्द्राणाञ्च वृन्दस्य समूहस्य भवने क्षिप्यन् प्रक्षिपन् न विश्राम्यसि ।

हिन्दी अनुवाद— हे रघुकुलसागर चन्द्र ! आपकी कीर्तिराशि चाँदी के ढेर की तरह है [उसके विषय में हम सब] क्या कहें । स्पष्ट रूप से आपने दोनों का भेद जान लिया है । जिससे प्रथम [यश] का थोड़ा भी विनाश [आपको] सह्य नहीं है तथा दूसरे [रजतों] को अतिशीघ्र ब्राह्मण तथा महाकवियों के समूह के घरों में फेंकते हुये नहीं थकते हो ।

टिप्पणी—राघववंशवारिधिविधो—राघवस्य वंशम् एव वारिधिस्तस्मिन्नुद्गतो विधुस्तत्सम्बोधने । शार्दूलविक्रीडितं छन्दः रूपकालङ्कारः ।

श्रीरामस्य यशसो वर्णनं करोति—

क्षीरोदत्येष तारापरिवृढधवलस्तावकः कीर्तिपूर-
स्तस्यान्तःपातिमूर्तिः पतिरवनिभृतां नागराजत्यजस्रम् ।
एतत्तस्योपरिष्टान्मृगमदमलिनच्छायमम्भोधराणां
वृन्दं निद्राणपद्मारमणति धरणीपालसङ्घार्चिताङ्घ्रे ।२१३॥

माधुरी—हे धरणीपालसंघार्चिताङ्घ्रे ! भूपतिवृन्दपूजितपाद ! एषः तारापरिवृढधवलः चन्द्रशुभ्रः तावकः तव कीर्तिपूरः यशःप्रवाहः क्षीरोदति क्षीरसागर इवाचरति । तस्यान्तःपातिमूर्तिः अन्तर्गतदेहः अवनिभृतां पर्वतानाम् पतिः हिमवान् अजस्रं निरन्तरं नागराजति नागराजः शेषः इवाचरति । तस्य उपरिष्टात् एतत् मृगमदमलिनच्छायं मृगमदः कस्तूरिका तद्वन्मलिना छाया कान्तिर्यस्य तत् (बहु०) अम्भोधराणां वृन्दं निद्राणपद्मारमणति निद्राणः शयितो यः पद्मारमणो विष्णुः स इवाचरति ।

हिन्दी अनुवाद—हे राजसमूहार्चितचरण ! आपका चन्द्रवत् शुभ्र यह कीर्ति-सरोवर क्षीर सागर के समान है । उसके अन्दर घुसा हुआ हिमालय निरन्तर शेषनाग के समान बना है । उसके ऊपर कस्तूरी के समान काली चमक वाला मेघसमूह लेटे हुये विष्णु के समान बन रहा है ।

टिप्पणी—क्षीरोदति, नागराजति तथा निद्राणपद्मारमणत्येते नामधातु-प्रयोगाः सन्ति । क्षीरोदः, नागराजः, निद्राणपद्मारमणः इवाचरतीति विग्रहे एभ्यः क्विप्प्रत्ययः 'सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः (वार्तिकम्) स्रग्धरावृत्तम् मालोपमालङ्कारः ।

हेतुनिर्देशपुरस्सरं श्रीरामस्य यशसो वर्णनं करोति—

निर्यातः प्रातरस्तं गतवति गगनाद् बान्धवे कैरवाणाम्
कश्चित्क्रन्दन्तमुच्चैर्मुकुलितकुमुदाबद्धदारं द्विरेफम् ।
दृष्ट्वा दीनं दयालुः सपदि रघुपते तद्विकाशाय गायन्
भूयो दिक्चक्रवालं धवलयति भवत्कीर्तिचन्द्रातपेन ॥२१४॥

माधुरी—हे रघुपते ! प्रातः कैरवाणां बान्धवे चन्द्रे अस्तं गतवति निर्यातः पर्यटन् **कश्चिद् दयालुः** मुकुलितकुमुदाबद्धदारम् मुकुलितं यत् कुमुदं तस्मिन् आबद्धाः अवरुद्धाः दाराःयस्य स तम् (बहु०) **दीनम् द्विरेफं** भ्रमरं **दृष्ट्वा सपदि** शीघ्रमेव **तद्विकाशाय** तस्य कुमुदस्य विकाशार्थं **गायन् दिक्चक्रवालं** दिङ्मण्डलम् **भूयः भवत्कीर्तिचन्द्रातपेन** भवतः कीर्तिरेव चन्द्रातपः ज्योत्स्ना तेन (कर्म०) **धवलयति** विशदीकरोति । (तेन कुमुदविकासे मधुकरीसंयोगान्मधुकरस्य दैन्यनाशो व्यज्यते ।

हिन्दी अनुवाद—हे रघुपते ! प्रातःकाल चन्द्रमा के अस्त हो जाने पर घूमता हुआ कोई दयालु, संकुचित कुमुद में जिसकी प्रिया बन्द है, ऐसे दीन भ्रमर को देखकर, शीघ्र ही उसके विकाश के लिये; गीत गाता हुआ दिङ्मण्डल को पुनः आपकी कीर्तिरूपिणी चन्द्रिका से श्वेत बना रहा है । (उससे कुमुद के विकसित होने पर मधुकरी के मिलने से मधुकर की दीनता का नाश व्यक्त होता है ।

टिप्पणी—दयालुः—स्युर्दयालुः कारुणिकः कृपालुः सूरतः समा इत्यमरः । मधुकरदैन्यविनाशपूर्वकप्रियासंयोगरूपवस्तुध्वनिः स्रग्धरावृत्तम् रूपकालङ्कारः ।

सिद्धांगनाभिः श्रीरामयशोवर्णनं क्रियते—

ग्रीष्मप्रोषितनिर्झरेषु बहुशः शृंगेषु भूमीभृतां
मध्येवासरमूष्मभिः परिचिताः सिद्धांगनानां गणाः ।
सद्यः प्रस्रुतचन्द्रकान्तसलिलैर्निर्वातुकामाः मुहु-
र्गायन्तीन्दुमहःसहोदरमिह श्रीराघव त्वद्यशः ॥२१५॥

माधुरी—श्रीराघव ! भूमीभृतां पर्वतानां ग्रीष्मप्रोषितनिर्झरेषु ग्रीष्मेण प्रोषिताः शुष्काः निर्झराः येषु तेषु **बहुशः शृंगेषु** मध्येवासरं मध्याह्ने **ऊष्मभिः परिचिताः** व्याप्ताः **सिद्धाङ्गनानां गणाः** समूहाः **सद्यः** तत्क्षणमेव **प्रस्रुतचन्द्रकान्तसलिलैः** प्रस्रुतः अतिशयेन द्रुतो यश्चन्द्रकान्तमणिस्तस्य सलिलैः जलैः **निर्वातुकामाः** शैत्याभिलाषिणः **इह** अत्र स्थलेषु **इन्दुमहःसहोदरं** चन्द्रसदृशं **त्वद्यशः** तव कीर्तिम् **गायन्ति** ।

हिन्दी अनुवाद—श्रीराम जी ! पर्वतों के, ग्रीष्म ऋतु के कारण सूखे हुये झरनों वाले बहुत से शिखरों में, दोपहर के समय गरमी से व्याप्त सिद्ध रमणियों के समूह, तत्क्षण पिघली हुई चन्द्रकान्तमणि के जल से शीतलता चाहते हुये, उन स्थानों में चन्द्रमा के समान आपके यश का गान करते हैं।

टिप्पणी—मध्येवासरम्—वासरस्य मध्ये (अव्य०) निर्वातुकामाः—निर्वातुम् कामयमानाः इन्दुमहःसहोदरम्—इन्दोर्महस्तस्य सहोदरम् (तत्०) शार्दूलविक्रीडितं छन्दः उपमालकारः।

श्रीरामस्य यशसः सर्वत्र व्याप्तिमाह—

वीर क्षीराब्धिवीचीधवलिमलहरीचौर्यचातुर्यभाजि
प्रातर्गीते त्वदीये यशसि जनतया शुक्लयत्याशु विश्वम्।
नक्तं रक्तं कथञ्चित्पुरि पुरि रजकैरर्पितं यद्दुकूलं
तस्मिन् हंसायमाने वितरति न वणिग्वेतनं रञ्जनायाः ॥२१६॥

माधुरी—हे वीर ! क्षीराब्धिवीचीधवलिमलहरीचौर्यचातुर्यभाजः क्षीरस्याब्धिः तस्य वीच्यस्तरङ्गास्तासां धवलिम्नः शुभ्रतायाः लहरीणां चौर्यस्य चातुर्यं भजते (भज्+ क्विप् अकारस्य दीर्घः) त्वदीये यशसि प्रातः गीते आशु शीघ्रं विश्वं शुक्लयति श्वेतं कुर्वति [सति] पुरि पुरि नगरे नगरे रजकैः कथञ्चित् रक्तं नक्तं रात्रौ यद् दुकूलम् क्षौमं वस्त्रम् अर्पितम् दत्तम् तस्मिन् हंसायमाने हंस इवाचरति श्वेते जायमाने वणिक् व्यवसायी रञ्जनायाः वेतनं द्रव्यं न वितरति ददाति।

हिन्दी अनुवाद—हे वीर ! क्षीरसागर की लहरों की धवलिमा (सफेदी) की तरङ्गों की चोरी करने में चतुर (उनके समान श्वेत) तुम्हारे यश के प्रातःकाल गाये जाने पर [उसके द्वारा] विश्व के शुक्ल (सफेद) कर देने पर, नगर नगर में धोबियों के द्वारा किसी प्रकार रंगे गये जो रेशमी वस्त्र रात में दिये गये थे। उस वस्त्रराशि के श्वेत हो जाने पर, वणिक् (व्यवसायी) रँगने का वेतन [उन्हें] नहीं दे रहे है।

टिप्पणी—शुक्लयति—शुक्लं करोतीत्यर्थे शुक्ल+णिच् शतृप्रत्यये शुक्लयन् तस्मिन् हंसायमाने हंस इवाचरतिहंस+क्यङ् शानच्प्रत्यये हंसायमानस्तस्मिन् स्रग्धराच्छन्दः अनुप्रासो भ्रान्तिमांश्चालङ्कारौ।

श्रीरामस्य यशसः पर्वते प्रसारं सयुक्तिकं कथयति—

त्वामायान्तं निशम्य क्षितिरमण निजत्राणहेतोर्विपक्षस्
त्वत्कीर्त्यासाद्य शैलं कमपि धवलितं गीतया किन्नरीभिः।
दिग्वासाः शीतभीतस्तुहिनगिरिरसावित्यमुं नारुरोह
क्षिप्रं तावत्त्वदीयैस्तरलिततुरगैराशु बन्दीकृतोऽपि ॥२१७॥

माधुरी—हे क्षितिरमण ! भूपते ! दिग्वासाः नग्नः शीतभीतः [तव] विपक्षः शत्रुः त्वाम् आयान्तं निशम्य श्रुत्वा निजत्राणहेतोः स्वरक्षार्थम् किन्नरीभिः गीतया त्वत्कीर्त्या देवगायिकाभिर्गीतेन तव यशसा धवलितं श्वेतं कमपि शैलम् पर्वतम् आसाद्य प्राप्य, असौ तुहिनगिरिः हिमवान् इति अमुं पर्वतं क्षिप्रम् न आरुरोह। तावत् त्वदीयैः तव तरलिततुरगैः (आगत्य) आशु बन्दीकृतः अपि। (चञ्चलाश्वारोहिणस्तावदागत्य तं बन्दिम् अकुर्वन्नित्यर्थः।)

हिन्दी अनुवाद—हे भूपते ! [आपका] नग्न व शीत से डरा हुआ शत्रु आपको आता हुआ सुनकर, अपनी रक्षा के लिये, किन्नरियों के द्वारा गाये गये तुम्हारे यश से श्वेत किसी पर्वत में पहुँच कर 'यह हिमालय है' इस कारण उसमें शीघ्र नहीं चढ़ा। तब तक आपके सैनिकों ने शीघ्रगामी अश्वों से पहुँच कर उसे बन्दी भी बना लिया।

टिप्पणी—किन्नरीभिः—देवजातीयगायिकाभिः कुत्सितो नरः इति किन्नरः (गति स०) स्त्री० किन्नर+ङीप् (तृ० ब० व०) दिग्वासाः—दिशो वासांसि यस्य सः नग्नोऽवासा दिगम्बरः इत्यमरः। **स्रग्धरावृत्तम् भ्रान्तिमानलंकारः।**

श्रीरामस्य यशसा शत्रुघातं वर्णयति—

गायन्त्या वनदेवतापरिषदा तादृक् त्वदीयं यशः
कोऽपि क्वापि धराधरो धवलिमक्षीराम्बुधौ मज्जितः।
तस्मिन्नाजिपराजितस्तव रिपुः क्ष्माचक्रशक्रभ्रम-
न्नभ्यर्णे हरिणा वलक्षिमभरालक्ष्येण घिग्भक्षितः ॥२१८॥

माधुरी—हे क्ष्माचक्रशक्र भूमण्डलाधीश्वर ! तादृक् उत्तमं त्वदीयं यशः गायन्त्या वनदेवतापरिषदा—वनदेवतानां सभया क्वापि कोऽपि धराधरः पर्वतः धवलिमक्षीराम्बुधौ शुभ्रतायाः क्षीरसागरे मज्जितः मग्नः (श्वेतसर्वाङ्गोऽभवदित्यर्थः।) तस्मिन् पर्वते आजिपराजितः आजौ युद्धस्थले पराजितः तव रिपुः भ्रमन् वलक्षिमभरालक्ष्येण श्वैत्यसमूहे तिरोहितेन हरिणा सिंहेन भक्षितः [इति] धिक् निन्दनीयम् तस्य कर्म।

हिन्दी अनुवाद—हे चक्रवर्तिन् ! आपके शुभ्र यश का गान करती हुई वन-देवियों की सभा के सहित कहीं पर कोई पर्वत धवलता के क्षीरसागर में मग्न हो गया। (वह पर्वत सर्वाङ्गश्वेत हो गया यह भाव है।) उस पर्वत में युद्ध स्थल मे पराजित (होकर) घूमता हुआ, आपका शत्रु धवलिमा (सफेदी) के समूह में अलक्षित सिंह के द्वारा खा डाला गया (आ के यश के द्वारा शत्रु का इस प्रकार भक्षण किया जाना निन्दनीय है)

टिप्पणी—वनदेवतापरिषदा—सहयोगं विनापि तृतीयाविभक्तिः क्ष्माचक्रशक्र—क्ष्मायाः चक्रम् तस्य शक्रः इन्द्रस्तत्सम्बोधने धवलिमा वलक्षिमा—धवलवलक्षौ समानार्थौ तयोर्भावः धवल + इमनिच् तथा वलक्ष + इमनिच् श्वैत्यमित्यर्थः । शार्दूलविक्रीडितं छन्दः अनुप्रासालङ्कारः । व्याजप्रशंसा व्यङ्ग्या ।

श्रीरामेण स्वशत्रूणां मुक्ताप्राप्तिपूर्वकं तस्य कीर्तिलाभं वर्णयति—

गुरुद्रविणगर्विताः समरसीमरत्नापणाद्
विकृष्य तव विद्विषो विगलदश्रुपूरप्लुताः ।
निसर्गतरलैर्बलात्क्वचन वञ्चकैर्निन्यिरे
नरेश कलितास्ततो विमलकीर्तिमुक्तास्त्वया ॥२१९॥

माधुरी—हे नरेश ! गुरुद्रविणगर्विताः गुरुणा द्रविणेन बलेन गर्विताः विगलदश्रुपूरप्लुताः विगलन्तो ये अश्रवस्तेषां पूरः प्रवाहस्तस्मिन् प्लुताः मग्नाः तव विद्विषः शत्रवः निसर्गतरलैः निसर्गेण स्वभावेन तरलैः चञ्चलैः वञ्चकैः शृगालैः समरसीमरत्नापणाद् समरस्य सीमा एव रत्नानाम् आपणस्तस्मात् (कर्म०) बलाद् विकृष्य अपहृत्य क्वचन अज्ञातप्रदेशे निन्यिरे नीताः । ततः तदनन्तरं विमलकीर्तिमुक्ताः विमलकीर्तय एव मुक्ताः (कर्म०) त्वया कलिताः प्राप्ताः । [रत्नापणेऽपि वञ्चकैः धूर्तैः गुरुद्रविणगर्विताः धनातिशयेन गर्विताः अज्ञातस्थले नीत्वा बध्यन्ते तेषां मौक्तिकादि चापहृत्य ते स्वगणमुख्यायार्पयन्तीत्युभयोः रूप्यरूपकभावो युज्यते]

हिन्दी अनुवाद—हे नरेश ! अत्यधिक बल से गर्वित, बहते हुये आँसुओं के प्रवाह में डूबे हुये तुम्हारे शत्रु स्वभाव से चञ्चल शृगालों के द्वारा युद्धस्थल रूपी रत्नों के बाजार (सर्राफे) से बलपूर्वक अपहृत करके कहीं पर ले जाये गये । पश्चात् निर्मल कीर्तिरूपी मुक्ता आपको मिल गई । [सर्राफे में भी ठग अत्यन्त धनी पुरुषों को अज्ञात स्थल में ले जाते हैं (मार डालते हैं ।) तथा उनके मोती आदि रत्न अपने दल के मुखिया को दे देते हैं ।]

टिप्पणी—गुरुद्रविणगर्विताः—द्रविणो वित्तविक्रमाविति धरणिः वञ्चकैः—वञ्चकस्तु खले धूर्त्ते गृहबभ्रौ च जम्बुके इति विश्वमेदिन्यौ । पृथ्वीच्छन्दः रूपकालंकारः ।

श्रीरामस्य यशसो व्याप्तौ सर्वेषां श्वेतपदार्थानां हीनतामाह—

मुक्तासाराः शरदि जलदाः स्वर्धुनीवारिधाराः
जम्भारातिद्विरददशनाः क्षीरसिन्धूर्मिवाराः
हारास्ताराः रमणकिरणाः काशकुन्दाब्जकन्दाः
मन्दायन्ते यशसि भवतः श्वेतमाने जगत्याम् ॥२२०॥

माधुरी—[हे राम !] **भवतः यशसि जगत्याम्** पृथिव्यां **श्वेतमाने** विशदे भवति, **शरदि मुक्तासाराः** जलवर्षणरहिताः जलदाः मेघाः **स्वर्धुनीवारिधाराः** आकाशगंगायाः जलधाराः, **जम्भारातिद्विरददशनाः**, ऐरावतदन्ताः, **क्षीरसिन्धूर्मिवाराः** क्षीरसागरतरङ्गसमूहाः, **हाराः** मुक्तावल्यः, **ताराऱमणकिरणाः** चन्द्रमरीचयः, **काशकुन्दाब्जकन्दाः** काशपुष्पाणि, कुन्दपुष्पाणि, श्वेतकमलानि शंखाः मृणालानि च [एते सर्वे श्वेतपदार्थाः] **मन्दायन्ते** अल्पायन्ते शनैश्चरायन्ते वा ।

हिन्दी अनुवाद—[हे राम !] पृथ्वी में आपके यश के श्वेत होने (श्वेत होकर फैल जाने) पर, शरत्कालीन जलवृष्टि से रहित मेघ, आकाश गंगा के जल की धारायें, ऐरावत हाथी के दाँत, क्षीरसमुद्र की लहरों के समूह, मुक्ता की मालायें, चन्द्रमा की किरणें, काश तथा कुन्द के पुष्प, शंख, श्वेतकमल तथा कमलनाल [ये सभी श्वेत पदार्थ] अल्पकान्ति वाले हो जाते हैं [शनैश्चर की तरह मन्द गति के हो जाते हैं ।]

टिप्पणी—**मुक्तासाराः**—मुक्तः आसारः यैस्ते (बहु०) धारासम्पात आसारः इत्यमरः **जम्भारातिद्विरददशनाः**—जम्भस्यारातिः इन्द्रस्तस्य द्विरदः हस्ती ऐरावतस्तस्य दशनाः (तत्०) **क्षीरसिन्धूर्मिवाराः** क्षीरसिन्धोः ऊर्मयस्तरङ्गास्तेषां वाराः समूहाः वारस्त्ववसरे वृन्दे वारः सूर्यादिवासरे इति धरणिः । **अब्जकन्दाः** अब्जौ शंखशशांकौ चेत्यमरः । मृणालं स्याद् बिसं कन्दः इत्यभिधानरत्नमालायाम् **मन्दायन्ते** अमन्दाः मन्दाः भवन्ति (मन्द + क्यङ्) सूत्रम् 'भृशादिभ्यो भुव्यच्वे लोपश्च हलः' (अष्टा० ३-१-१२) मूढाल्पाऽपटवो मंदा इत्यमरः । मन्दः शनैश्चरे स्यादिति धरणिः । **मन्दाक्रान्तावृत्तम्** छेकानुप्रासः व्यतिरेकश्चालंकारौ ।

श्री रामस्य यशोरूपि क्षीरं वर्णयति—

त्वद्गोपालनतस्त्वया बहुयशःक्षीरम् नरेशार्जितम्
तत्र त्वद्द्विषदंगनाऽश्रुपयसां पातैर्न किञ्चित्कृतम् ।
सम्पृक्तोग्रभवत्प्रतापशिखिनि ब्रह्माण्डभाण्डे चिरं
न्यस्तं पीतमिदं न कैरिह पुनर्वैरस्यवार्ता कुतः ॥२२१॥

माधुरी—हे नरेश ! **त्वद्गोपालनतः** तव गोः पृथिव्याः सुरभेर्वा पालनेन **त्वया बहु यशःक्षीरम्** यशोरूपं क्षीरं दुग्धम् **अर्जितम्** सञ्चितमित्यर्थः । **तत्र** तस्मिन् यशोरूपिणि दुग्धे **त्वद् द्विषदंगनाऽश्रुपयसां पातैः** तव अरीणां (वधात्तेषाम्) अश्रुजलानां विन्दुभिः **किञ्चित् न कृतम्** न किमप्यम्लत्वम् आहितम् । **सम्पृक्तोग्रभवत्प्रतापशिखिनि** सम्पृक्तः यः उग्रः भवतः प्रतापः एव शिखी अग्निर्यस्मिन् तत्तस्मिन् (बहु०) **ब्रह्माण्डभाण्डे** ब्रह्माण्डमेव भाण्डं तस्मिन् भुवनभाजने **न्यस्तम्** इदं यशोदुग्धम् **इह** जगति **कैः न पीतम्**

(सर्वैरेव समास्वादितम्) [पुनः तस्य] वैरस्यवार्ता विरसतायाः चर्चा कुतः (विरसताया दोषो नैव भवितुं शक्नोतीत्यर्थः ।)

हिन्दी अनुवाद—हे नरेश ! अपनी पृथ्वी रूपिणी गाय का पालन करके आपने बहुत सा यश रूपी दुग्ध उपार्जित किया है । उसमें आपके शत्रुओं (के वध से उनकी) की ललनाओं के आँसुओं के गिरने से थोड़ा भी खट्टापन नहीं आया । आपके उग्र प्रताप रूपी अग्नि से संयुक्त ब्रह्माण्ड रूपी बर्त्तन में बहुत दिनों से रखे हुये उस यश रूपी दुग्ध को इस जगत् में किसने नहीं पिया । (सभी ने चिरकाल से आपके यश का वर्णन किया है ।) फिर उसके खराब हो जाने की चर्चा कैसी ? (आपका यश निर्दोष रहा है तथा रहेगा ।)

टिप्पणी—**गोपालनतः**—दिग्दृष्टि दीधिति स्वर्गवज्रवाग्बाणवारिषु । भूमौ पशौ च गोशब्दो विद्वद्भिर्दशसु स्मृतः इत्यभिधानरत्नमालायाम् । **ब्रह्माण्डभाण्डे**—मूले वणिग्धने भाण्डं, भाण्डं भाजनमिष्यते इति धरणिः । **किञ्चित्**—किञ्चिदीषन्मनागल्पे इत्यमरः । **वैरस्यम्**—विगतो रसो यस्मात् स विरसस्तस्य भावो वैरस्यम् । **शार्दूलविक्रीडितं** छन्दः रूपकालङ्कारः ।

श्रीरामस्य यशोराशेः शुभ्रतां वर्णयति—

त्वयाऽजनि यशोराशिश्चन्द्रहासकरेण यः ।
चन्द्रहासकरः सोऽपि नृपते नैतदद्भुतम् ॥२२२॥

माधुरी—हे **नृपते** ! **चन्द्रहासकरेण** खड्गसहितेन **त्वया यः यशोराशिः अजनि** उत्पादितः **सोऽपि चन्द्रहासकरः** चन्द्रवत् शुभ्रः [अस्ति] **एतत् अद्भुतम्** आश्चर्यकरं **न** (अस्तीतिशेषः) [यो यस्माज्जायते स जनकस्य गुणजातं गृह्णात्येवेति भावः ।]

हिन्दी अनुवाद—हे राजन् ! हाथ में तलवार लिये हुये आपने जिस यश के समूह को उत्पन्न किया है वह भी चन्द्रमा के समान मुस्कराने वाला (शुभ्र) है यह आश्चर्य नहीं है । [जो जिससे उत्पन्न होता है वह अपने जनक के गुणों को ग्रहण करता ही है ।]

टिप्पणी—**चन्द्रहासकरः**—चन्द्रहासः खड्गः करे यस्य सः (बहु०) अथवा चन्द्रस्य हासं शुभ्रत्वं करोतीति चन्द्रहास√कृ+अच् (उप० स०) अनुष्टुप्छन्दः यमकालङ्कारः ।

भूयोऽपि तदेव प्रक्रमते—

असितस्त्वद्यशोराशिरजनिष्ट रणेषु यः ।
कथं स पृथिवीपाल शरदिन्दुसहोदरः ॥२२३॥

माधुरी—हे पृथिवीपाल ! रणेषु यः असितः श्यामः त्वद्यशोराशिः तव यशसां समूहः **अजनिष्ट** जातः **सः कथं शरदिन्दुसहोदरः** शरच्चन्द्रतुल्यः श्वेतः इति विरोधः तत्परिहारपक्षे तु **असितः** इत्यस्य खड्गतः इत्यर्थः ।

हिन्दी अनुवाद—हे भूपते ! युद्धों में जो आपके असित (काले) यश की राशि उत्पन्न हुई है वह शरत्कालीन चन्द्रमा के समान कैसे हो सकती है ? [यह विरोध है उसके परिहारार्थ 'असितः' पद का 'खड्ग से' अर्थ करना चाहिये, तब अर्थ समीचीन होगा ।]

टिप्पणी—असितः—न सितः इत्यसितः असेर्जातो वा असि + तसिल् पूर्वार्थे विरोधः असितात् श्यामवर्णात्कथं श्वेतो भवति, द्वितीयार्थे च तत्परिहारः **शरदिन्दुसहोदरः**—शरदः इन्दुस्तस्य सहोदरः तुल्यवर्णं इत्यर्थः । अनुष्टुप्छन्दः **विरोधालंकारः** ।

शत्रूणामयशसा सह स्थितस्य श्रीरामयशसो वर्णनं करोति—

यत्र यत्र तव राम भूपते कीर्तिकैरववनी विजृम्भते ।
तत्र तत्र बहुशात्रवायशोभृङ्गसङ्गपरभागभागसौ ॥२२४॥

माधुरी—हे भूपते राम ! यत्र यत्र तव **कीर्तिकैरववनी** कीर्तिरेव कैरवाणां वनी (कर्म०) **विजृम्भते** वर्धते, **तत्र तत्र असौ** सा **बहुशात्रवायशोभृङ्गसंगपरभागभाग्** बहूनां शात्रवाणां शत्रूणाम् अयशांस्येव भृंगास्तेषां संगेन सम्पर्केण यः परभागः गुणोत्कर्षः तं भजते इति (भज् + क्विप्) भवतीति शेषः ।

हिन्दी अनुवाद—हे भूपते श्रीराम ! जहाँ जहाँ आपकी कीर्तिरूपिणी कुमुदवनी (जंगल) सुशोभित होती है, वहाँ वहाँ पर वह अनेक शत्रुओं के अयश रूपी मधुकरों के सम्पर्क से गुणोत्कर्षवती (अतिशयशोभा से सम्पन्न) रहती है ।

टिप्पणी—शात्रवः—द्विड्विपक्षाहितामित्रदस्युशात्रवशत्रवः इत्यमरः । **परभागः**—परः प्रकृष्टः भागः उत्कृष्टो गुणः 'तस्याः कपोले परभागलाभात्' (कुमार० ७–१७) रथोद्धताच्छन्दः रूपकालङ्कारः ।

वाल्मीकीये रामायणे वर्णितां रामकीर्तिं निर्दिशति—

यत्सुवर्णघटनामनोरमे न्यस्तमाद्यकविकाव्यसम्पुटे ।
कस्य नश्रुतिरुचिं तनोति तज्जानकीश तव कीर्तिमौक्तिकम् ।२२५॥

माधुरी—हे जानकीश ! यत् सुवर्णघटनामनोरमे सुवर्णानां सुवर्णस्य वा घटनया विन्यासेन मनोरमे आद्यकविकाव्यसम्पुटे आद्यः कविः वाल्मीकिस्तस्य काव्यसम्पुटे

न्यस्तम् स्थापितम्, तव तत् कीर्तिमौक्तिकम् कीर्तिरेव मौक्तिकम् कस्य जनस्य श्रुतिरुचि श्रुतेः कर्णस्य श्रोत्रेन्द्रियस्य वा रुचि शोभाम् अनुरागं वा न तनोति विस्तारयति ।

हिन्दी अनुवाद—हे सीतानाथ ? जो सुवर्णों की घटना (सुन्दर पद विन्यास) के कारण मन को अच्छे लगने वाले, आदि कवि (वाल्मीकि) के काव्य सम्पुट में स्थापित है; आपका वह यश रूपी मोती किस (श्रोता) के श्रोत्रेन्द्रिय के अनुराग को नहीं बढ़ाता है । [भगवान् का यश, जिसे महर्षि वाल्मीकि ने सुन्दर पद विन्यास के द्वारा अपनी रामायण में स्थापित किया है सभी श्रोताओं के अनुराग को बढ़ाता है जैसे सोने में जड़ा गया मोती कान की शोभा को बढ़ाता है । यह भाव है ।

टिप्पणी—श्रुतिरुचिम्—श्रुतिर्वेदे च कर्णे च श्रोत्रकर्मणि च श्रुतिरिति धरणिः । रुचिर्दीप्तौ च शोभायामभिष्वंगाभिलाषयोरिति धरणिः । रथोद्धतावृत्तम्, रूपकालंकारः ।

कुन्दकुसुमानां श्रीरामयशसा पराजयं वर्णयति—

गमितानि हासमुच्चैरनुवनमवनीश कुन्दकुसुमानि ।
न तव यशः सादृश्यं कथमपि शीतार्तिदायिना तपसा ।२२६।

माधुरी—हे अवनीश ! कुन्दकुसुमानि शीतार्तिदायिना शीतस्य दुःखं ददता तपसा माघेन तपस्यया वा उच्चैः हासं अत्यधिकं विकासं हासं वा गमितानि प्रापितानि । तव यशः सादृश्यं यशसः समानतां कथमपि न [गमितानीतिशेषः] (तपसा कोपि वृद्धिं कर्तुं शक्नोति न महतां सादृश्यं प्राप्तुमितिभावः ।)

हिन्दी अनुवाद—हे पृथ्वीपते ! कुन्द के पुष्प शीत (ठंडक) का कष्ट देने वाले माघ मास के द्वारा अधिक मात्रा में विकसित किये गये, परन्तु आपकी कीर्ति की समानता को नहीं पा सके । (कोई तपस्वी शीतादि का कष्ट देने वाले चान्द्रायण आदि तप से भौतिक विकास भले कर ले, परन्तु वह श्रीराम के यश के वर्णन में समर्थ नहीं हो सकता ; जैसे कुन्द के फूलों को माघ मास विकसित कर देता है परन्तु भगवान् के यश के समान नहीं बना पाता, इससे उन बेचारे फूलों को हँसी ही होती है ।)

टिप्पणी—तपसा—माघमासेन तपस्यया च । तपश्चान्द्रायणादौ स्यात्तथा शिशिरमाघयोः । तपो धर्मश्च लोकश्च जनलोकात्परस्तप इति धरणिः । गीतिश्छन्दः, श्लेषालंकारः ।

श्रीरामस्य सर्वव्यापिनीं कीर्तिमाह—

न कर्पूरासारः स्फुरति न सहस्रं हिमरुचां
न चापि क्षीराब्धिः क्षुभित उरुफेनस्तबकितः ।
द्रवीभावं जाता दिशि दिशि न दुर्वर्णगिरयः
समीकीर्णं कीर्त्या दशवदनहन्तुस्त्रिभुवनम् ।।२२७।।

माधुरी—जगतो धवलिम्नः कारणान्तरं निषिध्य तस्य हेतुं वक्ति-**कर्पूरासारः** कर्पूरस्य **धारावर्षणम् न** (भवति), **हिमरुचां** चन्द्राणां सहस्रं **न स्फुरति** द्योतते। **उरुफेनस्तबकितः** महाफेनसमूहयुक्तः **क्षीराब्धिः** क्षीरसागरः **चापि न क्षुभितः** आन्दोलितो (वर्तते) **दिशि दिशि** प्रतिदिशं **दुर्वर्णगिरयः** रजतपर्वताः कैलासादयः **द्रवीभावं न जाताः** न द्रुताः इत्यर्थः [अपितु] **दशवदनहन्तुः** रावणवधकर्तुः **कीर्त्या त्रिभुवनं समाकीर्णम्** व्याप्तम्। (तेनैव विश्वं श्वेतमानं भवति न पूर्वोक्तैः कारणैरितिभावः।)

हिन्दी अनुवाद—[कवि विश्व की धवलता के अन्य कारणों का निषेध कर श्रीराम की विश्व व्यापिनी कीर्ति को उसका मुख्य हेतु बता रहा है—]

कपूर की धारा रूप वर्षा नहीं हो रही है, हजारों चन्द्रमा भी नहीं चमकते हैं। महाफेन के समूह से भरा क्षीर सागर भी नहीं उफना रहा है [तथा] प्रत्येक दिशा में रजत के पर्वत भी नहीं पिघल रहे हैं [किन्तु] रावण के मारने वाले श्रीराम की कीर्ति से तीनों लोक व्याप्त हो रहे हैं। (उसी से विश्व धवलित है पूर्वोक्त कारणों से नहीं, क्योंकि अन्य कारण तो अवसर विशेष में हो सकते हैं, जैसे वर्षा विशेष ऋतु में, चन्द्रमा की चमक केवल रात्रि में, समुद्र का उफान पर्वों में तथा पहाड़ों का द्रवित होना ग्रीष्म काल में ही होता है। परन्तु भगवान् की कीर्ति की व्यापकता तो सार्वभौमिक व सार्वकालिक है। यह ध्वनि है।)

टिप्पणी—आसारः—धारासम्पातः दुर्वर्णगिरयः—रजतपर्वताः कैलाशादयः **शिखरिणी छन्दः अपह्नुतिरलंकारः। श्रीरामकीर्तेः सार्वभौमिकता सार्वकालिकता च** व्यङ्ग्या।

श्रीरामयशसः प्रकारान्तरेण हाराद्यपेक्षया श्रेष्ठतामाह—

जनकतनयाजाने यस्येदृशो भुवनत्रय-
भ्रमणपटिमा मूर्च्छत्यच्छात्मना यशसस्तव।
अनुसरतु तं मुक्ताहारः कथं मदमन्थरः
सुरपतिगजः पंके मग्नं मृणालकदंबकम् ॥२२८॥

माधुरी—हे **जनकतनयाजाने**! सीतापते! **यस्य तव अच्छात्मनो** निर्मलस्य **यशसः ईदृशः भुवनत्रयभ्रमणपटिमा** त्रिषु लोकेषु भ्रमणचातुर्यं **मूर्च्छति** वर्द्धते **तं मुक्ताहारः** मौक्तिकालंकृतः **मदमन्थरः** मदेन मन्थरगतिः **सुरपतिगजः** ऐरावतः **पंके मग्नं मृणालकदम्बकम्** विसवृन्दं च कथम् अनुसरतु।

हिन्दी अनुवाद—हे सीतापते! आपके जिस निर्मल यश की त्रिभुवन में भ्रमण करने की ऐसी चतुरता बढ़ रही है। मोतियों का हार पहिने हुये, मद से मन्थर

गति वाला ऐरावत हाथी [तथा] पंक में गड़ा हुआ मृणाल का समूह उसका अनुसरण कैसे कर सकता है।

टिप्पणी—जनकतनयाजाने—जनकस्य तनया जानकी सा जाया यस्य स तत्-सम्बोधने (बहु०) भुवनत्रयभ्रमणपटिमा—भुवनानां त्रयम् तस्मिन् भ्रमणस्य पटिमा (पटु + इमनिच्) अच्छात्मनः—अच्छः निर्मलः आत्मा कलेवरं यस्य स तस्य (बहु०) इदं यशसो विशेषणम् मुक्ताहारः—मुक्तामयो हारो यस्य सः (बहु०)। हरिणी छन्दः, परिकरो व्यतिरेकश्चालंकारौ।

श्रीरामस्य कीर्तेर्धवलिम्नोऽतिशयोक्तिं कुरुते—

वहतु गगने गङ्गा पङ्कप्रसङ्गपराङ्मुखी
निचुलयतु निर्मोकेनाङ्गं भुजङ्गपति र्निजम्।
गिरिशमुकुटे गाङ्गैस्तोयैः प्लुताऽस्तुकला विधो-
र्न सितमितरत्तुल्यं कीर्त्या दशाननविद्विषः ॥२२६॥

माधुरी—दशाननविद्विषः रावणारेः कीर्त्या यशसा तुल्यम् इतरत् अन्यद् गंगादिकम् सितं श्वेतं न [भवितुं शक्नोति] गगने पंकप्रसंगपराङ्मुखी पंकसम्पर्करहिता गंगा वहतु, भुजङ्गपतिः वासुकिः निर्मोकेन कंचुकेन निजम् अंगम् निचुलयतु आच्छा-दयतु [तथा] गिरिशमुकुटे गिरिशस्य मुकुटे विधोः कला गांगैस्तोयैः गंगायाः जलैः प्लुता स्नपिता अस्तु। (तथापि तव यशस्तेभ्योऽधिकमेव धवलं भविष्यति।)

हिन्दी अनुवाद—रावण के शत्रु भगवान् राम के यश के समान दूसरे पदार्थ [गंगा वासुकि नाग एवं चन्द्रमा की कला] धवल नहीं हो सकते। चाहे आकाश में पंक के संपर्क से विमुख (होकर) गंगा बहें, वासुकि नाग केंचुल से अपने अंग को आच्छादित कर ले (तथा) शिव जी के मुकुट में चन्द्रमा की कला गंगा जी के जल में मग्न हो जाय (तो भी आपका यश उनसे अधिक श्वेत रहेगा।)

टिप्पणी—पराङ्मुखी-विपरीतं पराचीनं पराङ्मुख इत्यभिधानरत्नमालायाम्। निर्मोकेन—समौ कञ्चुकनिर्मोकौ इत्यमरः। हरिणी छन्दः अतिशयोक्तिरलंकारः।

भूयोऽपि श्रीरामयशसः शुक्लतां वर्णयति—

एतैर्भासा हसद्भिर्गिरिशगिरिशिरश्चुम्बिचन्द्रांशुजालम्
देव व्यक्तं न तुल्य स्त्रिदशपतिगजः सम्प्रति त्वद्यशोभिः।
उज्भन्नुज्भन्नजस्रं स्वमलमदमसीमेष दानच्छलेन
स्यादप्यग्रे कदाचित्फलति न कृतिनः कस्य काले प्रयत्नः।२३०।

माधुरी—हे देव ! भासा दीप्त्या गिरिशगिरिशिरश्चुम्बिचन्द्रांशुजालम् कैलासशिखरारूढस्य चन्द्रमसः किरणसमूहं हसद्भिः तिरस्कुर्वद्भिः एतैः त्वद्यशोभिः त्रिदशपतिगजः ऐरावतः सम्प्रति व्यक्तं स्पष्टमेव तुल्यः न [अस्ति]। एषः दानच्छलेन मदजलस्रवणव्याजेन अजस्रं निरन्तरं स्वमलमदमसीम्—स्वं मलं पापं तदेव मदस्य मसी ताम् उज्झन् उज्झन् असकृत् परित्यजन् कदाचित् अग्रे स्यात् तुल्यो भवेत् अपि। काले कस्य कृतिनः पुण्यात्मनः प्रयत्नः न फलति। (सर्वस्यापि भाग्यवतो जनस्य प्रयत्नाः यथावसरं फलन्तीति भावः।)

हिन्दी अनुवाद—हे देव ! शुभ्रता में कैलाश के शिखर का स्पर्श करते हुये, चन्द्रमा की किरणों के समूह को तिरस्कृत करने वाले, आपके इस यशसमूह के तुल्य ऐरावत हाथी नहीं ही है। यह (हाथी) मदजल को त्यागने के बहाने निरन्तर अपने पाप रूपी मद की कालिमा को त्यागता हुआ, सम्भवतः इस के तुल्य हो सकता भी है। समय आने पर किस पुण्यात्मा का प्रयत्न फलित नहीं होता है। (भाग्यवान् के प्रयत्न अवसर आने पर सफल होते हैं।)

टिप्पणी—**गिरिशगिरिशिरश्चुम्बिचन्द्रांशुजालम्**—गिरौ शेते इति गिरिशः तस्य गिरिः कैलासः तस्य शिरः चुम्बतीति तच्छीलः (√चुम्ब् + णिनि) तादृशो यः चन्द्रः तस्यांशवः किरणास्तेषां जालम् समूहः। **स्वमलमदमसीम्**—स्वं मलं पापं मलोऽस्त्रीपापविट्किट्टे कृपणे त्वभिधेयवत् तदेव मदमसी (मसि + ङीष्) ताम्। **स्रग्धरावृत्तम्** वृत्त्यनुप्रासः, व्यतिरेकः अपह्नुतिः अर्थान्तरन्यासश्चैत्येतेषां संसृष्टिरलंकारः। स्वतनुमलमसी इति पाठान्तरम्।

विशिष्टहेतुनिर्देशपूर्वकं श्रीरामयशसो वर्णनं करोति—

श्रीराम व्यक्तवैरस्तव यशसि निजद्वेषिणि क्षीरसिन्धु-
र्यत्त्वामुज्जागरन्तं जनयति तनुते सान्द्रनिद्रं ततोऽसौ।
क्षीराब्धेः पक्षपाती न भवसि भवता सम्प्रमथ्याद्रिणैनं
तत्तद्देवासुरेभ्यो मधुरिपुवपुषा रत्नमस्य प्रदत्तम् ॥२३१॥

माधुरी—श्रीराम ! क्षीरसिन्धुः निजद्वेषिणि स्वशत्रौ तव यशसि व्यक्तवैरः व्यक्तं वैरं यस्य सः (बहु०) [अस्ति] तत् त्वाम् उज्जागरन्तं उद्बुद्धं जनयति, ततः असौ (त्वाम्) सान्द्रनिद्रं सान्द्रा निद्रा यस्य स तम् (बहु०) तनुते कुरुते। [त्वम्] क्षीराब्धेः पक्षपाती समर्थकः न भवसि [अतएव] मधुरिपुवपुषा विष्णुरूपिणा भवता अद्रिणा मन्दराचलेन एनं समुद्रं सम्प्रमथ्य सम्यक्तया मथित्वा अस्य तत्तद् रत्नम् विभिन्नरत्नानि देवासुरेभ्यः प्रदत्तम् प्रदत्तानि। (तेन भवतः स्वयशःप्रेम ध्वन्यते।)

हिन्दी अनुवाद—श्री राम जी ! क्षीरसागर अपने शत्रुरूप आपके यश के प्रति स्पष्ट रूप से वैरभाव वाला है। जो यश आपको सावधान रखता है इस कारण वह आपमें गाढ़ निद्रा का विस्तार कर देता है। [परन्तु आप] क्षीर समुद्र के पक्षपाती नहीं हो, अतः विष्णुरूपधारी आपने मन्दराचल के द्वारा उसको भली भाँति मथकर उसके उन उन रत्नों को देव तथा असुरों को दे दिये हैं। (इससे आपका यश के प्रति प्रेम व्यक्त होता है।)

टिप्पणी—**उज्जागरन्तम्**—उत् √जागृ + शतृ (द्वि० ए० व०) **सान्द्रनिद्रम्**—भगवान् क्षीरसागरे चिरं प्रगाढनिद्रावशवर्ती भवतीति पुराणेषु प्रसिद्धम्। **पक्षपाती**—पक्षे पातः स अस्यास्तीति (पक्षपात + इनि) पक्षरक्षक इत्यर्थः। पक्षो विरोधे देहांगे सहाये राजकुञ्जरे इति हैमः। **स्रग्धरावृत्तम् काव्यलिङ्गमलंकारः।**

श्रीरामस्य यशोराशेरुत्कर्षं वर्णयति—

महीपालमौले जयन्ति त्वदीया
यशोराशयः काशसंकाशभासः।
अरातिप्रियानेत्रनीरस्रवन्ती
समुज्जृम्भितस्फीतफेनायमानाः २३२ ॥

माधुरी—**महीपालमौले** ! भूपतिवर ! **काशसंकाशभासः** काशतुल्यकान्तयः **अरातिप्रियानेत्रनीरस्रवन्तीसमुज्जृम्भितस्फीतफेनायमानाः** अरातीनां प्रियाः तासाम् यत् नेत्रनीरम् अश्रुजलम् तस्मात् प्रभूता या **स्रवन्ती** नदी तस्याम् **समुज्जृम्भिताः** विकसिताः ये **स्फीताः** प्रवृद्धाः फेनाः ते इव आचरन्तः **त्वदीयाः** भवदीयाः **यशोराशयः** यशसां समूहाः **जयन्ति** सर्वोत्कर्षेण वर्तन्ते।

हिन्दी अनुवाद—हे भूपाल वर ! काशपुष्प के तुल्य धवल कान्ति वाले, शत्रुरमणियों के अश्रुजल से निकली हुई नदी में उठे हुये मोटे फेन जैसे श्वेत आपके यश के ढेर सर्व श्रेष्ठ होकर विराजमान हैं।

टिप्पणी—**काशसंकाशभासः**—काशानां संकाशा भाः येषां ते (बहु०) संकाशो निकटे तुल्ये इति विश्वः **स्रवन्ती**—स्रवन्ती निम्नगाऽऽपगा इत्यमरः **फेनायमानाः**—फेनाः इवाचरन्तः फेन + क्यङ् = फेनाय + शानच् सूत्रम् 'कर्तुः क्यङ् सलोपश्च' (अष्टा० ३-१-११) भुजंगप्रयातं छन्दः वृत्यनुप्रासः उपमा चालंकारौ।

श्रीरामस्य यशसः दिङ्मण्डलव्यापित्वमाह—

भस्मालेपः शशधरकला शेखरः पन्नगेन्द्रः
स्फारो हारः स्फटिकशिखरी सद्म पत्रं महोक्षः ।
हर्षायैतद्धवलमखिलं वीक्ष्य शम्भोर्दिशस्त-
च्चेलीभूता हरित इति ताः शुभ्रितास्त्वद्यशोभिः ॥२३३॥

माधुरी—भस्म आलेपः शशधरकला चन्द्रकला शेखरः मुकुटं **पन्नगेन्द्रः** शेषः **स्फारः** महान् हारः स्फटिकशिखरी कैलासः सद्म भवनम् **महोक्षः** महावृषभः पत्रम् वाहनम् । **शम्भोः** भगवतः शंकरस्य हर्षाय एतत् अखिलं धवलं **वीक्ष्य** दृष्ट्वा **तच्चेलीभूताः** तस्य चेलीभूताः अम्बराणि **दिशः** हरितः 'हरित्' इतिनाम्ना प्रसिद्धाः [हरिद्वर्णाः] इति **त्वद्यशोभिः** ताः **शुभ्रिताः** शुभ्रवर्णाः कृताः ।

हिन्दी अनुवाद—(शिवजी का) भस्म आलेपन है, चन्द्रमा की कला मुकुट है, शेषनाग लम्बा हार है, कैलास पर्वत घर है [तथा] महान् बैल वाहन है । शंकरजी की प्रसन्नता के हेतु इन सभी श्वेत पदार्थों को देखकर उनके वस्त्र बनी हुई दिशायें 'हरित्' नाम वाली हैं (हरे रंग की हैं) इस कारण, तुम्हारे यशों के द्वारा वे श्वेत वर्ण की बना दी गई हैं ।

टिप्पणी—**स्फटिकशिखरी**—स्फटिकस्य शिखराणि सन्ति यस्य सः शिखर+इनि **पत्रम्**—पत्रं वाहनपक्षयोरिति विश्वः **हरितः**—हरिद्दिशि स्त्रियां पुंसि हयवर्णविशेषयोः । अस्त्रियां तास्तृणे चाथ इति मेदिनीकारः । **शुभ्रिताः**—शुभ्रः शुभ्रवर्णः सञ्जातः एषामिति शुभ्र+इतच् । मन्दाक्रान्तावृत्तम् शब्दश्लेषः हेतूत्प्रेक्षा चालंकारौ ।

श्रीरामस्य यशसः सर्वत्र व्यापित्वं वर्णयति—

नो धत्ते शोणभावं भवदसिदलितेभेन्द्रकुम्भास्रवर्षै-
र्नैवासौ धूसरश्रीस्तुरगखुरगणोत्खातभूमीरजोभिः ।
चित्रं दीनैकबन्धो विलसति न शितिः शात्रवाकीर्तिपंकै-
रश्रान्तं कीर्तिपूरच्छलधवलपटस्तायमानस्त्वयाऽऽजौ ॥२३४॥

माधुरी—हे **दीनैकबन्धो** ! **त्वया** आजौ अश्रान्तम् निरन्तरम् तायमानः विस्तीर्यमाणः **कीर्तिपूरच्छलधवलपटः** कीर्तेः पूरः यशोराशिस्तस्य च्छलेन धवलः पटः **भवदसिदलितेभेन्द्रकुम्भास्रवर्षैः** भवतः असिना दलितः यः इभेन्द्रः गजेन्द्रः तस्य कुम्भाभ्यां यत् अस्रस्य रक्तस्य वर्षः तैः **शोणभावं** रक्ततां न **धत्ते** धारयति । **तुरगखुरगणोत्खात-**

भूमीरजोभिः तुरगाणां खुराणां गणैः उत्खातानि यानि भूम्याः रजांसि तैः (तत्०) **असौ** यशःपटः **धूसरश्रीः** धूसरवर्णः नैव (भवति) **शात्रवाकीर्तिपंकैः** शात्रवाणाम् अकीर्तिः एव पंकस्तैः शितिः नीलः **न विलसति इति चित्रम्** विस्मयकरम् [अस्ति]।

हिन्दी अनुवाद—हे दीनों के एकमात्र बन्धु ! तुम्हारे द्वारा युद्ध में निरन्तर यश के समूह के बहाने फैलाया गया श्वेत पट आपकी तलवार से मारे गये गजेन्द्र के कपोलों से हुई रक्त की वर्षा से लालिमा को नहीं धारण करता, घोड़ों के खुरों के समूहों से उखाड़ी गई भूमि के धूलि कणों से वह मटमैला नहीं होता, तथा शत्रुओं के अयश रूपी पंक से नीला नहीं होता है; यह आश्चर्य है।

टिप्पणी—**शोणभावम्**—**रक्तवर्णम्** शोणः कोकनदच्छविरित्यमरः **कुम्भास्त्रवर्षैः**—कुम्भाभ्याम् अस्रस्य वर्षैः कुम्भौ समाध्यन्तरराशिभेदौ कुम्भो घटे कुञ्जरगण्डपिण्डे इति धरणिः। **धूसरः**—धूसरः कृष्णपाण्डुरः इत्यभिधानरत्नमालायाम्। **स्रग्धरावृत्तम् विशेषोक्तिरलंकारः**।

श्रीरामस्य यशसः सर्वत्र व्यापित्वं वर्णयति—

पारावारप्रतीरे विहितवसतिभिस्तावकप्रत्यनीकै-
र्नित्यं कूपास्तपर्तु प्रबलतरतृषा शोष्यमाणैः क्रियन्ते।
राजंस्तत्रापि जाते तव यशसि शशिद्योतशंकी पयोधि-
र्वर्धिष्णुर्नित्यमेतांल्लवणयति जलैरीदृगापत्प्रकारः ॥२३५॥

माधुरी—**तावकप्रत्यनीकैः** तव शत्रुभिः **तपर्तु प्रबलतरतृषा** तपर्तोः ग्रीष्मस्य प्रबलतरा अतिप्रबला या तृट् पिपासा तया **शोष्यमाणैः** क्लान्तैः **नित्यं** कूपाः **क्रियन्ते** निर्मीयन्ते। **तत्र** कूपेषु **अपि तव यशसि** जाते **शशिद्योतशंकी** चन्द्रप्रकाशं शंकमानः **वर्धिष्णुः** वर्धनशीलः **पयोधिः** समुद्रः **नित्यम् एतान्** कूपान् **जलैः** क्षारैः स्ववारिभिः **लवणयति** क्षारजलान् करोति। **ईदृक्** आपत् प्रकारः विपत्तिभेदः। (पिपासायां जलस्य क्षारीभावोऽपि विपत्तिभेदेष्वन्यतमोऽस्तीति भावः)।

हिन्दी अनुवाद—हे राजन् ! समुद्र के तट पर निवास करने वाले, ग्रीष्म की प्रबल प्यास से सुखाये गये आपके शत्रुओं के द्वारा नित्य कूप खने जाते हैं। उनमें भी तुम्हारे यश के होने पर चन्द्रमा के प्रकाश की शंका करने वाला, बढ़ता हुआ समुद्र नित्य ही कूपों को अपने खारे जल से खारा बना देता है। विपत्ति का यह भी एक भेद है। (प्यास लगने पर खने गये कुओं के जल का खारा हो जाना भी एक प्रकार की विपत्ति है।)

टिप्पणी—**पारावारप्रतीरे**—समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिरित्यमरः। कूलं रोधश्च तीरं च प्रतीरं च तटं त्रिषु इत्यमरः। **वर्धिष्णुः**—√वृध् + इष्णुच् **आपत्प्रकारः**—आपदः प्रकारः प्रकारो भेदसादृश्ये इति धरणिः। **स्रग्धरा वृत्तम् भ्रान्तिमान् अलंकारः।**

हंसावल्या सह श्रीरामकीर्तेः व्यतिरेकमाह—

अस्तु क्षीररुचिः प्रयातु भुवनान्यश्रान्तमेतावता
त्वत्कीर्त्या न बिभर्ति रावणरिपो हंसावलिस्तुल्यताम्।
राजीवस्थितिमिच्छतीह न लभते नित्यं न तामप्यसा-
वन्या तु त्वपि राघवान्वयमहाराजैकराजि स्थिरा ॥२३६॥

माधुरी—हे **रावणरिपो**! श्रीराम! **हंसावलिः** हंसानाम् आवलिः श्रेणी **क्षीररुचिः** क्षीरे रुचिः इच्छा यस्याः सा क्षीरस्येव रुचिः कान्तिर्यस्याः सा वा **अस्तु**, **अश्रान्तम्** अनवरतम् **भुवनानि** लोकान् **प्रयातु**। **एतावता** एतन्मात्रेण **त्वत्कीर्त्या** तव यशसा **तुल्यतां** समानतां **न बिभर्ति** करोति। **असौ इह राजीवस्थितिम्** राजीवे कमले (राजि इव महाराजसदृशे जने) स्थितिम् इच्छति **ताम् अपि नित्यं न लभते** (हेमन्ते शिशिरे च कमलानां विनाशात् न सदा तस्याः लाभः इति भावः) **अन्या** कीर्तिः **तु राघवान्वय-महाराजैकराजि**—राघवकुलस्य महाराजे एकस्मिन् राज्ञि **त्वयि** भवति **स्थिरा** (कीर्तेः राजि स्थितिः हंसावल्यास्तु राजसदृशेऽपि नेति व्यतिरेकः।)

हिन्दी अनुवाद—हे राम! हंसों की पंक्ति चाहे दूध के समान श्वेत कान्ति वाली हो (दूध पिये) बिना थकावट सम्पूर्ण लोकों में चली जाय। इतने से ही तुम्हारी समानता को नहीं प्राप्त कर सकती है। वह यहाँ कमल में स्थान (निवास) चाहती है पर उसे भी सदा नहीं पाती। (क्योंकि हेमन्त व शिशिर ऋतुओं में कमल नहीं रहता है।) अथवा राजा के सदृश पुरुष में अपनी स्थिति को चाहती है परन्तु सदा वह भी नहीं मिलती। आपकी कीर्ति तो रघुकुल के महाराज चक्रवर्ती सम्राट् आपमें स्थिर रूप से विद्यमान है। (कीर्ति की सम्राट् में स्थिति है हंसावली की राजसदृश में भी नहीं यह भेद है।)

टिप्पणी—**क्षीररुचिः**—रुचिः स्वादः कान्तिश्च क्षीरस्येव रुचिः कान्तिर्यस्याः सा क्षीरे रुचि यस्या सा वा (बहु०) **राजीवस्थितिम्**—राजीवे कमले स्थितिः राजि राज्ञि इव वा स्थितिः ताम् बिसप्रसूनराजीवपुष्कराम्भोरुहाणि चेत्यमरः, राज्ञि राट् पार्थिव क्ष्मा-भृन्नृपभूपमहीक्षित इत्यमरः। **राघवान्वयमहाराजैकराजि**—राघवस्य अन्वयः तस्मिन्

महाराजः (महांश्चासौ राजा-कर्म०) एवम्भूतः एकः अद्वितीयः राट् तस्मिन् । शार्दूल-विक्रीडितं छन्दः व्यतिरेकालंकारः ।

इति यशोवर्णना समाप्तिमगात् ।

अथ श्रीरामस्य प्रतापवर्णना

श्रीरामस्य प्रतापेन शत्रुसभायाः श्रियो विनाशं वर्णयति—

स्फीताऽकीर्तिकलापकर्दमवती मुक्ता यशोवारिभिः
व्यक्तानर्थकतीर्थनिर्मितिरलं शुष्यन्मदाम्भोरुहा ।
निःश्रीकाशुविरोधिवीरपरिषद्वापी कृता विश्वतः
त्वत्तेजःपटलीनिदाघतरणिज्योतिश्छटाभिः प्रभो ॥२३७॥

माधुरी—हे प्रभो ! त्वत्तेजःपटलीनिदाघतरणिज्योतिश्छटाभिः तव तेजसां पटली समूहः **विरोधिवीरपरिषद्वापी** विरोधिनां वीराणां समितिरूपा वापी आशु शीघ्रम् **स्फीताऽकीर्तिकलापकर्दमवती** स्फीतः प्रवृद्धो यः अकीर्तिकलापः एव कर्दमः तद्वती **यशोवारिभिः** यशः एव वारि तेभ्यो मुक्ता रहिता **व्यक्तानर्थकतीर्थनिर्मितिः** व्यक्ता अनर्थकतीर्थानां जलावताराणाम् वा निर्मितिः रचना यस्यां सा (बहु०) **अलंशुष्यन्महाम्भोरुहा** अलं शुष्यन्ति मदरूपीणि अम्भो रुहाणि कमलानि यस्यां सा (अतएव) **विश्वतः** सर्वतः **निःश्रीका** निर्गता श्रीः सम्पत्तिः शोभा वा यस्याः सा (बहु०) **कृता** ।

हिन्दी अनुवाद्—हे स्वामिन् । आपके तेज के समूह रूपी ग्रीष्मकालीन सूर्य के तेज की राशियों से शत्रु वीरों की सभा रूपिणी बावली अतिशीघ्र अयश के समूह रूपी गाढ़ कीचड़ से युक्त, यश रूपी जल से रहित, अनर्थक मन्त्री रूपी घाटों की रचना वाली, मद रूपी कमलों के सूखने से हर प्रकार से सम्पत्ति रूपिणी शोभा से रहित बना दी गई है । [जैसे ग्रीष्मकालीन सूर्य की प्रचण्ड किरणों के द्वारा बावली का जल शीघ्र ही सुखा दिया जाता है, उसमें कीचड़ मात्र अवशिष्ट रहता है, उसके घाटों का निर्माण व्यर्थ हो जाता है तथा कमल सूख जाते हैं और उसकी शोभा नष्ट हो जाती हे तथैव श्रीराम के प्रताप के समूह से वीरों की सभा अकीर्ति की कालिमा से युक्त हो गई, उसका यश नष्ट हो गया, मन्त्रियों का उपदेश निरर्थक हो गया तथा उसका मद दूर हो गया । इस प्रकार वह पूर्ण रूप से शोभा हीन बना दी गई है ।]

टिप्पणी—तीर्थम्—तीर्थं योनौ जलावतारे च गुरौ च तीर्थे स्यादवतारे च पात्रोपाध्यायमन्त्रिषु। स्त्रीणां रजसि शास्त्रे च क्षेत्रोपायाध्वरेषु चेति धरणिः। **निःश्रीका**—श्रीशब्दः कविभिः प्रोक्तो लक्ष्मी सम्पत्तिकान्तिष्विति धरणिः। **शार्दूलविक्रीडितं छन्दः रूपकालङ्कारः।**

श्रीरामस्य खड्गेनार्जितं तदीयं प्रतापं वर्णयति—

तव भुजमलयजशाखानिषेविणा मण्डलाग्रकुण्डलिना।
यस्त्यक्तोविषवह्निर्भवत्प्रतापं वदन्ति तं कवयः ॥२३८॥

माधुरी—हे राम! तव भुजमलयजशाखानिषेविणा भुजचन्दनलताश्रितेन **मण्डलाग्रकुण्डलिना** खड्गसर्पेण **यः विषवह्निः त्यक्तः। कवयः तं भवत्प्रतापं वदन्ति।**

हिन्दी अनुवाद—है राम आपकी भुज रूपिणी चन्दनलता में स्थित खड्ग रूपी सर्प के द्वारा जो विष रूप अग्नि त्यागी गई है, कवि उसे आपका प्रताप कहते हैं।

टिप्पणी—भुजमलयजशाखानिषेविणा—भुजः एव मलयजस्य शाखा तां निषेवते तच्छीलः इति नि √ सेव + णिनि (तृ० ए० व०)। अयं श्लोकः **अस्त्रवर्णनाखण्डस्यान्तिमोऽप्यस्तीति** विशेषतस्तत्रैव व्याख्यातः। केवलमत्र 'त्यज्यते' पदस्य स्थाने 'त्यक्तः' इति पदपरिवर्त्तनं वर्तते।

श्रीरामस्य शत्रोः पद्मरागमणौ ज्वलनभ्रमं वर्णयति—

अनिशमधिवसन्नप्येष रोधः पयोधेः
क्षितिपरिवृढ दीनः शात्रवस्तावकीनः।
स्पृशति न भवदीयोद्दामतेजःप्रदीप्त-
ज्वलनशकलशङ्की पाणिना पद्मरागान् ॥२३९॥

माधुरी—हे क्षितिपरिवृढ! हे जगन्नाथ! एषः **तावकीनः** तव **दीनः शात्रवः** शत्रुः **अनिशम्** निरन्तरम् **पयोधेः** रोधः तीरम् **अधिवसन्** **अपि भवदीयोद्दामतेजःप्रदीप्तज्वलनशकलशङ्की** भवदीयम् उद्दाम उत्कटं तेजः तेन प्रदीप्तानि यानि ज्वलनस्य **अग्नेः** शकलानि तानि शङ्कते इति तच्छीलः √ शङ्क् + णिनि **पाणिना** करेण **पद्मरागान्** आरक्तमणीन् **न स्पृशति।**

हिन्दी अनुवाद—हे विश्व के स्वामिन्! आपका यह दीन शत्रु निरन्तर समुद्र के तट पर रहता हुआ भी इस कारण पद्मराग मणियों का स्पर्श नहीं कर रहा है क्योंकि उसे भ्रम है कि ये आपके उत्कट तेज से जलते हुये अग्नि के टुकड़े (अंगारे) हैं।

टिप्पणी—रोधः अधिवसन्—अधि पूर्वकस्यवस् धातोराधारस्य रोधसः कर्मत्वात्ततो द्वितीया सूत्रम् उपान्वध्याङ्वसः' (अष्टा० १-४-४८) **क्षितिपरिवृढ—**क्षितेः परिवृढः प्रभुः अधिभूर्नायको नेता प्रभुः परिवृढोऽधिप इत्यमरः। **ज्वलनशकलम्—**अग्निर्वैश्वानरो वह्निर्वीतिहोत्रो धनञ्जयः कृपीटयोनिर्ज्वलनः इत्यमरः। शकलं कल्कले खंडे शकलं रागवस्तु चेति धरणिः। **मालिनीछन्दः भ्रान्तिमान् अलंकारः।**

श्रीरामस्य प्रतापाग्नेरविश्रान्तं ज्वलनं वर्णयति—

दत्तो वह्निस्त्वदीयैः परधरणिभुजां पत्तने पत्तिभिर्यः
क्षिप्रं दग्ध्वा स तत्तद् विरतिमुपययौ मेदिनीपालमौले।
कान्तारं वा गिरिं वा चिरमधिवसतामम्बुराशेस्तटं वा
तेजोवह्निस्तवान्यः कथमपि विरमत्येष तेषां न दाहात् ॥२४०॥

माधुरी—हे **मेदिनीपालमौले** ! हे भूपालवर ! **त्वदीयैः** तव **पत्तिभिः** पदातिसैनिकैः **परधरणिभुजाम्** शत्रुनृपाणां **पत्तने** नगरे यः **वह्निः दत्तः** प्रक्षिप्तः सः **तत्तद् क्षिप्रं दग्ध्वा विरतिम् उपययौ** शान्तोऽभवत्। **एषः तव अन्यः तेजोवह्निः** प्रतापाग्निः **कान्तारं वा गिरिं वा अम्बुराशेः** समुद्रस्य **तटं वा चिरम् अधिवसतां तेषां** शत्रूणां **दाहात् कथमपि न विरमति।**

हिन्दी अनुवाद—हे भूपतिवर ! आपके पैदल सैनिकों के द्वारा शत्रुराजाओं के नगरों में जो आग लगाई गई थी, वह उन नगरों को शीघ्र जलाकर शान्त हो गई। यह तुम्हारी दूसरी प्रतापाग्नि जंगल या पर्वत या समुद्रतट में चिरकाल से रहते हुये उन (शत्रुओं) को जलाने से किसी भी तरह विरत नहीं हो रही है। (आपकी प्रतापग्नि दूरवर्ती शत्रुओं को निरन्तर जला रही है, यह भाव है।)

टिप्पणी—पत्तने—पूः स्त्री पुरीनगर्यौ वा पत्तनं पुटभेदनमित्यमरः। **पत्तिभिः—**पदातिपत्तिपदगपादातिकपदाजयः इति धरणिः। **विरमति—**'व्याङ्परिभ्यो रमः' (अष्टा० १-३-८३) **स्रग्धराच्छन्दः** रूपकव्यतिरेकावलंकारौ।

सूर्येण जलशोषणहेतुपूर्वकं श्रीरामस्य प्रतापोद्रेकं वर्णयति—

अन्तर्द्धिप्रार्थिनं श्रीदशरथतनयस्यौजसा निर्जितं मा-
मेतानिच्छादयन्ति द्रुतमवनितलादुल्लसन्ति प्रयाणे।
स्वीयामेतैः कृतामित्युपकृतिमतुलां मन्यमानोरजोभि-
स्तद्विध्वंसप्रगल्भाः प्रसभमयमपः शोषयत्यंशुमाली ॥२४१॥

माधुरी—एतानि प्रयाणे विजययात्रायाम् **अवनितलात् द्रुतम् उल्लसन्ति** उद्गतानि **श्रीदशरथतनयस्य** श्रीरामस्य **ओजसा** प्रतापेन **निर्जितम्** पराजितम् **अन्तर्द्धिप्रार्थिनम्** तिरोधानम् इच्छन्तम् **मां छादयन्ति । एतैः रजोभिः कृताम्** अत्यधिकाम् **उपकृतिम् मन्यमानः अयम् अंशुमाली** सूर्यः **तद्विध्वंसप्रगल्भाः** तेषां रजसां विध्वंसे विनाशे प्रगल्भाः चतुराः **अपः** जलानि **प्रसभम्** बलात् **शोषयति** ।

हिन्दी अनुवाद—'[आपकी] विजययात्रा में धरती से शीघ्र ही उठे हुये ये (धूलिकण) श्रीराम के प्रताप से पराजित होकर छिपने का स्थान चाहते हुये मुझे ढक लेते हैं ।' इन धूलिकणों के द्वारा किये गये अत्यधिक उपकार को मानते हुये ये सूर्य उनके विनाश करने में चतुर जलों को जबरदस्ती सुखा देते हैं ।

टिप्पणी—**अन्तर्द्धिप्रार्थिनम्**--अन्तर्द्धा व्यवधा पुंसि त्वन्तर्द्धिरपवारणमित्यमरः । अन्तर्द्धिम् (अन्तर्√धा+कि) प्रार्थयन्ति इति तच्छीलः (प्र√अर्थ+णिनि) **स्रग्धरावृत्तम् हेतूत्प्रेक्षालंकारः** ।

श्रीरामस्य प्रतापेन सूर्यविजयं वर्णयति—

वितेने येनैष प्रधनधरणीपृष्ठजनुषा
प्रभानिःस्वो भास्वान् वपुषि पतता तेन रजसा ।
दधानेनौज्ज्वल्यातिशयमसिना तेन जनितः
प्रतापस्ते राजन् कथमिह न भानुं विजयताम् ॥२४२॥

माधुरी—हे **राजन् ! प्रधनधरणीपृष्ठजनुषा** युद्धभूमौ समुत्पन्नेन **वपुषि** शरीरे **पतता येन** (रजसा) **एषः भास्वान्** सूर्यः **निःस्वः** दीनः **वितेने** कृतः इत्यर्थः । **तेन रजसा** औज्ज्वल्यातिशयम् अधिकाम् उज्ज्वलतां **दधानेन** धारयता **तेन असिना जनितः** समुत्पन्नः **ते प्रतापः इह** भानुं सूर्यं कथं न **विजयताम्** ।

हिन्दी अनुवाद—हे राजन् ! युद्धभूमि में पैदा हुई (उखड़ी हुई) स्वमंडल में गिरती हुई जिस रज के द्वारा ये सूर्य प्रभा से दरिद्र बना दिये गये । उसी धूलि के द्वारा अधिक उज्ज्वलता को धारण किये हुये उस प्रसिद्ध खड्ग से उत्पन्न तुम्हारा प्रताप सूर्य को क्यों न जीत ले ।

टिप्पणी—**प्रधनधरणीपृष्ठजनुषा**--प्रधनम् एव धरणीपृष्ठं तस्मिन् जनुर्यस्य तत्तेन (बहु०) युद्धमायोधनं जन्यं प्रधनं प्रविदारणमित्यमरः । **प्रभानिःस्वः**—प्रभया निःस्वः निःस्वस्तु दुर्विधो दीनो दरिद्रो दुर्गतोऽपि सः इत्यमरः । **विजयताम्**—'विपराभ्यां जेः' (अष्टा० १-३-१९) इत्यात्मनेपदम् । **शिखरिणी छन्दः परिकरालंकारः** ।

दववह्नेरपेक्षया श्रीरामप्रतापस्य वैशिष्ट्यमाह—

साम्ये सत्यपि यस्तपर्तुविततादूवह्नेः प्रतापे तव
व्यक्तः कोऽपि विशेष एव बलति ब्रूमस्तमाकर्णय ।
एकेन ज्वलता वने बहुवयाः क्षिप्रं शमी दह्यते
देवान्यो जरसान्वितस्य शमिनस्त्राणाय संमूर्च्छति ॥२४३॥

माधुरी—हे देव ! साम्ये सत्यपि तपर्तुविततात् तपर्तौ ग्रीष्मे विततात् विस्तृतात् वह्नेः **तव प्रतापे एव यः कोऽपि** अनिर्वचनीयः **व्यक्तः** स्फुटः **विशेषः बलति** शोभते, **तम्** आकर्णय शृणु । **वने ज्वलता** एकेन **बहुवयाः**वृद्धा (बहुपक्षिसमाकुला) **शमी** क्षिप्रं दह्यते । **अन्यः** तव प्रतापः **जरयान्वितस्य शमिनः** तपस्विनः विश्वामित्रादेः **त्राणाय** रक्षणाय **संमूर्च्छति** विराजते (भासते) अयं दवाग्निः दीन भक्षकः श्रीराम-प्रतापाग्निस्तु दीनरक्षकः इति विशेषो व्यङ्ग्यः ।)

हिन्दी अनुवाद—हे देव ! समता होने पर भी ग्रीष्म ऋतु में फैलने वाली अग्नि की अपेक्षा आपके प्रताप में ही जो कोई वैशिष्ट्य शोभित होता है उसे सुनिये । वन में जलती हुई दवाग्निके द्वारा पुराना (बहुत से पक्षियों से भरा हुआ) शमी वृक्ष शीघ्र ही जला दिया जाता है । [परन्तु] आपकी प्रताप रूप अग्नि वृद्ध तपस्वी विश्वामित्रादि के रक्षणार्थ चमकती है । (भगवान् के प्रताप से तपस्वी विश्वामित्र तथा अन्य महर्षियों की रक्षा की गई थी । (यहाँ पर दवाग्नि दीनभक्षक है तथा श्रीराम का प्रतापरूप अग्नि दीन रक्षक है यह विशेषता व्यङ्ग्य है ।)

टिप्पणी—बहुवयाः—बहु अधिकं वयो यस्याः सा अथवा बहवो वयसः पक्षिणो यस्यां सा (बहु०) **शमिनः**—शमः अस्यास्तीति शमी शम + इनि तस्य शमी संयमिनि-ख्यातः इति विश्वः । **शार्दूलविक्रीडितं छन्दः व्यतिरेकालङ्कारः** ।

श्रीरामप्रतापस्य सूर्यप्रतापापेक्षया वैशिष्ट्यम् आह—

वृद्धं जलं यदभिरक्षति यद्विधत्ते
तेजः स्वतो द्विजपतेरधिकं तवौजः ।
अत्यन्तमस्ति यदिहान्धकुले कृपालु
भूपाल तत्कमलबन्धुमहोविरोधात् ॥२४४॥

माधुरी—हे भूपाल ! तव ओजः प्रतापः यत् वृद्धपुरुषं जलं जडम् मूढम् अभिरक्षति, **द्विजपतेः** ब्राह्मणश्रेष्ठस्य गरुडस्यवा तेजः **स्वतःअधिकं विधत्ते** । **यत् इह अन्ध-**

कुले अत्यन्तं **कृपालु तत् कमलबन्धुमहः विरोधात्** कमलस्य बन्धुः सूर्यः तस्य महः तेजस्तस्य विरोधात् । [सूर्यस्य तेजस्तु वृद्धं जलं न अभिरक्षति प्रत्युत नाशयति द्विजपतेः चन्द्रस्य तेजः स्वतः अधिकं न कुरुते तथा अन्धकुले अन्धानाम् कुले कृपालु न भवती-ति तस्माद् विरोधः ।]

हिन्दी अनुवाद—हे भूपाल ! आपका प्रताप जो वृद्ध तथा मूर्ख की रक्षा करता है, श्रेष्ठ पुरुषों के कुल में अत्यन्त कृपा करता है वह सूर्य के तेज से विरोध के कारण (करता है ।) [सूर्य का तेज तो वृद्धजल—बढ़े हुये जल को सुखाता है द्विजपति चन्द्रमा के तेज को अपने से अधिक नहीं करता तथा अन्धे प्राणियों के समूह के ऊपर कृपा नहीं करता इस प्रकार श्रीराम के प्रताप का सूर्य के प्रताप से विरोध स्पष्ट है ।)

वृद्धं जलम्—वृद्धं जडं पुरुषं—(डलयोरभेदः) वृद्धं जलं वा **द्विजपतेः**—द्विजानां पतिः ब्राह्मणः, गरुडः चन्द्रमाः वा तस्य **अन्धकुले**—अन्धानाम् अन्धप्राणिनाम् वा **कुले** अन्धोदर्शननिर्मुक्तो जन्तुरन्धतमो मतः इति धरणिः । **वसन्ततिलकावृत्तम् व्यतिरेका-लङ्कारः ।**

श्रीरामतेजसो सूर्यस्याधिक्यं प्रतापानलनामसार्थक्यं च वर्णयति—

श्री रामभद्र रविरेष सहस्रपाद-
प्यन्वेतुमर्हति न यज्ज्वलितं तवौजः ।
वैश्वानरस्तदनुयाति तनूनपादि-
त्युच्येत केन रुचिरोक्तिविचक्षणेन ॥२४५॥

माधुरी—हे रामभद्र ! **एषः** रविः **सहस्रपात्** सहस्रं पादाः किरणाः यस्य सः (बहु०) एवम्भूतः अपि **यत् तव ज्वलितम् ओजः** प्रतापम् **अन्वेतुं** अनुगन्तुं **न अर्हति** समर्थो भवति । **तनूनपात्** स्वल्पपाद् (अपि) **वैश्वानरः** अग्निः **तत्** ओजः **अनुयाति** अनुगच्छति **इति केन रुचिरोक्तिविचक्षणेन** सूक्तिपण्डितेन **उच्येत** वक्तुं शक्येत ।

हिन्दी अनुवाद—हे रामभद्र ! ये सूर्य सहस्रकिरणवाले होते हुये भी जो तुम्हारे प्रताप का अनुगमन नहीं कर सकते, स्वल्प तथा न्यून पैरों वाला भी अग्नि उसका अनुगमन करता है इसे कौन सूक्ति का विद्वान् कह सकता है ।

टिप्पणी—**सहस्रपात्**—सहस्रं पादाः चरणाः किरणाः वा यस्य सः (बहु०) **'वैश्वानरः**—विश्वश्चासौ नरश्चेति विश्वानरः नरे संज्ञायाम्, (अष्टा० ६-३-१२९) इति दीर्घः विश्वानरः एव **वैश्वानरः** विश्वानर + अण् **तनूनपात्**—तनूं स्वरूपं न पाति रक्षतीति तनूनपात् आशुविनाशित्वात् यद्वा तनू स्वल्पौ ऊनौ पादौ यस्य सः यद्वा तन्वा ऊनः तनूनः दुर्बलः तं पाति रक्षतीति तनूनपं घृतम् तनूनपम् अत्ति इतितनूनप √ अद् +

विवष् । [अतएव जनैः प्रतापानलः एव कथ्यते न तु प्रतापसूर्यः ।) वसन्ततिलका वृत्तम् विशेषोक्तिलंकारः ।

श्रीरामप्रतापस्य दीपात् उत्कृष्टताम् आह—

अत्यर्थं स्नेहशून्ये कलयति न दशामप्यतिश्लाघनीयाम्
द्राघीयः श्वासतीव्रानिलवति भवता द्रागपात्रीकृतेऽपि ।
एष द्वेष्ये चिराय ज्वलति नरपतौ यः प्रतापस्त्वदीयः
साधर्म्यज्ञानवन्ध्यस्तुलयतितमिहक्वापिदीपेन कश्चित् ।२४६।

माधुरी—हे राम ! **अत्यर्थम्** अत्यन्तम् **स्नेहशून्ये** प्रेमरहिते **अतिश्लाघनीयाम्** अतिप्रशंसनीयाम् **अपि दशाम् न कलयति** प्राप्नुवति **द्राघीयः श्वासतीव्रानिलति** अति दीर्घश्वासरूपतीव्रवातयुक्ते **भवता द्राक्** शीघ्रतया **अपात्रीकृते** अयोग्ये मते **अपि द्वेष्ये** शत्रौ नरपतौ **यः एषः** अयम् **त्वदीयः प्रतापः चिराय** चिरकालं **ज्वलति । साधर्म्यज्ञान-वन्ध्यः** सादृश्यज्ञानशून्यः **कश्चित् इह क्वापि तं** प्रतापं **दीपेन** तैलवर्तिवता दीपकेन **तुलयति** समीकरोति [साधारणो दीपस्तु **स्नेहशून्ये** तैलरहिते अतिप्रशस्तया वर्त्या विहीने पात्रे वातयुक्ते प्रदेशे पात्रं विना नैव ज्वलितुं शक्नोतीति प्रतापदीपस्य मृण्मयदीपेन कथं सादृश्यम् कर्तुं शक्यते ।]

हिन्दी अनुवाद—[हे राम] अत्यधिने प्रेम से हीनक अतिप्रशंसनीय अवस्था को अप्राप्त लम्बी साँस रूपी तीव्र वायु से युक्त आपके द्वारा शीघ्र ही अयोग्य बनाये गये भी शत्रुराजा के ऊपर जो यह आपका प्रताप चिरकाल पर्यन्त जलता है । सदृशता के ज्ञान से रहित कोई (साधारण जन) यहाँ कहीं पर उसको दीपक के समान बना रहा है । [साधारण तेलबाती वाला दीपक तेल रहित सुन्दर बाती से विहीन पात्र में वायुयुक्त स्थान में अथवा बिना पात्र के नहीं जल सकता है अतः प्रतापदीप से उसकी तुलना कैसे हो सकती है ।]

टिप्पणी—**स्नेहशून्ये**—स्नेहस्तैलादिकप्रेम्णोरिति धरणिः **दशा**—दशाऽवस्था दीपवर्त्योर्वस्त्रांशे भूम्नि योषितीति हैमः **पात्रम्**—पात्रं स्याद् भाजने योग्ये पात्रं कूलद्वयान्तरम् । सन्धिविग्रहकादौ च स्रुवादौ पात्रमिष्यते इति धरणिः । **द्राघीयः**—अधिकं दीर्घम् इति दीर्घ+ईयसुन **साधर्म्यम्**—समानो धर्मस्तस्यभावः) स्रग्धराच्छन्दः विरोधालंकारः ।

श्रीरामयशसो वह्नेर्वैशिष्ट्यमाह—

रामभद्र प्रतापस्ते सम्परायसमेधितः ।
आज्यसंवर्धितं वह्निं जयतीति किमद्भुतम् ॥२४७॥

माधुरी—हे रामभद्र ! **सम्परायसमेधितः** सम्पराये युद्धस्थले समेधितः प्रवृद्धः **ते प्रतापः आज्यसंवर्धितं** आज्येन धृतेन संवर्धितं समिद्धं **वह्निं जयति इति किम् अद्भुतम्** आश्चर्यम् ।

हिन्दी अनुवाद—हे रामचन्द्र ! युद्धस्थल में बढ़ा हुआ तुम्हारा प्रताप घी के द्वारा समिद्ध अग्नि को जीत लेता है इसमें आश्चर्य क्या है ?

टिप्पणी—सम्परायः—सम्परायान् वदन्त्यार्या आपदायतिसंयुगानिति धरणिः । **अनुष्टुप् छन्दः विरोधालङ्कारः ।**

श्रीरामस्य प्रतापाग्निना कण्टकदाहमाह—

यानाश्रिता नगजता पथिकान् व्यथयन्ति ये वने पतिताः ।
तव तेजोदवहुतभुजि विजृम्भिते कण्टकाः क्व ते नृपते ।२४८।

माधुरी—हे नृपते ! **यान्** नगजता वृक्षजन्मभावः आश्रिता, **वने पतिताः** ये **पथिकान् व्यथयन्ति** दुःखिनः कुर्वन्ति । **तव तेजोदवहुतभुजि** प्रतापदवाग्नौ **विजृम्भिते** वर्द्धिते **ते कण्टकाः** क्षुद्रशत्रवः **क्व** (गताः इति शेषः ।)

हिन्दी अनुवाद—हे राजन् ! वृक्ष से जन्म का भाव (जड़ता) जिन पर आश्रित है (जो वृक्षों से उत्पन्न हुये हैं ।) बन में पड़े हुये जो पथिकों को कष्ट देते हैं । आपके तेज रूप दवाग्नि के बढ़ने पर वे काँटे (शत्रु) कहाँ हैं ।

टिप्पणी—नगजता—नगात् जातः नगजस्तस्य भावो नगजता शैलवृक्षौ नगावगावित्यमरः । दवहुतभुजि—दवः हुतभुक् (हुतं भुंक्ते इति √भुज्+क्विप्) तस्मिन् दवो दावश्च विज्ञेयौ वनाग्निवनयोरपीति धरणिः । **कण्टकाः**—शूच्यग्रे क्षुद्रशत्रौ च रोमहर्षे च कण्टकः इत्यमरः । **गीतिश्छन्दः आक्षेपालंकारः ।**

श्रीरामप्रतापस्य सधूमवह्निसादृश्यम् आह—

विख्यातः कृष्णवर्त्मा जगति हुतवहस्तेन विस्पर्धमानः
तादृक् न स्यात्प्रतापो मम किमिति धिया रामभद्र त्वयाऽसौ ।
क्लृप्तो लंकाप्रयाणे लवणजलनिधेरम्भसि ध्वान्तभासि
क्षिप्तद्माभृद्वनालीविलसदसितिमा सेतुरेतस्य पन्थाः ।२४९।

माधुरी—हे रामभद्र ! जगति हुतवहः अग्निः कृष्णवर्त्मा धूममार्गः विख्यातः । **तेन विस्पर्धमानः** सदृशो भवन् **मम प्रतापः तादृक्** कृष्णमार्गः **किम् न स्यात्** । **इति धिया** बुद्धया **त्वया लङ्काप्रयाणे जलनिधेः** ध्वा[illegible]भासि अन्धकारवर्णे **अम्भसि** जले **क्षिप्त-**

क्ष्माभृद्वनालीविलसदसितिमा क्षिप्ताः ये क्ष्माभृतः पर्वताः तेषां वनाली वनपंक्तिः तस्याः विलसन् असितिमा नीलिमा यस्य सः (बहु०) सेतुः एतस्य प्रतापस्य पन्थाः मार्गः क्लृप्तः निर्मितः ।

हिन्दी अनुवाद—हे रामचन्द्र जी ! 'विश्व में अग्नि को कृष्णवर्त्मा (काला-धुआँ जिसका मार्ग है) कहा जाता है । उससे समता करने वाला हमारा प्रताप वैसा क्यों न हो ।' इस बुद्धि से तुम्हारे द्वारा लङ्का में प्रयाण करने के समय समुद्र के अन्धकार के रंग वाले (नीले) जल में फेंके गये पर्वतों के जंगलों की सुशोभित नीलिमा वाला सेतु इस (प्रताप) का मार्ग बनाया गया ।

टिप्पणी—कृष्णवर्त्मा—कृष्णः धूमो वर्त्म यस्य सः (बहु०) बर्हिःशुष्मा कृष्णवर्त्मा कृशानुः पावकोऽनलः इत्यमरः । ध्वान्तभासि—ध्वान्तम् इव भाः यस्य स तस्मिन् (बहु०) असितिमा—असित + इमनिच् । स्रग्धरावृत्तम् काव्यलिङ्गमलंकारः ।

श्री रामस्य तेजस्तरणेरप्यधिकतरं कथयति—

उग्रोऽस्मादप्युदीते रघुपतिमहसः कैतवेनोष्णभानु-
र्व्योमस्थेनामुना किं वदत य इह नस्तापकारी तपर्तौ ।
इत्युच्चैरुल्लसन्तः विदधति तरणिं रेणवस्त्वत्प्रयाणे
क्षुद्रेभ्यः क्षिप्रमापत्प्रतिभटविभवेऽभ्येति तेजस्विनोऽपि ।२५०।

माधुरी—'रघुपतिमहसः कैतवेन व्याजेन अस्मात् अपि उग्रः उष्णभानुः सूर्यः उदीते उद्गच्छति । वदत (यूयम्) व्योमस्थेन आकाशवर्तिना अमुना सूर्येण किं इह यः तपर्तौ ग्रीष्मे नः तापकारी (भवति)' त्वत्प्रयाणे इति हेतोः उच्चैः उल्लसन्तः शोभमानाः रेणवः धूलिकणाः तरणिं सूर्यम् पिदधति आच्छादयन्ति । प्रतिभटविभवे प्रतिस्पर्धिनः समुन्नतौ क्षुद्रेभ्यः अल्पेभ्यः आपत् विपत्तिः तेजस्विनः अपि क्षिप्रम् शीघ्रम् अभ्येति आयाति ।

हिन्दी अनुवाद—'श्री राम चन्द्र जी के तेज के बहाने इन सूर्य से अधिक उग्र सूर्य का उदय हो रहा है । (आप लोग) बताओ आकाश में स्थित सूर्य से क्या यहाँ जो ग्रीष्म में सन्तापकारी बनता हे ।' तुम्हारे प्रयाण काल में इस कारण सुशोभित धूलिकण सूर्य को ढक लेते हैं । प्रतियोगी वीर के वैभव में क्षुद्रों से विपत्ति तेजस्वियों को भी प्राप्त होती है ।

टिप्पणी—उष्णभानुः—उष्णाः भानवः किरणाः यस्य सः (बहु०) तपर्तौ तपः ग्रीष्मः ऋतुः तस्मिन् वदत—(यूयम् इति शेषः) प्रतिभटविभवे—सूर्यो भटस्तस्य

प्रतिभटो रामः तस्य विभवे क्षुद्राः ये धूलिकणाः तेभ्यः तेजस्विनः सूर्यस्य विपत्तिः सञ्जायते । स्रग्धरा वृत्तम् अपह्नुतिः हेतूत्प्रेक्षा चालंकारौ ।

श्रीरामस्य प्रतापाग्निं वर्णयति—

छायावन्तः स्फुरदुरुफलाडम्बरा ये निसर्गात्

तुंगा येभ्यो विगलितवती नोल्लसत्यत्र लक्ष्मीः ।

जातास्तीव्रे ज्वलति जगति त्वन्महश्चित्रभानौ

वैरिक्ष्माभृच्छलविटपिनस्ते यशोभस्मशेषाः ॥२५१॥

माधुरी—ये छायावन्तः **स्फुरदुरुफलाडम्बराः** स्फुरन् उरुफलानाम् आडम्बरो येषु ते (बहु०) निसर्गात् प्रकृत्या तुङ्गाः सन्ति ! येभ्यः लक्ष्मीः शोभा न **विगलितवती** विनष्टा अत्र वने उल्लसति शोभते । ते **वैरिक्ष्माभृच्छलविटपिनः** वैरिणां क्ष्माभृतां छलेन विटपिनः **जगति तीव्रे त्वन्महश्चित्रभानौ** तव तेजो रूपिणि अग्नौ **ज्वलति** (सति) **यशोभस्मशेषाः**—यश एव भस्म शेषो येषां ते (बहु०) जाताः ।

हिन्दी अनुवाद—[हे राम !] जो सघन छाया वाले, अधिक फलों के प्रदर्शन से युक्त, स्वभाव से ऊँचे हैं, जिनसे शोभा कभी भी नहीं हटती (अर्थात् जो सदा सुशोभित रहते हैं ।) वे शत्रु राजाओं के रूप में स्थित वृक्ष, विश्व में आपके प्रताप रूपी तीव्र अग्नि के जलने पर कीर्तिरूप भस्म मात्रावशेष हो गये । (शत्रुराजाओं के युद्ध में मर जाने से उनकी कीर्ति मात्र रह गई । जैसे अग्नि में वृक्षों के जल जाने पर उनकी भस्म मात्र शेष रह जाती है ।)

टिप्पणी—**स्फुरदुरुफलाडम्बराः**—फलं सस्ये शराद्यंगे फलके व्युष्टिफालयोः । लाभे हेतुप्रमुत्थे चेति धरणिः । आडंबरः समारम्भे गजगर्जितरूपयोरिति विश्वः । **त्वन्महश्चित्रभानुः**—तव महः एव चित्रभानुः (कर्म०) सप्तार्चिर्दमुनाः शुक्रः चित्रभानुर्विभावसुरित्यमरः । मन्दाक्रान्तावृत्तम् अतिशयोक्तिरलंकारः ।

श्रीरामप्रतापस्य तदाश्रितशत्रुभूपानां रक्षणमाह—

निराकृतनिशाचरभ्रमणभीर्ज्वलत्येष यः

प्रतापतरणिस्तव क्षपितराजतेजाः प्रभो !

भयेन समुदश्वता निजसरोजसख्यच्छतेः

स तापयति विद्विषो न भवदङ्घ्रिपद्ममाश्रितान् ॥२५२॥

माधुरी—हे प्रभो ! तव **निराकृतनिशाचरभ्रमणभीः** निराकृता निशाचराणां राक्षसानाम् उलूकानां भ्रमणात् भीः येन सः (बहु०) **क्षपितराजतेजाः** क्षपितं दूरीकृतं राज्ञाम् राज्ञः चन्द्रस्य वा तेजो येन सः (बहु०) **यः एषः प्रतापतरणिः** प्रतापः एव तरणिः सूर्यः **ज्वलति । सः निजसरोजसख्यक्षतेः** निजसरोजमैत्रीनाशात् **समुदञ्चता** प्रवृद्धेन भयेन **भवदङ्घ्रिपद्मश्रितान्** भवदीयचरणारविन्दशरणागतान् **विद्विषः** शत्रून् **न तापयति ।**

हिन्दी अनुवाद—हे प्रभो ! आपका राक्षसों के भ्रमण के भय को नष्ट करने वाला तथा राजाओं के तेज को दूर करने वाला जो यह प्रताप रूपी सूर्य जल रहा है वह अपनी व कमल की मित्रता के विनाश के उत्कृष्ट भय से आपके चरण कमल की शरण में गये हुये राजाओं को नहीं सन्तप्त करता है । [सूर्य भी निशाचर उल्लुओं के भ्रमण का भय तथा राजा चन्द्रमा के तेज को दूर करता है अतः रूप्यरूपक भाव समीचीन है ।]

टिप्पणी—राजा—राजाचन्द्रोरोहिणीवल्लभोऽब्जः इत्यभिधानरत्नमालायाम् । **निशाचराः**—निशाचराः समाख्याताः भूतराक्षसपेचकाः इति धरणिः । **समुदञ्चता**—सम् उत् √अञ्च् + शतृ (तृ० ए० व०) **निजसरोजसख्यक्षतेः**—निजं सरोजस्य च सख्यं तस्य क्षतिस्तस्याः (तत्०) **पृथ्वीच्छन्दः रूपकं हेतूत्प्रेक्षा चालंकारौ ।**

श्रीरामस्य प्रतापं तर्केण पावकं सूर्यं वा समर्थयति—

भूभृत्सद्वंशजन्मा बहुतरतृणताशालिनामग्रणीर्यः
तं लब्ध्वा यद्विशिष्य ज्वलति नृप ततः पावक स्त्वत्प्रतापः ।
तेनार्कं तर्कयामस्तमिह विकशितश्यामलाम्भोजपत्र-
च्छायाचौरारिनारीनयनघनपयः पातहेतुर्यतोऽसौ ॥२५३॥

माधुरी—**भूभृत्सद्वंशजन्मा**—भूभृतां राज्ञां [पर्वतानाम्] सद्वंशे सत्कुले [सुवेणौ] जन्म यस्य सः (बहु०) **बहुतरतृणताशालिनाम्** बाणसमूहधारिणाम् [तृणसमूहयुक्तानाम्] **अग्रणीः** नायकः **तं** प्रतापम् [अग्निम्] **लब्ध्वा** प्राप्य **यद्** यतः **विशिष्य** विशिष्टो भूत्वा **ज्वलति ततः** तस्मात्त्वत्प्रतापः **पावकः** अग्निः (अस्ति) । **यतः असौ** प्रतापः [सूर्यः] **इह विकशितश्यामलाम्भोजपत्रच्छायाचौरारिनारीनयनघनपयःपातहेतुः** विकशितं श्यामलं यत् अम्भोजपत्रं तस्य छाया कान्तिः तस्याः चौरः अरिनारीनयनरूपो घनः तस्मात् पयसः अश्रुजलस्य पातस्य हेतुः कारणम्, **तेन तम् अर्कं तर्कयामः** तर्कपूर्वकं साधयामः । [पर्वतस्य वंशकुले जातोऽग्निः तृणसमूहस्तं प्राप्याधिकं ज्वलति तेन तादृशःप्रतापोऽप्यग्निसमः तथा सूर्यः श्याममेघात् जलवर्षणस्य हेतुः प्रतापोऽपि अरिनारीणां नयनाभ्याम् अश्रूणि पातयतीति स सूर्योऽपीति भावः ।]

हिन्दी अनुवाद—क्योंकि जो राजाओं के सत्कुल में उत्पन्न, बाणसमूहधारियों का नेता (राजकुमार) उस (प्रताप) को पाकर विशेष रूप से प्रज्ज्वलित होता है, अतः आपका प्रताप अग्नि है। [अग्नि भी पर्वत के अच्छे बाँस में उत्पन्न होती है तथा तृण-समूह से युक्त बन उसे पाकर अधिक जलता है] क्योंकि वह (प्रताप) विकसित श्यामल कमल पत्र की कान्ति (नीलिमा) को चुराने वाले (के समान) शत्रुराजपत्नी के नेत्रों से अधिक अश्रुपात कराने का कारण है, अतः (हम) उसे तर्क पूर्वक सूर्य सिद्ध करते है। [सूर्य श्यामल घन से वृष्टि के हेतु माने गये हैं]

टिप्पणी—भूभृत्सद्वंशजन्मा—भूभृद्भूमिधरे नृपे इति धरणिः। वंशो वेणौ कुले वर्गे पृष्ठाद्यवयवेपि चेति विश्वः। तृणता—तृणानां समूहः तृणं चापतृणयोरिति धरणिः। स्रग्धरावृत्तं हेतूत्प्रेक्षालंकारः।

अपह्नुत्या वडवाग्निम् श्रीरामप्रतापं कथयति—

भीता भूमिभृतो वनान्तरगताः सन्तीह केचिज्जना-
दित्याकर्ण्य रणद्रुतप्रतिनृपाशङ्की प्रतापस्तव।
कौशल्यातनय प्रविश्य वडवावह्निच्छलेनार्णवं
मैनाकादिमहीधरेष्वपि रुजं धत्ते निजैरूष्मभिः॥२५४॥

माधुरी—हे कौशल्यातनय! 'भीताः भूमिभृतः राजानः वनान्तरगताः भिन्नं वनं गताः, इह समुद्रे केचित् सन्ति। इति जनात् लोकात् आकर्ण्य [भूभृत् इति नाम-साम्यात्] रणद्रुतप्रतिनृपाशङ्की रणाद् द्रुतान् प्रतिनृपान् आशङ्कते इति तादृशः तव प्रतापः वडवावह्निच्छलेन वडवाग्निव्याजेन अर्णवम् समुद्रं प्रविश्य निजैः ऊष्मभिः तापैः मैनाकादिमहीधरेषु मैनाकादिपर्वतेषु अपि रुजं पीडां धत्ते। (तान् पीडयतीति भावः।)

हिन्दी अनुवाद—हे कौशल्यानन्दन! 'डरे हुये राजा दूसरे जंगलों में चले गये हैं। यहाँ समुद्र मे कुछ हैं।' ऐसा लोगों से सुनकर, रणस्थल से भगे हुये शत्रुओ की आशङ्का करने वाला आपका प्रताप बडवानल के बहाने समुद्र में घुसकर अपनी गर्मी से मैनाक आदि पर्वतों को पीड़ित कर रहा है। (बडवानल आपका प्रताप ही है, यह भाव व्यक्त होता है।)

टिप्पणी—वनान्तरम्—भिन्नं वनम् इति वनान्तरम् 'मयूरव्यंसकादयश्च' (अष्टा० २-१-७२) इति समासः वनं प्रस्रवणे गेहे प्रवाहेऽम्भसि कानने इति हैमः शार्दूलविक्रीडितं छन्दः सन्देहोऽपह्नुतिश्चालंकारौ।

श्रीरामप्रतापेन पलाशदाहं सकारणमाह—

ये क्रव्यादाः जगति निखिलास्ते मया साधु दग्धाः
प्लोषस्तेषामपि समुचितो येऽपि नाम्ना पलाशाः ।
इत्यालोच्य ज्वलति जगतीपालकोटीरहीर
त्वत्तेजोऽग्निस्तवकमिषतः किंशुकानोकहेषु ॥२५५॥

माधुरी—जगतीपालकोटीरहीर ! राजमुकुटमणे ! त्वत्तेजोऽग्निः तव प्रतापानलः 'जगति ये क्रव्यादाः ते निखिलाः सर्वे मया साधु सम्यक् दग्धाः प्रज्ज्वलिताः ये नाम्ना अपि पलाशाः पलाशवृक्षाः (सन्ति) तेषाम् अपि प्लोषः दाहः समुचितः कर्त्तव्यः ।' इति आलोच्य विचार्य स्तवकमिषतः पुष्पगुच्छव्याजेन किंशुकानोकहेषु पलाशवृक्षेषु ज्वलति दीप्यते ।

हिन्दी अनुवाद—हे राजमुकुटमणि ! आपका प्रताप रूपी अग्नि 'संसार में जितने राक्षस हैं वे सभी मेरे द्वारा अच्छी तरह जला दिये गये हैं । जो नाम से भी पलाश वृक्ष हैं, उनको भी जलाना चाहिये ।' यह विचार कर पुष्प के गुच्छों के बहाने से पलाश वृक्षों में जल रहा है ।

टिप्पणी—क्रव्यादाः—क्रव्यं मांसम् अदन्ति, राक्षसः कौणपक्रव्यात् क्रव्यादोऽस्रप आसर इत्यमरः। पलाशाः—पलं मासम् अश्नुवते । हरिद्वर्णो राक्षसश्च पलाशं छदने स्मृतम् इति हैमः तथा च पलाशो राक्षसः पलाशवृक्षश्च । स्तवकः—स्तवकः पुष्पगुच्छः स्यान्मुक्ताहारकलापयोरिति विश्वः । किंशुकानोकहेषु—किंशुकाश्च ते अनोकहाः किंशुकानाम् अनोकहाः वा पलाशे किंशुकः पर्ण इत्यमरः, वृक्षो महीरुहः शाखी विटपी पादपस्तरुः अनोकहः इत्यमरः । मन्दाक्रान्तावृत्तम् हेतूत्प्रेक्षापह्नुत्योःसङ्करः ।

भूयोऽपि श्रीरामप्रतापं रामस्य कल्याणभावञ्च व्यनक्ति—

निजधामतपर्तुरवौ ज्वलिते
प्रमदाय जनस्य दशास्यरिपुः ।
भुवनं समयोजयदाशु वशी
सुरभि स्वयशोहिमबालुकया ॥२५६॥

माधुरी—वशी जितेन्द्रियः दशास्यरिपुः रावणारिः निजधामतपर्तुरवौ स्वप्रतापरूपिणि ग्रीष्मसूर्ये ज्वलिते जनस्य प्रमदाय हर्षाय आशु शीघ्रं भुवनम् विश्वं [जलम्] सुरभिस्वयशोहिमबालुकया सुगन्धिना स्वयशोरूपिणा कर्पूरेण [मनोहरशीतलबालुकाकणैः] समयोजयत् संयुक्तं कृतवान् ।

हिन्दी अनुवाद—जितेन्द्रिय श्रीरामचन्द्र जी ने अपने प्रताप रूपी ग्रीष्म-कालीन सूर्य के जलने पर प्राणियों के आनन्द के लिये शीघ्र ही विश्व को अपने यश रूप सुगन्धित कपूर से युक्त कर दिया है अथवा जल को सुन्दर शीतल बालू के कणों से समन्वित कर दिया है [यदि श्रीराम के प्रताप से कोई सन्तप्त हो तो उनके यश का वर्णन कर उसे सुख मिलता है। जैसे ग्रीष्म कालीन सूर्य से सन्तप्त प्राणी शीतल बालू के कणों से युक्त जल में सुख पाते हैं।]

टिप्पणी—**भुवनम्**—जीवनं भुवनं वनमित्यमरः भुवनं विटपेऽपिस्यात्सलिले गगने जले इति हैमः। **निजधामतपर्तुरवौ** निजं धाम तदेव तपर्तोः ग्रीष्मस्य रविस्तस्मिन् **सुरभिस्वयशोहिमबालुकया** सुरभि सुगन्धि मनोज्ञं वा स्वयशः तदेव हिमबालुका कर्पूरः शीतलसिकता वा तया। **तोटकवृत्तम्** रूपकं हेतूत्प्रेक्षा चालंकारो।

अग्निना वनदाहं सहेतुकमुत्प्रेक्षते—

महसा तव निर्जितः शिखी धरणीशध्रुवमेतदाज्ञया।
त्वदरातिशरण्यमायतं दहति क्षिप्रमरण्यमर्चिषा ॥२५७॥

माधुरी—हे **धरणीश**! तव **महसा** तेजसा **निर्जितः** पराजितः **शिखी** अग्निः **ध्रुवम्** निश्चयेन **एतदाज्ञया** एतस्य तव तेजसः आज्ञया **त्वदरातिशरण्यम्** तव शत्रूणां शरणदायकम् **आयतम् अरण्यम् अर्चिषा** ज्वालया **क्षिप्रम् दहति**।

हिन्दी अनुवाद—हे जगन्नाथ! तुम्हारे तेज से पराजित अग्नि निश्चित ही उसकी (तेज की) आज्ञा से तुम्हारे शत्रुओं के शरणदायक विशाल वन को ज्वाला से शीघ्र ही जला रहा है।

टिप्पणी—**शिखी**—शिखा संजाता अस्येति शिखा+इनि 'ब्रीह्यादिभ्यश्च' (अष्टा० ५-२-११६) **त्वदरातिशरण्यम्**—तव अरातयः तेषां शरण्यम् शरणे साधु इति शरण+यत्। छन्दः उत्प्रेक्षालंकारः।

श्रीरामस्य प्रतापेनाग्निसूर्ययोरुपरि विजयमाह—

यः सूर्यं धरणिपते तव प्रतापः
कल्पान्तं ज्वलितुमपि क्षमो विजेतुम्।
औज्ज्वल्याज्जयति स चित्रभानु-
मेषा नामुष्य स्तुतिरतिगर्हणैव गुर्वी ॥२५८॥

माधुरी—हे धरणिपते! तव यः प्रतापः कल्पान्तं कल्पपर्यन्तं ज्वलितुं सूर्यम् अपि

विजेतुं क्षमः समर्थः ('सः औज्ज्वल्यात् दीप्त्या चित्रभानुम् अग्निं [सूर्यं] जयति।' एषा अमुष्य स्तुतिः न [अपि तु] गुर्वी महती अतिगर्हणा अतिनिन्दा एव।

हिन्दी अनुवाद—हे भूपते ! तुम्हारा जो प्रताप कल्प पर्यन्त प्रज्ज्वलित रह सकता है तथा सूर्य को भी जीत सकता है। 'वह कान्ति में अग्नि [सूर्य] को जीत लेता है।' उसकी यह स्तुति नहीं है [किन्तु] महती अत्यधिक निन्दा ही है। [स्तुति पक्ष में चित्रभानु का अर्थ सूर्य होगा]

टिप्पणी—औज्ज्वल्यात्—उज्ज्वलस्य भावः औज्ज्वल्यम् उज्ज्वल + ष्यञ् तस्मात् उज्ज्वलौ दीप्तिशृङ्गाराविति धरणिः। चित्रभानुः—चित्रभानू रविर्वह्निरिति धरणिः। गर्हणा—उपक्रोशो जुगुप्सा च कुत्सा निन्दा च गर्हणे इत्यमरः। प्रहर्षिणी छन्दः व्याजस्तुतिरलंकारः।

शंकरस्य मौलौ वह्निनिवासं सहेतुकमुपन्यस्यति—

ज्वलितमसहमानः पावकस्त्वत्प्रतापं
शिशिरकिरणधामस्वर्धुनीसन्निधानात्।
नरपतिवर विन्दन्निर्वृतिं भालपट्टे
परिहरति न दृष्टिं भूतभर्तुस्तृतीयाम् ॥२५६॥

माधुरी—हे नरपतिवर ! पावकः ज्वलितं समिद्धं त्वत्प्रतापम् असहमानः अमर्षयन् शिशिरकिरणधामस्वर्धुनीसन्निधानात् शिशिरकिरणानां धाम्नः चन्द्रस्य स्वर्धुन्याः गंगायाश्च सन्निधानात् सामीप्यात् निर्वृतिं स्वस्थतां विन्दन् लभमानः भूतभर्तुः शिवस्य भालपट्टे मस्तके तृतीयां दृष्टिं न परिहरति त्यजति।

हिन्दी अनुवाद—हे नरनाथशिरोमणे ! आपके प्रदीप्त प्रताप को न सहन करता हुआ अग्नि, चन्द्रमा तथा गंगाजी की सन्निधि से शान्ति पाता हुआ, शिव जी के मस्तक में स्थित [उनके] तीसरे नेत्र को नहीं छोड़ रहा है।

टिप्पणी—निर्वृतिम्—निर्वृतिः स्यादस्तमुखे स्वस्थतायां च निर्वृतिरिति-धरणिः ताम्। दृष्टिम्—दृष्टि र्ज्ञानेऽक्षिणदर्शने इत्यमरः ताम् मालिनी छन्दः काव्यलिङ्गम् हेतूत्प्रेक्षा चालंकारौ।

इति प्रतापवर्णना समाप्तिमगात्।

अथ श्रीरामस्य कीर्तिप्रतापवर्णना

श्रीरामस्य कीर्तिप्रतापगुणयोः सदा सामीप्यं वर्णयति—

राजन्नुल्लसितप्रतापकनकस्तम्भाधिकोज्जृम्भित-
श्रीमत्कीर्तिवितानभूषितयशःसौधावलीशोभितः ।
वल्मीकप्रभवर्षिवाङ्मयसरित्सम्पर्करम्यश्चिरं
कान्तारे वसताद्भुतं यदि गुणग्रामो मनाङ् नोज्झितः ।२९०।

माधुरी—हे राजन् ! यदि चिरं चतुर्दशवर्षाणि कान्तारे वने वसता भवता **उल्लसितप्रतापकनकस्तम्भाधिकोज्जृम्भितश्रीमत्कीर्तिवितानभूषितयशःसौधावलीशोभितः** उल्लसितः प्रतापः एव कनकस्तम्भाः तैः अधिकम् उज्जृम्भितानि यानि श्रीमन्ति सम्पत्तिशालीनि कीर्तिरूपवितानैर्भूषितानि यशःसौधानि यशःसुधया लिप्ताः प्रासादाः तेषाम् आल्या शोभितः **वल्मीकप्रभवर्षिवाङ्मयसरित्सम्पर्करम्यः** वल्मीकः प्रभवः यस्य सः (बहु०) वल्मीकप्रभवः चासौ ऋषिः इति महर्षिः वाल्मीकिस्तस्य वाङ्मयी सरित् तस्याः सम्पर्केण **रम्यः** मनोज्ञः **गुणग्रामः** गुणानां समूहः **मनाक्** ईषत् **न उज्झितः** त्यक्तः [तत्०] **अद्भुतम्** आश्चर्यम् इति भावः [यद्यपि वनवासकाले कनकस्तम्भसमुच्छ्रित-वितानविलसितप्रासादवती सरयूतटवर्तिनी अयोध्यापुरी भवता परित्यक्ता परन्तु कीर्ति-प्रतापरूपगुणग्रामो न त्यक्तः वाल्मीकीये रामायणे तु स गुणग्रामः सर्वत्र कीर्तितस्तेन तद्रामायणं भवद्गृहमेवास्ते इति भावः]

हिन्दी अनुवाद—हे राजन् ! यदि बहुत दिनों [चौदह वर्ष] तक वन में निवास करते हुये आपने उल्लसित प्रताप रूपी स्वर्ण के खम्भों से अधिक समुन्नत सम्पत्ति-शाली, प्रसन्नता रूप चँदोवे से विभूषित यशरूपी चूना से धवल राजभवनों की पंक्तियों से विलसित महर्षि वाल्मीकि की वाङ्मयी नदी के सम्पर्क से रम्य गुणों के ग्राम का थोड़ा भी त्याग नहीं किया, यह आश्चर्य है । [यद्यपि वनवास के काल में उन्होंने सोने के खम्भों से ऊँचे चँदोवे से युक्त चूना से पोते गये महलों वाली सरयू के तीर पर बसी हुई सम्पूर्ण अयोध्या नगरी का त्याग कर दिया था, तथापि अपने प्रताप व यश जैसे गुणों के समूह का थोड़ा भी त्याग नहीं किया तथा महर्षि वाल्मीकि ने उन्हीं कीर्ति व प्रताप गुणों का उल्लेख अपने रामायण में किया है । इससे रामायण ही उनका घर कहा गया है ।]

टिप्पणी—**प्रतापः**—प्रतापस्तेजसि स्वेदेऽइतिधरणिः **कीर्तिः**—कीर्तिः प्रसादयश-सोरिति धरणिः । **गुणग्रामः**—गुणानां ग्रामः समूहः निवासो वा ग्रामः संवसथे ज्ञेयो वृन्दे शब्दादिपूर्वकः । ग्रामो गतिस्वरे देवे संपूर्वः संयुगे स्मृतः । **शार्दूलविक्रीडितं छन्दः विरोधा-लंकारः** ।

ऐरावतव्याजेन भगवतः कीर्तिप्रतापौ वर्णयति—

रघुवीरयशोराशिव्याजवासवकुञ्जरः ।
पुष्णाति प्रज्वलत्प्रौढतेजः सिन्दूरितः श्रियम् ॥२६१॥

माधुरी— रघुवीरयशोराशिव्याजवासवकुञ्जरः रघुवीरस्य यशसः राशिस्तस्य व्याजेन वासवस्य इन्द्रस्य कुञ्जरः हस्ती ऐरावतः प्रज्वलत्प्रौढतेजःसिन्दूरितः प्रज्वलत् यत् प्रौढं प्रवृद्धं तेजः तदेव सिन्दूरं तेन युक्तः सन् श्रियम् शोभां पुष्णाति वर्धयति ।

हिन्दी अनुवाद—श्रीरामचन्द्र के यश के समूह के रूप में प्रसिद्ध ऐरावत, प्रज्वलित प्रकृष्ट प्रतापरूप सिन्दूर से युक्त (होकर अपनी) शोभा को बढ़ा रहा है । [जैसे सिन्दूर लगाये हुये श्वेत ऐरावत शोभित होता है तथैव श्रीराम का प्रताप से युक्त यश विलसित हो रहा है ।]

टिप्पणी—वासवकुञ्जरः—वासवस्य इन्द्रस्य कुञ्जरः गजः ऐरावताभ्रमातंगैरावणाभ्रमुवल्लभाः इत्यमरः । सिन्दूरितः—सिन्दूरं संजातम् अस्येति सिन्दूर+इतच् सिन्दूरं रक्तचूर्णं स्यादित्यमरः । अनुष्टुप्छन्दो रूपकालङ्कारः ।

श्रीरामस्य यशसः प्रतापस्य च समतां प्राप्तुम् क्रमशश्चन्द्रस्याग्नेश्च तपः वर्णयति—

गिरीशशिरसिस्थितः सहगणैर्नभस्वद्भुजां
तपश्चरति चन्द्रमास्तव यशोऽनुसतुं कृशः ।
विहाय हविरम्बुधेः सलिलमात्रमग्निर्धय-
न्नयं च भवदोजसा समधिरोढुमिच्छुस्तुलाम् ॥२६२॥

माधुरी—[हे राम !] गिरीशशिरसि स्थितः गिरीशः शिवः तस्य शिरसि मौलौ स्थितः नभस्वद्भुजाम् सर्पाणाम् गणैः सह कृशः चन्द्रमाः तव यशः अनुसतुं प्राप्तुं तपः चरति । अयम् अग्निः च हविः विहाय त्यक्त्वा (वडवानलरूपेण) अम्बुधेः सलिलमात्रम् जलम् एव धयन् पिबन् भवदोजसः भवतः प्रतापेन तुलाम् समधिरोढुम् समतां कर्तुम् इच्छुः अभिलाषी (अस्तीति शेषः) । [हे राम] [इह लोके कश्चित् जनः पर्वतशिखरे सर्पैः सह तपश्चरन् कृशो भवति, अन्यः जलमात्रं पिबति ।]

हिन्दी अनुवाद—शिव जी के मस्तक में स्थित, सर्पों के समूहों के साथ कलामात्रावशेष चन्द्रमा आपके यश को पाने के लिये तपस्या कर रहा है (तथा) यह अग्नि हवि को छोड़कर (बडवानल के रूप में) समुद्र का जल मात्र पीता हुआ, आपके प्रताप से समता करने का इच्छुक है । [इस संसार में कोई आदमी सर्पों के

साथ पर्वत शिखर में तपस्या करते हुये दुर्बल हो जाता है। कोई जलमात्र पीकर तपस्या करता है। चन्द्रमा तथा अग्नि क्रमशः श्रीराम का यश व प्रताप पाने के लिये तपस्या कर रहे हैं।]

टिप्पणी—गिरीशशिरसि—गिरीणां पर्वतानाम् ईशः शिवः हिमालयो वा तस्य शिरः मौलिः शिखरं वा तस्मिन् **नभस्वद्भुजाम्**—नभस्वान् वायुः नभस्वन्तं भुङ्क्ते इति√भुज्+क्विप् तेषाम् नभस्वद्वातपवनपवमानप्रभञ्जनाः इत्यमरः। **कृशः**—दुर्बलः कलामात्रावशेषः **तपः**—तपश्चान्द्रायणादौ स्यात्तपः शिशिरमाघयोरिति धरणिः। [अन्योऽपि तपश्चरणे पर्वतमस्तके निवसन् कृशो भवति कश्चित् अन्नादिकं विहाय जलेनापि शरीररक्षणं करोति।] पृथ्वीच्छन्दः उत्प्रेक्षालंकारः। समधिरोढुकामः इति पाठान्तरम् अर्थे तु न विशेषः।

श्रीरामस्य प्रतापवज्रं यशश्चन्द्रं च वर्णयति—

एष त्वत्करवालबालजलदादुद्यत्प्रतापाशनिः
सर्वानुन्नमतः क्षणादुपनयत्युर्वीभृतः खर्वताम्।
उद्गच्छद्भवदच्छकीर्तिपटलच्छद्मक्षपानायकं
राजन् न ग्रसितुं कदाचिदयशोराहुः समुज्जृम्भते ॥२६३॥

माधुरी—हे राजन्! एषः त्वकरवालबालजलदादुद्यत्प्रतापाशनिः तव करवालः खड्गः एव बालो नवो जलदस्तस्मात् **उद्गच्छन्** प्रतापः एव अशनिः वज्रः (कर्म०) **सर्वान् उन्नमतः** उन्नतान् **उर्वीभृतः** राज्ञः [पर्वतान्] **क्षणात्** मुहूर्त्तेनैव **खर्वताम् नयति** हीनान् [लघून्] करोति। **उद्गच्छद्भवदच्छकीर्तिपटलच्छद्मक्षपानायकम्** उद्गच्छत् यत् भवतः अच्छायाः निर्मलायाः कीर्तेः पटलम् राशिस्तस्य छद्मना यः क्षपानायकः तम् **ग्रसितुम्** नाशयितुम् **अयशोराहुः** अयशोरूपी राहुः **कदाचित् न समुज्जृम्भते** मुखं व्याददाति इच्छति वा। [श्रीरामस्य प्रतापः सर्वातिशायी यशश्च निष्कलंकमिति भावः]

हिन्दी अनुवाद—हे राजन्! आपके खड्ग रूपी नवजलद से प्रादुर्भूत यह प्रतापरूपी वज्र सभी अभिमानी राजाओं को हीन कर देता है। [इन्द्र का वज्र सभी ऊँचे पर्वतों को छोटा कर देता है।] तथा ऊपर उठी हुयी आपकी निर्मल कीर्ति के समूह के कपट वेषधारी चन्द्रमा को ग्रसने [नष्ट करने] के लिये अयश रूपी राहु कभी मुख नहीं फैलाता है। [अयश का कलंक आपके यश में नहीं लगने पाता है।]

टिप्पणी—करवालः—निस्त्रिंशः करवालः खड्गः कौक्षेयकः कृपाणश्चेत्यभिधानरत्नमालायाम्। **अशनिः**—दम्भोलिरशनिर्द्वयोरित्यमरः। **उन्नमतः**—उत्√नम्+शतृ (द्वि० ब० व०) **खर्वताम्**—खर्वोह्रस्वः विकलांगो वा तस्य भावस्ताम् **उर्वीभृतः**—उर्वीम् पृथ्वीं बिभर्ति धारयति इति पर्वतः पोषयति इति राजा √डुभृञ् (धारणपोषणयोः)

+ क्विप् इति उर्वीभृत् बहुवचने तु उर्वीभृतः समुज्जृम्भते—उज्जृम्भः स्फुटितेहयोरिति धरणिः। शार्दूलविक्रीडितं छन्दः रूपकालङ्कारः।

श्रीरामेण स्वतेजःसूर्यस्य यशश्चन्द्रस्य च शत्रोः राहोर्वधं व्याजेन वर्णयति—

त्वत्तेजस्तिग्मभानुस्फुरदमलयशःशीतरोचिःशतानि
प्रेक्ष्य प्रेक्ष्योदयन्ति ग्रसितुमभिलषन् सैंहिकेयः स्वयं यान्।
कायव्यूहान् वितेने रणभुवि भवता पातिताः पत्रिभिस्ते
वीर श्रीरामभद्र प्रतिभटनिकषासूनुशीर्षच्छलेन ॥२६४॥

माधुरी—हे वीर रामभद्र ! सैंहिकेयः राहुः त्वत्तेजस्तिग्मभानुस्फुरदमलयशःशीतरोचिःशतानि तव तेजः एव तिग्मभानुः सूर्यः स्फुरत् अमलं यशः एव शीतरोचिः चन्द्रः तयोः शतानि उदयन्ति निर्गच्छन्ति प्रेक्ष्य प्रेक्ष्य दृष्ट्वा दृष्ट्वा ग्रसितुम् कवलयितुम् अभिलषन् इच्छन् स्वयं यान् कायव्यूहान् शरीरसमूहान् वितेने विस्तृतवान्। ते प्रतिभटनिकषासूनुशीर्षच्छलेन शत्रुराक्षसशिरोव्याजेन भवता रणभुवि युद्धस्थले पत्रिभिः बाणैः पातिताः। [रणभुवि पतितानि राक्षसानां शिरांसि श्रीरामस्य यशश्चन्द्रस्य प्रतापसूर्यस्य च ग्रासाय प्रादुर्भूताः बहवो राहवः एव श्रीरामबाणेन हताः सन्ति इति तात्पर्यम्।]

हिन्दी अनुवाद—हे वीर रामभद्र ! आपके तेज रूपी सैंकड़ों सूर्य तथा प्रादुर्भूत निर्मल यशरूपी सैंकड़ों चन्द्रमा को निकला हुआ देख देखकर राहु ने [उन्हें] ग्रसने की लिये इच्छा करते हुये, स्वयं जितने शरीरों का विस्तार किया; वे शत्रु राक्षसों के शिरों के रूप में आपके द्वारा युद्धस्थल में बाणों के द्वारा गिरा दिये गये। [युद्धस्थल में पड़े हुये राक्षसों के शिर श्रीराम के यश रूपी सैंकड़ों चन्द्रमा व प्रताप रूपी सैंकड़ों सूर्य को ग्रसने के लिये प्रकट हुये बहुत से राहु हैं। जिन्हें भगवान् ने अपने बाणों से मार कर गिरा दिया है, यह तात्पर्य है।]

टिप्पणी—सैंहिकेयः—सिंहिकायाः अपत्यम् तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुन्तुदः इत्यमरः उदयन्ति—उत् √इ + शतृ (प्र० ब० व०) प्रतिभटनिकषासूनुशीर्षच्छलेन—प्रतिभटाः ये निकषासूनवः राक्षसाः तेषां शीर्षाणि तेषां छलेन व्याजेन। स्रग्धरावृत्तम् रूपकमपह्नुतिश्चालंकारौ।

श्रीरामचन्द्रस्य प्रतापेन शुष्यतः सिन्धो र्यशश्चन्द्रेण तस्य वर्धनमाह—

ज्वलयति जगदुग्रे तावकीने प्रतापे
कथय किमिति सिन्धुर्नैष शोषं प्रयाति।
क्षितिपरिवृढ मन्ये वर्धयत्येनमुच्चै-
रनुतटमनुकीर्णः कीर्तिचन्द्रातपस्ते ॥२६५॥

माधुरी—हे क्षितिपरिवृढ ! भूमिपते ! उग्रे तावकीने तव प्रतापे जगत् ज्वलयति ज्वलितं कुर्वाणे **एषः सिन्धुः** समुद्रः **किम् शोषं न प्रयाति** न शुष्यति इति कथय **अनुतटम्** तटेषु **अनुकीर्णः** प्रक्षिप्तः **ते कीर्तिचन्द्रातपः** कीर्तिकौमुदी **एनम् उच्चैः वर्धयति** [इत्यहम्] **मन्ये** ।

हिन्दी अनुवाद—हे भूपते ! आपके उग्र प्रताप के द्वारा विश्व के जलाने पर यह समुद्र क्यों नहीं सूखता है ? यह बताओ । [समुद्र के] तटों में बिखरी हुई आपकी कीर्ति रूपिणी कौमुदी (चाँदनी) उसे अधिक बढ़ा रही है [ऐसा मैं] मानता हूँ ।

टिप्पणी—**अनुतटम्**—तटेषु इति (अव्य०) मन्ये 'अहम्' इति कर्तृपदस्याध्याहारः **कीर्तिचन्द्रातपः**—कीर्तिरेव चन्द्रस्तस्यातपः प्रकाशोद्योत आतप इत्यमरः । मालिनीच्छन्दः उत्प्रेक्षाऽलंकारः ।

श्रीरामप्रतापदग्धशत्रुभस्म, तदीयं यशः कथयति—

त्वदुग्रप्रतापानलेनार्जितं यत्
सदर्पद्विषद्दारुसन्दोहदाहे ।
शरच्चन्द्रिकाभासुरं भस्म भूयस्
तदेव त्वदीयं यशस्तर्कयामि ॥२६६॥

माधुरी—[हे राम !] **सदर्पद्विषद्दारुसन्दोहदाहे** सदर्पाः दर्पेण सहिताः ये द्विषन्तः शत्रवः ते एव दारूणि तेषां सन्दोहः तस्य दाहे **यत् शरच्चन्द्रिकाभासुरं** शरदः चन्द्रिकावत् भासुरं शुभ्रं **भस्म त्वदुग्रप्रतापानलेन** तव उग्रः प्रतापः एवानलः तेन **भूयः** पुनः **अर्जितम्** प्राप्तम् **तदेव त्वदीयं यशः तर्कयामि** सम्भावयामि ।

हिन्दी अनुवाद—[हे राम] गर्वित शत्रु रूपी लकड़ियों के समूह के जलने पर शरत्कालीन चन्द्रिका के समान शुभ्र जो भस्म आपके उग्र प्रतापरूपी अग्नि के द्वारा पुनः प्राप्त हुई, उसी को मैं आपका यश मानता हूँ (मैं अनुमान करता हूँ कि वही आपका यश है ।)

टिप्पणी—**भासुरम्**√भास् (दीप्तौ) + घुरच् तं भूपतिर्भासुरहेमराशिम् (रघु० ५-३०) भुजंगप्रयातं छन्दः वृत्यनुप्रासः उत्प्रेक्षाचालङ्कारौ ।

कवेर्वाण्या श्रीरामयशःपटस्य तेजःसिन्दूरस्य च लाभेऽपि रामशत्रोरयशःकज्जलस्याप्राप्तिं कथयति—

लब्धः श्रीरामकीर्तिच्छलधवलपटस्त्वद्गुणग्रामजन्मा
तेजःसिन्दूरपांशुर्नवमिहिरतमःसोदरोऽयं च तादृक् ।
अस्मद्वाचः स्पृहास्याः कलयितुमयशःकज्जलं यत्तवारे-
र्दुष्प्रापन्नस्तदुच्चैः परिषदि भवता कुप्यता वारितानाम् ।२६७।

माधुरी—श्रीराम ! त्वद्गुणग्रामजन्मा तव गुणानां [सूत्राणाम्] ग्रामे जन्म यस्य सः (बहु०) **कीर्तिच्छलधवलपटः** [भवतः] कीर्तेः छलेन कपटेन धवलः पटः **नवमिहिरमहःसोदरः** बालसूर्यतेजःसमः **तादृक्** अयं तेजःसिन्दूरपांशुः प्रतापरूपी सिन्दूर-परागः च **लब्धः** । **अस्याः अस्मद्वाचः** मम वाण्याः **यत् तवारेः** तव शत्रोः **अयशः कज्जलं कलयितुं स्पृहा** इच्छा [वर्तते] **कुप्यता** कोपं कुर्वता **भवता परिषदि** सभायां **वारितानाम् नः** अस्माकम् **तत् उच्चैः** अत्यन्तं **दुष्प्रापम्** प्राप्तुम् अशक्यम् । [श्रीरामस्य यशसो गानेन तद्रूपः पटः प्रतापवर्णनेन तद्रूपः सिन्दूरपरागस्तु वाण्या लब्धः परन्तु परिषदि तस्य शत्रूणाम् नामोच्चारणनिषेधात् तेषाम् अयशो-वर्णनं नैव कृतं, तेनायशः कज्जलं न वाण्या लब्धमिति तात्पर्यम् ।]

हिन्दी अनुवाद—हे रामचन्द्र जी ! आपके गुणों के समूह में उत्पन्न यश के रूप का श्वेत पट तथा बाल सूर्य के घाम के समान वैसा ही (आपके शौर्य आदि गुणों में उत्पन्न) प्रताप रूपी सिन्दूर प्राप्त हो गया है । हमारी इस वाणी को जो आपके शत्रु के अयश रूपी कज्जल को पाने की इच्छा है, कुपित आपके द्वारा सभा में [शत्रु का नाम लेने से] रोके गये हमारे लिये उसे पाना बड़ा ही कठिन है । [श्रीराम का यशोगान करने से यशोरूप पट तथा प्रताप का वर्णन करने से तद्रूप सिन्दूर तो वाणी (वाग्देवी) को मिल गया परन्तु सभा में भगवान् के शत्रुओं के नामोच्चारण का निषेध होने से उन शत्रुओं के अयश का वर्णन नहीं किया गया । अतः अयश रूप कज्जल पाने की वाणी की इच्छा पूर्ण न हो सकी, यह भाव है ।]

टिप्पणी—**अस्मद्वाचः**—कवीनाम् । उक्तिरियम् वाक् अपि स्त्री वर्तते स्त्रियस्तावत् पटं सिन्दूरं कज्जलं च वाञ्छन्ति । यशोरूपःपटः प्रतापरूपं सिन्दूरं च तया प्राप्तम् । शत्रूणामयशोरूपं कज्जलं तु नैव प्राप्तुं शक्यते, परिषदि तेषां नामोच्चारणनिषेधात् । श्रीरामस्य परिषदि कवयस्तस्य यशःप्रतापावेव वर्णयन्तीति भावः । **नो दातुं शक्नुमस्तत्परिषदि भवता कुप्यता वार्यमाणाः** इति पाठान्तरम् तदर्थस्तु वार्यमाणाः वयं कवयः तद्दातुं नो शक्नुमः (श्री राम के द्वारा रोके गये हम लोग उनके शत्रुओं का

अयश रूप कज्जल अपनी वाणी को नहीं दे सकते हैं। यह भाव है।) स्रग्धराच्छन्दः रूपकमुपमा चालंकारौ।

संग्रामसरसि रघुपतेः प्रतापकमलविकासं यशोराजहंसविलासं च वर्णयति—

सङ्ग्रामोर्वीसरस्यामरिनृपतिकुलाकीर्तिपङ्काकुलायां
रक्ताब्जारण्यपुञ्जः स्फुरति रघुपते त्वत्प्रतापच्छलेन।
अस्मिन्नस्वं विलासं विरमयति यशोराजहंसद्विजाली
विश्वख्यातं न जातुत्यजतिपुनरयंसख्यमुष्णत्विषोऽपि।२६८॥

माधुरी—हे रघुपते ! अरिनृपतिकुलाकीर्तिपङ्काकुलायां अरिनृपतीनां कुलस्य अकीर्तिरेव पङ्कं तेन आकुला पूर्णा तस्याम् (तत्०) सङ्ग्रामोर्वीसरस्याम् सङ्ग्रामस्य उर्वी सैव सरसी तस्यां (कर्म०) त्वत्प्रतापच्छलेन तव प्रतापस्य छलेन व्याजेन रक्ताब्जारण्यपुञ्जः रक्तकमलवनसमूहः स्फुरति शोभते। अस्मिन् कमलवने यशोराजहंसद्विजाली यशः एव राजहंसः द्विजः पक्षी तस्याली पङ्क्तिः विश्वख्यातं सर्वविदितं स्वं विलासं विहारं न विरमयति त्यजति। पुनः अयम् रक्ताब्जपुञ्जः अपि उष्णत्विषः सूर्यस्य सख्यं मैत्रीं जातु न त्यजति सदा उत्फुल्लो वर्तते इति भावः [यशःप्रतापौ परस्परं पुष्यतः इति ध्वनिः।]

हिन्दी अनुवाद—हे रघुपते ! शत्रु राजाओं के समूह के अयशरूपी पङ्क से पूर्ण सङ्ग्राम की धरती रूपी तालाब में तुम्हारे प्रताप के बहाने से लाल कमलों का समूह शोभित हो रहा है। उस (कमलवन) में [आपके] यश रूपी राजहंस पक्षियों की पंक्ति अपने सर्वविदित विहार को नहीं त्याग रही है। तथा लाल कमलों का बन भी सूर्य की मैत्री को कभी भी नहीं त्याग रहा है [लाल कमल सदा खिले रहते हैं तथा उनमें हंसों की पङ्क्ति विहार किया करती है, यह तात्पर्य है। यहाँ पर भगवान् के यश एवं प्रताप की परस्पर पुष्टि ध्वनित होती है।]

टिप्पणी—उष्णत्विषः—उष्णा त्विट् आभा यस्य स तस्य (बहु०) चयस्त्विषामित्यधारितं पुरा (शिशु० १-१३) स्रग्धरावृत्तम् रूपकापह्नुत्योः साङ्कर्यम् यशःप्रतापयोः परस्परभावनारूपवस्तुध्वनिः।

शत्रुवीरदाहकस्य श्रीरामप्रतापस्य स्वकीर्तिरक्षणं ब्रूते—

अप्यन्तर्वाहिनीनां करिमदसलिलप्लावितक्ष्मातलानां
दह्यन्ते येन देव प्रसभमरिभटास्त्वत्प्रतापानलेन।
चित्रं सद्योणिचक्रे वियति च विततास्तावकीरेष विष्वङ्
मूर्च्छन्नौर्जित्यशालीग्लपयतिनमनाक्कीर्तिशुक्लांशुकालीः।२६९

माधुरी—हे देव ! येन **त्वत्प्रतापानलेन** तव प्रतापाग्निना **करिमदसलिलप्लावितक्ष्मातलानाम्**—करिणां मदसलिलेन प्लावितम् क्ष्मातलं यासां ताः तासाम् **वाहिनीनाम्** सेनानाम् (नदीनाम्) **अपि अन्तः अरिभटाः** शत्रुवीराः **प्रसभं** बलात् **दह्यन्ते** । **चित्रम्**, **औजित्यशालो** शक्तिशाली **मूर्च्छन्** वर्द्धमानः **सः एषः क्षोणिचक्रे** भूमण्डले **वियति** आकाशे च **विष्वङ्** समन्तात् **वितताः** विस्तृताः **तावकीः** भवदीयाः **कीर्तिशुक्लांशुकालीः** कीर्तिश्वेतकिरणपंक्तीः **मनाक्** ईषत् **न ग्लपयति** दाहयति ।

हिन्दी अनुवाद—हे परमेश्वर ! आपके जिस प्रताप रूपी अग्नि के द्वारा हाथियों के मदजल से डुबी हुई धरती वाली सेनाओं (नदियों) के भी अन्दर शत्रुवीर बलपूर्वक जलाये जाते हैं । आश्चर्य है कि शक्तिशाली (होकर) बढ़ता हुआ ऐसा यह प्रताप भूमण्डल तथा आकाश में चारों ओर फैली हुई आपकी कीर्तिरूपिणी श्वेत किरणों की पंक्तियों को थोड़ा सा भी नहीं जलाता है । [जो प्रताप (नदी) सेना के अन्दर स्थित भी शत्रुवीरों को जला डालता है, वह धरती व आकाश मे सर्वत्र व्याप्त कीर्तिकिरणों का स्पर्श तक नहीं करता यह आश्चर्यकर विरोध व्यक्त हो रहा है ।]

टिप्पणी—**वाहिनी**—सेना नदी च **औजित्यशाली**-ऊर्जितः बलवान् तस्य भावः ऊर्जित + ष्यञ् और्जित्यम् बलम् तेन शालते शोभते तच्छीलः इति और्जित्य √शाल् + णिनि । **कीर्तिशुक्लांशुकालीः**—कीर्तयः एव शुक्लानि अंशुकानि सूक्ष्मवस्त्राणि किरणाः वा तेषाम् आलीः । **स्रग्धरावृत्तम् विरोधालङ्कारः** ।

इति कीर्तिप्रतापवर्णना समाप्तिमगात् ।

मालासम्पूर्तिः

श्रीरामस्य स्तुतेः पश्चात्तस्माद्भक्तिरूपं धनराशिं प्राप्य बन्दिगणस्य प्रस्थानं वर्णयति—

कीर्तिप्रतापाविति वर्णयित्वा
श्रीरामचन्द्रस्य गुणोज्ज्वलस्य ।
लब्ध्वा ततोऽनन्तवतीं विभूतिं
स्वं मन्दिरं वन्दिगणः प्रतस्थे ॥२७०॥

माधुरी—**वन्दिगणः** चारणसमूहः **गुणोज्ज्वलस्य** गुणैः शौर्यादिभिः उज्ज्वलस्य

मनोज्ञस्य श्रीरामचन्द्रस्य कीर्तिप्रतापौ इति एवम् वर्णयित्वा कथयित्वा स्तुतिं कृत्वा वा ततः श्रीरामात् अनन्तवतीं अविनाशिनीं विभूतिं सम्पत्तिं (भक्तिम् इत्यर्थः) लब्ध्वा प्राप्य स्वं मन्दिरं प्रतस्थे अगच्छत् ।

हिन्दी अनुवाद—वन्दना करने वाले चारणों के समूह ने शौर्यादिगुणों के कारण सुन्दर भगवान् रामचन्द्र जी की कीर्ति तथा प्रताप का इस प्रकार वर्णन करके [यश व प्रताप की स्तुति कर] उन [भगवान्] से अनपायिनी (कभी भी नष्ट न होने वाली) विभूति (भक्ति) को प्राप्त कर अपने घर को प्रस्थान किया ।

टिप्पणी—वर्णयित्वा—वर्णो द्विजादिशुक्लादि यशोगुणकथासु च । स्तुतौ नान स्त्रियां भेद रूपाक्षरविलेपने गुणोज्ज्वलस्य—गुणैः उज्ज्वलः तस्य (तत्०) गुणो मौर्व्याम-प्रधाने रूपादौ सूद्रइन्द्रिये । त्यागे शौर्यादिके सन्ध्या सत्त्वाद्यावर्ति रज्जुषु । शुक्लादावपि बुद्ध्यां चेति रुद्रः । अनन्तवतीम्—अन्तम् विनाशः अस्याः अस्ति इति अन्तवती विनाशिनी अन्तवन्त इमे देहाः नित्यस्योक्ताः शरीरिणः (गीता) न अन्तवती इति अनन्तवती अविनाशिनी ताम् विभूतिम्—भूतिर्भस्मनि सम्पत्तिहस्तिशृंगारयोः स्त्रियामिति मेदिनीकारः । इन्द्रवज्राच्छन्दः उदात्तालङ्कारः ।

श्रीरामस्य काव्यमयीं स्तुतिं कृत्वा कविस्तस्य प्रसादं प्रार्थयते—

निजकीर्तिकुमुदमालानिर्मितिनिर्धूतपातकप्रकरे ।
कारुण्यजलधिरधिकं मयि दाशरथिः प्रसन्नोऽस्तु ॥२७१॥

माधुरी—कारुण्यजलधिः करुणायाः समुद्रः दाशरथिः दशरथनन्दनः निजकीर्तिकुमुदमालानिर्मितिनिर्धूतपातकप्रकरे निजा कीर्तिः एव कुमुदमाला तस्याः निर्मितिः रचना तया निर्धूतः निर्भर्त्सितः पातकानां प्रकरः समूहः यस्य स तस्मिन् (बहु०) मयि त्रिविक्रमनामके कवौ अधिकं प्रसन्नः अस्तु । [करुणासागरः सः सर्वेषु कृपां करोति श्लोकरूपैः कुमुदैः मालां विरच्य तस्याः समर्पणेन पापपुञ्जविनाशे ममोपरि विशेषतः कृपां करोतु इति कवेः प्रार्थना ।]

हिन्दी अनुवाद—करुणा के समुद्र दशरथनन्दन श्रीराम, अपनी [श्रीराम की] कीर्तिरूप कुमुद पुष्पों की माला की रचना से जिसके पातकों का समूह नष्ट हो गया है, ऐसे मुझ [त्रिविक्रम कवि] पर अधिक प्रसन्न हों । [भगवान् दशरथनन्दन राम करुणा के समुद्र हैं अतः उनकी कृपा सबके ऊपर रहती ही है। मैने श्लोक रूप कुमुद पुष्पों से उनके लिये एक माला की रचना की है, जिससे मेरे पाप समूह का विनाश हो गया है । अतः अविनाशिनी भक्ति रूप विशेष कृपा के लिये वे मेरे ऊपर अधिक प्रसन्न हों ।]

टिप्पणी—निर्धूतः—निश्शेषेण धूतः तिरस्कृतः नष्टः इत्यर्थः। धूतः कम्पितभर्त्सिते इति धरणिः । आर्याच्छन्दः परिकरालङ्कारः ।

काव्यसमाप्तेः समयं निर्दिशन् महाकविस्त्रिविक्रमः स्वश्लोककुमुदमालां भगवतः प्रसादाय तस्मै समर्पयति—

अब्दे नक्षत्रनाथेश्वरनयनघनोद्भासिते मासि भाद्रे
पक्षे कृष्णे तिथावप्यगपतिदुहितु र्वासरे भास्करस्य ।
त्रैविक्रम्या गिरैषा सहजविमलया ज्योत्स्नयेवोल्लसन्ती
सम्पूर्णा रावणारेः सुरभिरिह यशःकैरवस्रङ्मुदेऽस्तु ॥२७२॥

माधुरी—सहजविमलया—निसर्गनिर्मलया ज्योत्स्नया चन्द्रिकया इव त्रैविक्रम्या गिरा त्रिविक्रमकवेः वाण्या उल्लसन्ती एषा सुरभिः मनोज्ञा रावणारेः श्रीरामस्य यशःकैरवस्रक् कीर्तिकुमुदमाला नक्षत्रनाथेश्वरनयनघनोद्भासिते नक्षत्रनाथः चन्द्रमाः एकः १ ईश्वरनयनानि त्रीणि ३ घनाः सप्तदश १७ अंकानां वामतो गति रिति न्यायेन १७३१ अब्दे संवत्सरे भाद्रे मासि कृष्णे पक्षे अगपतिदुहितुः अगपतिः हिमालयस्तस्य दुहिता कन्या पार्वती तस्याः तिथौ तृतीयायां भास्करस्य वारे रविवासरे सम्पूर्णा [सा भगवतो जानकीजानेः रामचन्द्रस्य] मुदे प्रसन्नतायै अस्तु [इति तस्मै समर्पयामि] ।

हिन्दी अनुवाद—स्वभावतः निर्मल चन्द्रिका के समान त्रिविक्रम कवि की वाणी के द्वारा प्रकट हुई यह भगवान् राम की मनोहर कीर्तिकुमुदमाला संवत् १७३१ भाद्रपद मास के कृष्ण पक्ष की तृतीया तिथि सूर्यवार को सम्पूर्ण हुई । यह [भगवान् सीतापति राम की] प्रसन्नता के लिये हो [अतः उन्हें समर्पित करता हूँ ।]

टिप्पणी—घनाः—१७ युक्ता घनैश्चापि (मुहुर्त्त० वास्तु० ३) तिथावप्यगपतिदुहितुः—तिथीशाः वह्निको गौरी (मुहुर्त्त शुभ० ३) त्रैविक्रम्या—त्रिविक्रमस्येयम् इति त्रिविक्रम + अण् + ङीप् त्रैविक्रमी तया । स्रग्धराच्छन्दः उपमालंकारः ।

इति श्रीविश्वम्भरात्मसम्भवश्रीगुरुधरणीधरचरणाराराधनसावधानत्रिविक्रमकृता रामकीर्तिकुमुदमाला सम्पूर्णा ॥

वेदाश्वाष्टमहीभिरन्वितमितौ संवत्सरे वैक्रमे
मासे श्रावणिके दले च विशदे पञ्चेषुतिथ्यां कवेः ।
वारे रावणवैरिकीर्तिकुमुदस्रक्पुस्तकं सुन्दरं
विंशार्केक्षणपत्रकं विलिखितं दुर्गाप्रसादेन च ॥

त्रिपाठिना चैकडलाधिवासिना शिवप्रियाभक्तिरतेन छात्रकैः ।
स्वकीयवंशाम्बुजसूर्यरूपिणोऽग्निहोत्रिणो वै हरदत्तकस्य च ॥

हिन्दी अनुवाद—एकडला (फतेहपुर–उत्तरप्रदेश) ग्राम के निवासी, श्री दुर्गाजी की भक्ति में रत [महापंडित] श्री दुर्गा प्रसाद त्रिपाठी ने (वेदाः ४ अश्वाः ७ अष्ट ८ मही १) विक्रम संवत् १८७४ के श्रावण मास शुक्ल पक्ष त्रयोदशीतिथि शुक्रवार के दिन 'रामकीर्तिकुमुदमाला' नामक सुन्दर पुस्तक को (विंशः २० अर्काः १२ ईक्षणे २) = ३४ पत्रों में लिखा । इस कार्य में उन्हें, अपने वंशरूपी कमल के उद्बोधक सूर्य सदृश श्रीमान् हरदत्त जी अग्निहोत्री तथा उनके छात्रो का सहयोग प्राप्त हुआ ।

लब्धदुर्गाप्रसादस्तं स्ववंशाम्भोजभास्करम् ।
दुर्गाप्रसादं नत्वा तट्टिप्पणीः परिभाव्य च ॥

तत्पौत्रीयसुपौत्रपौत्रमहितश्रीचन्द्रभानुः कृती
माल्ये रामसुकीर्तिकैरवमये व्याख्यामिमां माधुरीम् ।
अब्दे बाणशिवाक्षिशून्यनयनैः ख्याते शुभे वैक्रमे
मार्गे शुक्लदले गुरौ हिमरुचेस्तिथ्यामकार्षीन्मुदा ॥

त्रिविक्रमकविः श्रीमान् श्रीरामयशसः श्रियम् ।
कृतवान् काव्यरूपां तन्माधुरीयं भवेन्मुदे ॥

• • •

अकारादिक्रमेण श्लोकसूची

श्लोकः	संख्या
अगारे दुर्गायाः	१५८
अग्रे पूग	१३९
अङ्गैरञ्जन	६०
अङ्घ्रिरघमेष	२
अतुलायति	१२६
अत्यर्थं स्नेहशून्ये	२४६
अत्रालवाल	१७८
अनिशमधिवसन्	२३९
अन्तर्द्धिप्रार्थिनम्	२४१
अपेयैः पयोदार्पितै०	१६४
अप्यन्तर्वाहिनीनाम्	२६९
अब्दे नक्षत्रनाथे	२७२
अभ्यवहरतु मृणालम्	२१०
अम्बरं मलिनयन्ति	६१
अयशो जलदा	४९
अर्पिते रामचन्द्राय	३१
अलिच्छवी मृगमद	१८६
अवधीरित	१४९
अवधीरिता	१२७
अविश्रान्तदानैः	१४२
असितस्त्वद्	२२३
अस्ति त्वद्वाह	६७
अस्तु क्षीरनिधिः	२३६
आकर्ण्य	१०१
आकलय्य	१९४
आभाति यद्	१७
आशु प्रालेयराशिम्	२०१
आषाढे धरणी	४८

श्लोकः	संख्या
इति परिजनस्योक्तिम्	९
इत्याशयम्	१०
इत्युपश्लोकितः	२०५
इन्दुर्नाथ निरीक्ष्यताम्	१९२
उग्रोऽस्मादण्युदीते	२५०
उच्चैरुल्लास्य	१००
उद्यानेऽमृत	१९१
उल्लसच्चित्र	१००
उल्लसन्नवनाग	८८
एतेन व्यक्तमम्भोजे	३२
एतैर्भासा	२३०
एष त्वत्करवाल	२६३
औदार्यं कियद्	१५२
कति तव सुमनः	१८७
कम्बुः कश्चित्	२२
करपुष्कर	५०
कराकलितकार्मुके	३९
करिणां तवाभिनव	८३
कर्पूरद्विपदन्त	२०७
कलयसि गतिम्	३८
कल्पक्ष्मारुह	१३८
काचिद् विधाय	१९०
कार्यैरेतैः	७६
किमिति	८
किं चित्रमवनि	१७२

श्लोकः	संख्या
किं निर्माय	२०१
किम् पञ्चरागोपल	३६
कीर्णंधाम चिराय	१२८
कीर्तिप्रतापाविति	२७०
कीललपाकलित	१३३
कुर्मश्छायाम्	२०२
कृन्तति केलिवनम्	९८
केयूरबद्धोपल	२१
केशब्रजीभूय	३५
कोशादाशु	५६
कौशल्यासूनुकण्ठस्य	२३
क्षितीश्वरालक्षित	११८
क्षिप्रवाहमिदम्	६२
क्षीरक्षीराब्धि	२०४
क्षीराब्धि	२६
क्षीरोदत्येष तारा	२१३
क्ष्मापाल	१०७
खण्डितं भुवि न	२०८
खर्जूरसर्ज	१८२
ख्याता राम	१०४
ख्यातो वातः	६५
गण्डगलन	९१
गतोमानसे	१६३
गमितानिहास	२२६
गलन्मदा	११७
गायन्त्या वन	२१८
गिरीशशिरसि	२६२
गुञ्जति भ्रमरावली	१८४
गुरुद्रविणगर्विता	२१९

श्लोकः	संख्या
गोत्रगुरुस्तव	३४
गोपालत्वमुपेयुषः	१९
ग्रीष्मप्रोषित	२१५
घनदानजलार्द्र	१
घन बल	१०६
चित्रविलसित	१६
छायावन्तः	२५१
छिनत्ति मूर्धानम्	५४
जनकतनया	२२८
जयति नृपति	६
जय प्रलय	११२
जितक्षीरा हीराः	१३७
जुष्टाः श्रिया	६१
ज्वलयति जगदुग्रे	२६२
ज्वलितमसहमानः	२५९
तल्पे चाम्पेय	१८९
तल्पे तापिच्छ	१८५
तव कीर्तिमराला	४४
तव गजगणेन	७८
तव गृहमतुल	७७
तव भुज	५९
तवभुजमलयजशाखा	२३८
तव विहरण	१७०
तवासिरायसम्	५२
तादृग्वाजि	१०५
तापिच्छस्तवद्	१७५
तुलयति तनुम्	३७

श्लोकः	संख्या
तुष्टाप्यदो	२०६
तेऽप्यलब्धबुद्धयः	११
त्वत्तेजस्तिग्मभानुः	२६४
त्वत्प्रयाणे	१०२
त्वदीयानां पङ्क्तः	१६५
त्वदुग्रप्रतापानलेन	२६६
त्वद्गोपालन	२२१
त्वद्विहारगिरौ	१९५
त्वद्वृन्दारक	१५४
त्वयाऽजनि यशोराशिः	२२२
त्वं लक्ष्म्याः	१४
त्वामायान्तम्	२१७
दत्तोवह्नि्नस्त्वदीयैः	२४०
दत्वा तेभ्यः	१२
दन्तावला न	९५
दास्यत्येष	१५१
दिनेशकुल	१३६
दिशि दिशि	८२
दुर्गं मा गाः	११९
दूरतः पथिकः	१७४
दृशः केषामुच्चैः	१८
दृष्ट्वा भानोरगारम्	१६०
देव त्वद्दन्ति	६३
देवागारे त्वदीये	१५५
दोषाकरस्तव	२५
धरित्रीभृति	१९७
धावद्भिः सार्धमेतैः	६०
धौताङ्घ्रेः	१७६
न कर्पूरासारः	२२७
नटन्नीलग्रीवाः	१६८
न त्वया मुखमात्रेण	२४
न दरीसविध	४५
नन्दनतोऽप्यभिरामम्	१८३
नवपद्मरागसद्मनि	१५९
नागवल्लीरसज्ञोऽसि	४६
निजकीर्तिकुमुद	२७१
निजधामतपतुरवौ	२५६
निजधाम	६६
निरस्तवान्	४०
निरस्य सुलभम्	१२४
निराकृतनिशाचर	२५२
निर्यातःप्रात	२१४
निलिम्ना	५३
नीरूपोऽयमनभस्वान्	६८
नृप त्वन्निदेश	१६२
नृप स्वर्णदुर्वर्ण	१९९
नैतन्नैश	१०८
नो धत्ते शोणभावम्	२३४
पतत्रिराजो	७०
पताकास्त्वदीयाः	८४
पत्राधिकाः	८५
पद्मं त्वदक्षिद्युतिचौरम्	३३
पद्माकरे	८९
परिश्रमः क्वचन	१८८
पाणिच्छद्मारविन्द	५१
पाराद्वारांनिधेः	११४
पारावारप्रतीरे	२३५
पिधीयते	१०३
पीयूषाक्षेपदक्षाः	१३
पुलिनमवदारयति	१३५
पुष्यतस्त्विषम्	२०
प्रतिभटशोणित	५८

श्लोकः	संख्या
प्रत्यग्रं दधति	१७७
प्रत्यग्रस्थूल	१४१
प्रव्यक्तपाटल	२८
प्रासादस्तव	१५६
प्रिये प्रयाहि	१२२
बन्धूकबिम्ब	२८
बृंहितैरुपहसन्ति	८१
ब्रह्मक्षत्र	१३१
ब्रूमः किम्	२१२
भवदास्यसम्भवानाम्	३०
भस्मालेपः	२३३
भाण्डप्रभूत	७२
भीता भूमिभृतः	२५४
भीत्या वीर	१२३
भूपालप्रवर	२११
भूभृत्सद्वंशजन्मा	२५३
भूरिस्वादुरसम्	१६७
भ्रान्तिश्रान्ताः	११३
मदजलभरभाजः	८७
मरालोऽयमायाति	१६६
मरुत्सेनावाहैः	७१
महसा तव	२५७
महीपालमौले	२३२
माञ्जिष्ठान्यपि	८६
मुक्ताहाराः शरदि	२२०
मुखाम्भोजमृङ्गायित	६६
मुष्टिंयत्काञ्चनेन	५५
मृदूनि स्वादूनि	१२६
यं रावणारण्यहिरण्यरेताः	७
यः सूर्यम्	२५८
यत्सुवर्ण	२२५
यत्र तत्र	२२४
यदोड्डीय यान्तः	१५३
यस्त्रिविक्रम	४
यानाश्रिता	२४८
यास्यत्येव	१२१
ये क्रव्यादाः	२५५
येनच्छेदे तरूणाम्	१४३
ये हृष्यन्ति	१५०
यैः पत्रवाचयात्	१४०
रघुपतिविशिख	४२
रघुवीरयशोराशि	२६१
राजन्नुल्लसित	२६०
राजन्नेते गजास्ते	७५
राजन् वृन्दारकाद्रि	१६३
राम त्वां समरे	१३०
रामभद्रप्रतापः	२४७
राशिः कार्त्तस्वरस्य	१४७
रुचिजितरतिजानिः	५
रेणुस्तोमैः सहन्ते	७३
रोषस्तवकारुणिते	४३
लब्धः श्रीराम	२६७
लोठयत्यवनिमण्डले	४१
वटार्कपर्ण	१८१
वर्त्मसुराणाम्	१६८
वर्धन्तां मेरुपृष्ठे	१४८
वहतु गगने गङ्गा	२२६
विख्यातः कृष्णवर्त्मा	२४६
वितेने येनैष	२४२
विद्वेषि रोष	९४

श्लोकः	संख्या	श्लोकः	संख्या
विन्ध्ये गौरी	१८०	श्रीराम व्यक्त	२३१
विमुक्तकञ्चुक	५७		
वियदुत्पतनोल्क	६४	सङ्ग्रामे भङ्गभाजः	११५
विलसदलिनिवह	८०	सङ्ग्रामोर्वी	२६८
विविधमणि	१७९	सत्रायते समस्तम्	१३२
विश्राणनच्युत	१४४	समुन्नतिजिता	१०६
विहरत्सुर	१२०	साम्भसा जलधरेण	२००
विहितानतयः	१६९	साम्ये सत्यपि	२४३
वीतप्रत्यूह	१४५	सीतासहचर	१२५
वीतमदोबलवान्	९६	सुरेन्द्रासुरेन्द्र	१६१
वीर क्षीराब्धिवीची	२१६	सौवर्णं पाणिमूले	१३४
वृद्धं जलं यदभिरक्षति	२४४	स्तूपयति त्रिदशाद्रिम्	२०३
वैदेहीदयित	१५	स्पृशति तवानन	२७
		स्फटिकोपल	१९६
शक्ता वाहाः	७४	स्फीता कीर्ति	२३७
शत्रुप्रताप	९२	स्यादेतद्धवलम्	१५७
शूलशरासन	९७		
शृङ्गारिणो रण	७९	हन्तानन्त चमूः	११०
श्यामोर्जित	४७	हर्यक्षोदारशौर्याः	९३
श्रितविपुलताम्र	१७३	हर्यक्षोहैमवत्याः	३
श्रीखण्डैः काकतुण्डैः	१४६	हर्षं हंसकुले	१११
श्रीरामभद्र	२४५	हित्वा पत्रम्	१७१

• • •

शुद्धिपत्रम्

पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
१		माधुरीविशदाक्रियते	क्रियतेमाधुरीरम्या
२७ श्लोक ३८ टिप्पणी	५	रके	रेक
५७ ५९ ६१ ६३		अश्ववर्णना	हस्तिवर्णना
६१ टिप्पणी	१	अण्	अण् + ङीप्
६३ श्लोक ८८ माधुरी	१	उल्लश	उल्लस
७१ टिप्पणी	२	गृहाहा	गृहा
७२ टिप्पणी	२	इत्ययरः	इत्यमरः
७३ श्लोक १०२ माधुरी	१	धारयन्द	धारयन्
७७ श्लोक १०९		पात्रलक्ष्मी	पत्रलक्ष्मी
७९ श्लोक १११		बलहकान्	बलाहकान्
८३ माधुरी	२	का	वा
८४ श्लोक ११८	२	संममि	संमिम
८५ श्लोक ११९ माधुरी	४	शर्दं	दंश
९२ श्लोक १२९		द्रम	द्रुम
१०० श्लोक १४०		ज्योतिर्मि	ज्योतिर्भि
१०६ श्लोक १४७ टिप्पणी	२	ग्रामीणः	ग्रामणीः
१११ श्लोक १५५ हिन्दी अनुवाद	३	आकार	आकर
११९ माधुरी	१	सर्वेसुख	सर्वेसुखे
१२६ श्लोक १७६ माधुरी	६	धातपादः	धौतपादः
१२९ टिप्पणी	१	अष्टादशशु	अष्टादशसु
१६५ श्लोक २३६		न लभते	लभते
१६८ श्लोक २४१		रजोभि तद्	रजोभिस्तद्
१७२ श्लोक २४६ हिन्दी अनु०	१	अत्यधिने''''हीनक	अत्यधिक''''हीन

श्रीदुर्गाप्रसादग्रन्थमणिमाला

श्रीदुर्गाप्रसादग्रन्थमणिमाला के अन्तर्गत सम्प्रति निम्नलिखित ग्रन्थों को प्रकाशित करने की योजना है ।

अ—कर्म काण्ड

(१) संस्कार-दर्पण (जन्म से मरणपर्यन्त संस्कारों की विधि)

(२) श्राद्ध-विवेक (सभी प्रकार के श्राद्धों की विधि का वर्णन)

(३) दान-वितान (विविध दानों का विधान)

(४) तिथि निर्णय (५) यज्ञ मीमांसा (६) देव प्रतिष्ठा पद्धति ।

आ—ज्योतिष

(१) जातक शेखर (जन्म पत्र में ग्रहों का विचार)

(२) दैवज्ञ-रत्न (मुहूर्त्त विषयक विचार)

(३) वर्ण योगावली (वर्ष फल का विचार)

(४) योग संग्रह (जन्म कुण्डली के विविध योगों का फल) ।

इ—व्याकरण

(१) बलभद्रीय सारस्वत (२) काशिका सार ।

ई—साहित्य

(१) रामकीर्तिकुमुदमाला (२) श्रीमद्भागवतरासपञ्चाध्यायीटीका ।

इस ग्रन्थ माला के प्रकाशन हेतु पर्याप्त धन की आवश्यकता होगी, तदर्थ सभी धनी मानी गुणग्राही भारतीय संस्कृति के समुपासक जनों से सानुनय निवेदन है कि वे इस पुनीत कार्य में यथापुण्य सहयोग प्रदान करें ।

दानी महानुभावों के निम्नलिखित वर्ग होंगे ।

(१) **संरक्षक**—१०१=०० (मात्र एक सौ एक रुपये) या इससे अधिक द्रव्य एक बार प्रदान करने वाले सज्जन संरक्षक होंगे । इन्हें तथा इनके वंशजों को इस ग्रन्थ-माला की सभी पुस्तकें निःशुल्क मिलती रहेंगी ।

(२) **आजीवन सदस्य**—५१=०० (मात्र इक्यावन रुपये) एक बार प्रदान करने वाले सज्जनों को तथा उनके वंशजों को उपर्युक्त सभी पुस्तकें मिलेंगी ।

(३) **विशिष्ट सदस्य**—२१=०० (मात्र इक्कीस रुपये) एक बार प्रदान करने वाले सज्जनों को कर्मकाण्ड तथा ज्योतिष् की सभी पुस्तकें मिलेंगी ।

दान कर्त्ताओं को यह अधिकार है कि वे अपना दान किसी विशेष पुस्तक के लिये सुरक्षित कर दें ।

भवदीय

चन्द्रभानु त्रिपाठी

संयोजक

श्री दुर्गाप्रसादग्रन्थमणिमालाप्रकाशनसमिति

श्रीदुर्गाप्रसादग्रन्थमणिमाला

आर्थिक सहयोग दाताओं की सूची

१—उत्तर प्रदेश संस्कृत अकादमी लखनऊ समस्त व्यय का ६० प्रतिशत
२—आचार्य बालकराम त्रिपाठी एकडला, सरौली, फतेहपुर रुपये ५०१=००
३—डा० रामलखन शर्मा ५८, छितवापुर रोड, लखनऊ ,, १०१=००
४—आचार्य मानस शास्त्री, मानस मन्दिर हाथरस ,, १०१=००
५—श्री बालकृष्ण त्रिपाठी थरियाँव, फतेहपुर ,, १०१=००
६—श्री संकठा प्रसाद त्रिपाठी, इंगुवा, बाँदा ,, १०१=००
७—श्री बालकृष्ण त्रिपाठी (अभियन्ता) सिलमी, फतेहपुर ,, १०१=००
८—श्री राधाकृष्ण त्रिपाठी थरियाँव, फतेहपुर ,, ५१=००
९—श्री कृपाशंकर मिश्र एडवोकेट, २९, बलरामपुर हाउस इलाहाबाद ,, ५१=००
१०—डा० विद्याधर धर्माधिकारी दारागंज, इलाहाबाद ,, ५१=००
११—डा० मोहन सिंह एकडला, सरौली, फतेहपुर ,, ५१=००
१२—व्यवस्थापक शाकुन्तल मुद्रणालय ३४, बलरामपुर हाउस इलाहाबाद ,, ५१=००

★